Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# A DESCRIPTIVE CATALOGUE

OF THE

# SANSKRIT MANUSCRIPTS

IN THE

## GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

BY

M. RAṄGACARYA, M.A., RAO BAHADUR,

PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE; CURATOR, GOVERNMENT ORIENTAL MSS. LIBRARY, AND REGISTRAR OF BOOKS, MADRAS.

---

*Prepared under the orders of the Government of Madras.*

---

VOL. X.—SYSTEMS OF INDIAN PHILOSOPHY—DVAITA-VEDĀNTA, VIŚIṢṬĀDVAITA-VEDĀNTA AND ŚAIVA-VĒDĀNTA.

MADRAS:

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

[PRICE, 1 rupee 12 annas.] 1911. [2 shillings 9 pence.]

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# A DESCRIPTIVE CATALOGUE

OF THE

# SANSKRIT MANUSCRIPTS

IN THE

## GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

BY

M. RAṄGĀCARYA, M.A., RAO BAHADUR,
PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE; CURATOR, GOVERNMENT ORIENTAL MSS. LIBRARY; AND REGISTRAR OF BOOKS, MADRAS.

---

*Prepared under the orders of the Government of Madras.*

---

## VOL. X.—SYSTEMS OF INDIAN PHILOSOPHY—DVAITA-VĒDĀNTA, VIŚIṢṬĀDVAITA-VĒDĀNTA AND ŚAIVA-VĒDĀNTA.

MADRAS:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1911.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# CONTENTS.

## CLASS VII.

### SYSTEMS OF INDIAN PHILOSOPHY—(*continued*).

### 5. VĒDĀNTA—2. DVAITA-VĒDĀNTA.


| Name of the work. | Numbers. | Pages |
|---|---|---|
| Upādhikhaṇḍana ... ... ... ... ... | 4781 | 3571 |
| Upādhikhaṇḍanaṭīkā .. ... ... ... ... | 4782, 4783 | 3572, 3573 |
| Kathalakṣaṇapañcikā ... ... ... ... ... | 4784 | 3574 |
| Tattvavivēka ... ... ... ... ... ... | 4785 | 3575 |
| Tattvavivēkavyākhyā ... ... ... ... ... | 4786, 4787 | 3576, 3577 |
| Tattvasaṅkhyāna ... ... ... ... ... | 4788 | 3577 |
| Tattvasaṅkhyānavivaraṇa ... ... ... ... | 4789, 4790 | 3578, 3579 |
| Tattvōdyōta .. ... ... ... ... ... | 4791 | 3579, 3580 |
| Tattvōdyōtavivaraṇa ... ... ... ... ... | 4792 | 3581, 3582 |
| Nyāyakārikāvalī .. ... ... ... ... | 4793 | 3583 |
| Nyāyamuktāvalī ... ... ... .. ... ... | 4794 | 3584 |
| Nyāyādhvadīpika ... ... ... ... ... | 4795 | 3585, 3586 |
| Nyāyāmṛta ... ... ... ... .. ... | 4496, 4797 | 3587, 3588 |
| Praṇavadarpaṇakhaṇḍana ... ... ... ... | 4798 | 3588 |
| Prapañcamithyātvānumānakhaṇḍana ... .. ... | 4799 | 3589 |
| Prapañcamithyatvānumānakhaṇḍanavyākhyā: Pañcikā | 4800 to 4802 | 3590, 3591 |
| Pramāṇapaddhati ... ... ... ... ... | 4803, 4804 | 3592, 3593 |
| Pramāṇapaddhativyākhyā .. ... ... ... | 4805 | 3593, 3594 |
| Pramāṇalakṣaṇa ... ... ... ... ... | 4806, 4807 | 3595, 3596 |
| Pramaṇalakṣaṇaṭīkā: Nyāyakalpalatā ... ... ... | 4808, 4809 | 3596, 3597 |
| Brahmasūtrabhāṣya ... ... ... ... ... | 4810 to 4812 | 3598 to 3600 |
| Brahmasūtrabhāṣyavyākhyā: Tattvaprakāśikā ... | 4813 | 3601, 3602 |
| Do. Dīpikā ... ... | 4814, 4815 | 3603, 3604 |
| Brahmasūtrāṇubhāṣya ... ... ... ... ... | 4816, 4817 | 3604, 3605 |
| Brahmasūtrādhikaraṇārthasaṅgraha ... ... ... | 4818 | 3606 |
| Brahmasūtrānuvyākhyāna ... ... ... ... | 4819 | 3607, 3608 |
| Anuvyākhyānaṭīkā: Nyāyasudhā ... ... .. | 4820 | 3609 |
| Nyāyasudhāvyākhyāna: Parimala ... ... ... | 4821 | 3610 |
| Anuvyākhyānanyāyavivaraṇa ... ... ... | 4822 | 3611, 3612 |
| Bhāgavatatātparyanirṇaya ... ... ... ... | 4823 | 3613, 3614 |
| Bhāratatātparyanirṇaya ... ... ... ... | 4824 to 4829 | 3615 to 3617 |
| Bhāratatātparyanirṇayaṭippaṇī .. ... ... | 4830 | 3617 |
| Do. Padārthavivṛti ... | 4831 | 3618 |
| Do. Bhāvaprakāśikā ... | 4832 | 3619, 3620 |


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



2. Dvaita-Vēdānta—(*continued*).


| Name of the work. | Numbers. | Pages |
|---|---|---|
| Bhāratatātparyanirṇayaṭīkā ... ... ... ... | 4833 | 3621 |
| Madhvatantranavamañjarī ... ... ... ... | 4834 | 3622, 3623 |
| Māyāvādakhaṇḍana ... . .. ... ... | 4835 | 3624 |
| Māyāvadakhaṇḍanavyākhyā ... . ... ... | 4836 to 4838 | 3625, 3626 |
| Vādāvali ... ... .. ... ... ... ... | 4839 | 3626 |
| Viṣṇutattvanirṇaya ... ... ... ... ... | 4840 to 4842 | 3627 to 3629 |
| Viṣṇutattvanirṇayavyākhyā ... . ... .. | 4843 | 3629 |
| Sattattvaratnamālā ... ... ... ... ... | 4844 | 3630, 3631 |
| Sattattvaratnamālāṭīkā ... ... ... ... ... | 4845 | 3632, 3633 |
| Saṅgraharāmāyaṇaṭippaṇī : Bhāvaratnapradīpti ... | 4846 | 3634 |
| Sarvamūlādyantaślōkasaṅgraha ... ... ... | 4847 | 3635, 3636 |


3. Viśiṣṭādvaita-Vēdānta.


| | | |
|---|---|---|
| Advaitakālānala ... ... ... ... ... ... | 4848 | 3637 |
| Advaitakhaṇḍana ... ... ... ... . | 4849 | 3638 |
| Advaitavidyāvijaya ... ... ... ... .. | 4850, 4851 | 3639, 3640 |
| Adhikaraṇayuktivilāsa ... ... ... ... ... | 4852 | 3641 |
| Adhikaraṇasārārthadīpikā ... ... ... ... | 4853 | 3642, 3643 |
| Adhikaraṇasārāvali ... ... ... ... ... | 4854 to 4861 | 3644 to 3647 |
| Adhikaraṇasārāvalivyākhyā : Adhikaraṇacintāmaṇi ... | 4862, 4863 | 3647 to 3650 |
| Adhyātmacintā .. ... ... ... ... ... | 4864 | 3650 |
| Abhēdakhaṇḍana ... .. . . ... ... ... | 4865 | 3651, 3652 |
| Aruṇādhikaraṇasaraṇivivaraṇī ... ... ... ... | 4866 | 3653 to 3655 |
| Aruṇādhikaraṇamañjarī ... ... ... .. ... | 4867 | 3656 |
| Astibrahmētiśrutyarthavicāra ... ... ... .. | 4868 | 3656 |
| Ānandatāratamyakhaṇḍana ... ... .. ... | 4869, 4870 | 3657, 3658 |
| Ōṅkāravādārtha ... ... ... ... ... ... | 4871, 4872 | 3659, 3660 |
| Gītābhāṣyavyākhyā : Tātparyacandrikā ... ... | 4873 to 4875 | 3660 to 3663 |
| Gītārthasaṅgraha ... ... ... ... ... | 4876, 4877 | 3663, 3664 |
| Do. Bhagavadgītāvyākhyā ... ... | 4878, 4879 | 3665 to 3667 |
| Gītārthasaṅgraharakṣā ... ... ... ... ... | 4880, 4881 | 3668 to 3670 |
| Cidacidīśvaratattvanirūpaṇa ... ... ... | 4882 | 3671 |
| Jijñāsādarpaṇa ... ... ... ... . .. | 4883 | 3672, 3673 |
| Jnānayāthārthyavāda ... ... ... ... ... | 4884, 4885 | 3674, 3675 |
| Jnānaratnaprakāśikā ... ... ... ... | 4886 | 3675 |
| Ṇatvacandrikā ... ... ... ... ... ... | 4887 | 3676, 3677 |
| Ṇatvadarpaṇa ... ... ... ... ... ... | 4888 to 4890 | 3678, 3679 |
| Tattvanirṇaya ... ... ... ... ... ... | 4891 | 3679, 3680 |
| Tattvabhāskara ... ... ... ... ... ... | 4892, 4893 | 3681 to 3683 |
| Tattvamārtāṇḍa : Brahmasūtravyākhyā ... ... | 4894, 4895 | 3683 to 3687 |
| Tattvamuktākalāpa ... ... .. ... ... | 4896 to 4899 | 3688 to 3690 |


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



3. Viśiṣṭādvaita-Vēdānta—(*continued*).


| Name of the work. | Numbers. | Pages |
|---|---|---|
| Tattvamuktākalāpavyākhyā : Sarvārthasiddhi ... | 4900 | 3690, 3691 |
| Sarvārthasiddhivyākhyā : Ānandavallarī ... ... | 4901 | 3692 |
| Tattvasāra ... ... .. ... ... ... ... | 4902, 4903 | 3693 to 3695 |
| Do. Ratnasāriṇīsahita ... ... ... ... | 4904, 4905 | 3695 to 3698 |
| Durvādatūlavātūla .. ... .. ... ... | 4906 | 3699 |
| Nayadyumaṇi ... ... ... ... ... ... | 4907 | 3700 |
| Nayamayūkhamālikā ... ... ... ... ... | 4908 | 3701 |
| Nārāyaṇapadasvaranirvacana ... ... ... ... | 4909 | 3702 |
| Nyāyakuliśa ... ... ... ... ... ... | 4910 | 3703, 3704 |
| Nyāyapariśuddhi ... ... ... ... ... ... | 4911 | 3705, 3706 |
| Nyāyapariśuddhivyākhyā : Nikaṣā ... ... ... | 4912, 4913 | 3707, 3708 |
| Do. Nyāyasāra ... ... ... | 4914, 4915 | 3708 to 3710 |
| Nyāyaratnāvali ... ... ... ... ... ... | 4916 | 3710, 3711 |
| Nyāyasiddhāñjana... ... ... ... ... ... | 4917 to 4920 | 3712 to 3714 |
| Nyāyasiddhāñjanavyākhyā ... ... ... ... | 4921 to 4923 | 3714 to 3716 |
| Pañcakōśavicāra ... ... ... ... ... ... | 4924 | 3716 |
| Paratattvanirṇaya ... ... ... ... ... | 4925 | 3717 |
| Paramukhacapēṭikā ... ... ... ... ... | 4926 | 3718 |
| Parikaravijaya ... ... ... ... ... ... | 4927 | 3719, 3720 |
| Pārāśaryavijaya ... ... ... ... ... ... | 4928 | 3721 |
| Pucchabrahmavādanirāsa ... ... ... ... | 4929 | 3722 |
| Pūrvōttaramīmāṁsaikakaṇṭhya ... ... ... | 4930, 4931 | 3723 to 3725 |
| Praṇavadarpaṇa ... ... ... ... ... ... | 4932, 4933 | 3726 to 3728 |
| Pratijñāvādārtha ... ... ... ... . . ... | 4934, 4935 | 3728, 3729 |
| Bimbatattvaprakāśikā ... .. ... ... ... | 4936 | 3729 |
| Brahmapadaśaktivāda ... ... ... ... .. | 4937 | 3730 |
| Brahmalakṣmanirūpaṇa ... ... .. ... ... | 4938 | 3731 |
| Brahmalakṣaṇavākyārtha ... ... ... ... | 4939 | 3732, 3733 |
| Brahmavidyāvijaya ... ... ... ... ... | 4940, 4941 | 3734, 3735 |
| Brahmasāguṇyanirūpaṇa ... ... ... ... | 4942 | 3735 |
| Brahmasūtrabhāṣya ... ... ... ... ... | 4943 to 4952 | 3736 to 3741 |
| Brahmasūtrabhāṣyadūṣaṇōddhāra ... ... ... | 4953 | 3741 |
| Brahmasūtrabhāṣyavyākhyā : Tattvaṭīkā ... ... | 4954 to 4957 | 3742 to 3744 |
| Do. Nayaprakāśikā ... ... | 4958 | 3745, 3746 |
| Do. Mūlabhāvaprakāśikā ... | 4959, 4960 | 3747 to 3749 |
| Do. Śrutapradīpikā ... | 4961, 4962 | 3749, 3750 |
| Do. Śrutaprakāśikā ... | 4963 to 4968 | 3751 to 3754 |
| Śrutaprakāśikāvyākhyā : Bhāvaprakāśikā ... ... | 4969 | 3754 |
| Do. Gurubhāvaprakāśikā ... | 4970 | 3755, 3756 |
| Brahmasūtrabhāṣyavyākhyā ... ... ... ... | 4971 | 3757, 3758 |
| Brahmasūtrabhāṣyasaṅgrahavivaraṇa ... ... ... | 4972, 4973 | 3759, 3760 |
| Brahmasūtrabhāṣyasthapurvapakṣasaṅgrahakārikā ... | 4974 | 3760 |


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



### 3. Viśiṣṭādvaita-Vēdānta—(continued).


| Name of the work. | Numbers. | Pages |
|---|---|---|
| Brahmasūtrabhāṣyārambhaprayōjanasamarthana ... | 4975 | 3761 |
| Brahmasūtrabhāṣyōpanyāsa ... ... ... ... | 4976 | 3762 |
| Brahmasūtrādhikaraṇasūtrakārikā ... ... ... | 4977 | 3763 |
| Brahmājñānanirāsa ... ... ... ... | 4978 | 3764, 3765 |
| Bhargaśabdārthavicāra ... ... ... ... ... | 4979 | 3766 |
| Bhēdadarpaṇa ... ... ... ... ... ... | 4980, 4981 | 3767, 3768 |
| Mahābhāratatātparyarakṣā ... ... ... ... | 4982 | 3769, 3770 |
| Mōkṣakāraṇatāvāda ... ... ... ... ... | 4983, 4984 | 3771, 3772 |
| Yatīndramatadīpikā ... ... ... ... ... | 4985, 4986 | 3772 to 3774 |
| Rāmānujasiddhāntavijaya ... ... ... ... | 4987 | 3774 |
| Rāmānujasiddhāntasaṅgraha ... ... ... ... | 4988 to 4990 | 3775 to 3777 |
| Vādādrikuliśa ... ... ... ... ... ... | 4991 | 3778 |
| Vāditrayakhaṇḍana ... ... ... ... | 4992, 4993 | 3779, 3780 |
| Vijayīndraparājaya ... ... ... ... ... | 4994, 4995 | 3781 to 3784 |
| Virōdhanirōdha : Bhāṣyapādukā ... ... ... ... | 4996, 4997 | 3784 to 3786 |
| Virōdhavarūthinīpramāthinī ... ... ... ... | 4998 | 3786, 3787 |
| Viśiṣṭādvitasiddhānta ... ... ... ... ... | 4999 | 3788 |
| Viṣayatāvāda ... ... ... ... ... ... | 5000 | 3789 |
| Viṣayavākyadīpikā ... ... ... ... ... | 5001 to 5003 | 3790 to 3792 |
| Vēdāntakaṇṭakōddhāra ... ... ... ... ... | 5004 | 3792 |
| Vēdāntakārikāvalī ... ... ... ... ... | 5005 to 5007 | 3793 to 3795 |
| Vēdāntakaustubha ... ... ... ... ... | 5008 to 5010 | 3796 to 3798 |
| Vēdāntadīpa... ... ... ... ... ... | 5011 to 5018 | 3799 to 3802 |
| Vēdāntavijaya : Gurūpasadanavijaya ... ... ... | 5019 | 3803 |
| Do. Vijayōllāsa ... ... ... .. | 5020 | 3804, 3805 |
| Vēdāntavijayavyākhyā : Maṅgaladīpikā ... ... | 5021 | 3806, 3807 |
| Vēdāntasāra ... ... ... ... ... ... | 5022 to 5027 | 3808 to 3810 |
| Vēdārthavicāra ... ... ... ... ... ... | 5028 | 3810, 3811 |
| Vēdārthasaṅgraha ... ... ... ... ... ... | 5029 to 5032 | 3812 to 3814 |
| Vēdārthasaṅgrahavyākhyā : Tātparyadīpikā ... ... | 5033 to 5036 | 3814 to 3816 |
| Śatadūṣaṇī ... . ... ... ... | 5037 to 5040 | 3816 to 3818 |
| Śatadūṣaṇīvyākhyāna : Caṇḍamāruta... ... ... | 5041, 5042 | 3819 |
| Do. Nṛsiṁharājīya ... ... | 5043 | 3820 |
| Do. Sahasrakiraṇī ... ... | 5044 | 3821 |
| Śarīravāda ... ... ... ... ... ... | 5045 | 3822 |
| Śārīrakaśāstradīpikā ... ... ... ... ... | 5046 | 3823 |
| Śārīrakaśāstrārthasaṅgraha ... ... ... ... | 5047 | 3824, 3825 |
| Śāstrārambhasamarthana ... .. ... ... | 5048 to 5050 | 3826, 3827 |
| Śāstraikyavāda ... ... ... ... ... ... | 5051 | 3828 |
| Śrībhāṣyādyantabhāga ... ... ... ... ... | 5052 | 3829 |
| Śrutyarthanirṇaya ... ... ... ... ... | 5053 | 3829 |
| Ṣaṣṭhyarthanirṇaya ... ... ... ... ... | 5054, 5055 | 3830, 3831 |


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



3. VIŚIṢṬĀDVAITA-VĒDĀNTA—(*continued*).


| Name of the work. | Numbers. | Pages |
|---|---|---|
| Saṁvidēkatvānumānanirāsavādārtha ... ... .. | 5056 | 3832 |
| Sadvidyāvijaya ... ... ... ... ... ... | 5057, 5058 | 3833, 3834 |
| Samāsavāda ... ... ... ... ... ... | 5059 | 3834 |
| Sāmānādhikaraṇyavāda ... ... ... ... ... | 5060 | 3835 |
| Sāmānādhikaraṇyavādaṭippaṇī ... ... ... | 5061 | 3836 |
| Sārārthacatuṣṭaya ... ... ... ... ... ... | 5062 | 3837 |
| Siddhāntaratnāvali ... ... ... ... .. | 5063 to 5066 | 3838 to 3841 |
| Siddhāntavaijayantī ... ... ... ... ... | 5067 | 3842 |
| Siddhāntasaṅgraha .. ... ... ... ... | 5068 | 3843 |
| Siddhāntasiddhāñjana ... ... ... ... . | 5069 to 5071 | 3844 to 3846 |
| Siddhitraya ... ... ... ... ... ... | 5072 | 3846 |
| Sūtramuktākalāpa .. ... ... ... ... | 5073 | 3847 to 3849 |


4. ŚAIVA-VĒDĀNTA.


| | | |
|---|---|---|
| Anubhavasūtra ... ... ... ... .. ... | 5074, 5075 | 3850 to 3852 |
| Kālahastīśavilāsa ... ... ... ... ... ... | 5076 | 3852 |
| Caturvēdatātparyasaṅgraha ... ... ... .. | 5077 | 3853 to 3855 |
| Do. Savyākhya ... ... | 5078 | 3856 |
| Nakṣatravādāvali ... ... ... ... ... ... | 5079 | 3857 |
| Nandīśvarakārikāvyākhyā : Tattvavimarśanī ... ... | 5080 | 3858, 3859 |
| Navakōṭi ... ... ... .. ... ... .. | 5081 to 5083 | 3860, 3861 |
| Nārāyaṇapadanirvacana ... ... ... ... ... | 5084 | 3862 |
| Nārāyaṇaśabdanirvacana . . ... ... ... ... | 5085 | 3863 |
| Nyāyasāra .. ... ... ... ... ... | 5086 | 3864 |
| Pañcaratnavyākhyā : Tantrasāraprākāśikā ... ... | 5087 | 3865, 3866 |
| Do. Tārakadīpikā .. ... ... | 5088 | 3867 |
| Do. Śivatattvaprakāśikā ... ... | 5089 | 3868 |
| Do. Śrutyarthapradīpikā ... ... | 5090 | 3869, 3870 |
| Basavarājīya ... ... ... ... ... ... | 5091 | 3871 to 3873 |
| Brahmasūtrabhāṣya ... ... ... ... ... | 5092 | 3874, 3875 |
| Brahmasūtrabhāṣyavyākhyā : Śivādityamaṇidīpikā ... | 5093, 5094 | 3876, 3877 |
| Bhāratasārasaṅgraha : Savyākhya ... ... ... | 5095, 5096 | 3878, 3879 |
| Bhūtasṛṣṭi ... ... ... ... ... ... | 5097 | 3880 |
| Ratnatrayaparīkṣā : Savyākhyā ... ... ... ... | 5098 | 3881 |
| Rāmāyaṇatātparyanirṇaya .. ... ... ... | 5099 | 3882, 3883 |
| Viśēṣārthaprakāśa ... ... ... ... ... | 5100 to 5102 | 3884 to 3887 |
| Vīraśaivasiddhānta ... ... ... ... ... | 5103 | 3887 |
| Vaidikavijayadhvaja ... ... ... ... ... | 5104 | 3888, 3889 |
| Śāstrasanmaṅgalāditvavicāra ... ... ... ... | 5105 | 3890 |
| Śikhariṇīmālā : Śivatattvavivēkasahitā .. ... | 5106 | 3891 to 3894 |
| Śivajñānatārāvali ... ... ... ... ... ... | 5107 | 3895 |

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



4. ŚAIVA-VĒDĀNTA—(*continued*).


| Name of the work. | Numbers. | Pages |
|---|---|---|
| Śivajñānadīpikā ... ... ... ... ... ... | 5108 | 3896 |
| Śivajñānabōdha ... ... ... ... ... ... | 5109 | 3897, 3898 |
| Śivajñānabodhalaghuṭīkā... ... ... ... ... | 5110 | 3899 |
| Śivatattvaratnākara ... ... ... ... ... | 5111, 5112 | 3900 to 3911 |
| Śivādvaita ... ... ... ... ... ... | 5113 | 3912 |
| Śivādvaitaprakāśaka ... ... ... ... ... | 5114 | 3913 to 3915 |
| Śivōtkarṣapratipādanagrantha ... ... ... ... | 5115 | 3916 |
| Śaivaparibhāṣa ... ... ... ... ... ... | 5116 | 3917 |
| Śaivasañjīvana ... ... ... ... ... ... | 5117, 5118 | 3918, 3919 |
| Siddhāntaśikhāmaṇi ... ... ... ... ... | 5119, 5120 | 3920 to 3925 |
| Hariharatāratamya ... ... ... ... ... | 5121, 5122 | 3925, 3926 |

INDEX ... ... ... ... ... ... ... ... ... ... *i to xiii*


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

A

# DESCRIPTIVE CATALOGUE

OF THE

# SANSKRIT MANUSCRIPTS.

## VOLUME X.

## CLASS VII.—SYSTEMS OF INDIAN PHILOSOPHY—(*continued*).

### 5. VĒDĀNTA—2. DVAITA-VĒDĀNTA.

### No. 4781. उपाधिखण्डनम्.
### UPĀDHIKHAṆḌANAM.

Substance, palm-leaf. Size, $5\frac{1}{4} \times 1\frac{1}{8}$ inches. Pages, 3. Lines, 9 on a page. Character, Nandināgarī. Condition, good. Appearance, new.

Begins on fol. 11*a*. The other works herein are Naiṣadhavyākhyā 1*a*, Pramāṇalakṣaṇa 8*a*, Tattvasaṅkhyāna 10*a*, Tattvavivēka 10*a*, Māyāvādakhaṇḍana 10*b*, Prapañcamithyātvānumānakhaṇḍana 12*a*, Tattvōdyōta 12*a*, Viṣṇutattvanirṇaya 17*a*, Aṣṭādhyāyī 28*a*.

Complete.

A criticism of the view of the Advaita-school which tries to explain away the difference between Paramātman and Jīvātman as being due to certain limiting conditions operating upon the Brahman.

By Ānandatīrtha, well-known otherwise as Madhvācārya.

**Beginning:**

नारायणोऽगण्यगुणनित्यैकानिलयाकृतिः ।
अशेषदोषरहितः प्रीयतां कमलालयः ॥

अज्ञताखिलसन्देहघटिते न कुतश्चन ।
उपाधिभेदाद्भुटत इति चेत्स स्वभावतः ॥

अज्ञानतो वा द्वैतस्य सत्यता स्वत एव चेत् ।
अनवस्थितिरज्ञानहेतौ वान्योन्यसिद्धता ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चक्रकापत्तिरथवा भेदश्चोपाधितः कुतः ।
विद्यमानस्य भेदस्य ज्ञापको नैव कारकः ॥
उपाधेर्दृष्टपूर्वो हि सोऽपि देशान्तरस्य सः ।
ज्ञापको विद्यमानस्य मूढबुद्धिव्यपेक्षया ॥
न चेदुपाधिसम्बन्ध एकदेशोऽथ सर्वगः ।
एकदेशेऽनवस्था स्यात् सर्वगश्चेन्न भेदतः ॥

**End:**

दुर्घटत्वमविद्याया भूषणं न तु दूषणम् ।
दुर्घटत्वं भूषणश्चेत् स्यादविद्यात्वमात्मनः ॥
अन्धं तमोऽप्यलङ्कारो नित्यदुःखं शिरोमणिः ।
अतः परो मात्रयेति पूर्वश्रुतिनिदर्शितः ॥
अन्यमीशामिति श्रुत्या भिन्नजीवदृशङ्कितः ।
भिन्नत्वेनात्मसादृश्यदो यदेति मा श्रुतेस्सदा ॥
मायावादतमोव्याप्तमिति तत्त्वदृशा जगत् ।
भातं सर्वज्ञसूर्येण प्रीतये श्रीपतेस्सदा ॥
नमोऽमन्दनिजानन्दसान्द्रसुन्दरमूर्तये ।
इन्दिरापतये नित्यानन्दभोजनदायिने ॥

**Colophon:**

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितम् उपाधिखण्डनं समाप्तम् ॥

---

## No. 4782. उपाधिखण्डनटीका.
## UPĀDHIKHAṆḌANAṬĪKĀ.

Substance, palm-leaf. Size, 13 $\frac{5}{8}$ × 1 $\frac{5}{8}$ inches. Pages, 28. Lines, 7 on a page. Character, Nandināgarī. Condition, good. Appearance, old.

Begins on fol. 65*a*. The other woks herein are Pramāṇapaddhati 1*a*, Tattvasaṅkhyānavyākhyā 41*a*, Tattvavivēkavyākhyā 49*a*, Māyāvādakhaṇḍanavyākhyā 56*b*, Prapañcamithyātvānumānakhaṇḍanavyākhyā 80*a*.

Complete.

A commentary on the Upādhikaṇḍana, otherwise known as the Tattvaprakāśikā of Ānandatīrtha: by Jayatīrtha.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

रमाया रमणं नत्वा गुणमाणिक्यमण्डनम् ।
तत्त्वप्रकाशिकाव्याख्यां करिष्यामो यथामति ॥

परमात्मनोऽत्यन्तभिन्नस्य स्वतश्चिदानन्दाद्यात्मकस्यापि जीवस्य अनाद्यविद्याकामकर्मादिनिमित्तोऽयं परमार्थ एवान्यथाकारो दुःखाद्यनर्थो न परमेश्वरप्रसादादृतेऽपगच्छति । न चासाक्षात्कृतोऽसौ प्रसीदति ।

**End:**

एवमद्वैतमते शास्त्रस्यानारम्भणीयत्वप्रसङ्गात् नाद्वैतं सम्भवतीति उक्तमेव नारायणस्यागण्यगुणत्वमित्युपपादितम् । किमस्य प्रयोजनमित्यत आह—

मायावादतमोव्याप्तमिति तत्त्वदृशा जगत् ।
भातं सर्वज्ञसूर्येण प्रीतये श्रीपतेस्सदा ॥

एवं समापितप्रकरणोऽपि भगवानाचार्योऽन्तेऽपि पदाना(रमा)त्म-प्रणामस्तवने विधत्ते ।

नमोऽमन्दनिजानन्दसान्द्रसुन्दरमूर्तये ।
इन्दिरापतये नित्यानन्दभोजनदायिने ॥

आत्मसादृश्यत इत्युक्तम् । न चायं पुरुषार्थ इत्येतत्परिहारायाद्य-विशेषणम् । नानन्दस्वरूपे पुरुषार्थ इत्यतो नित्यानन्देति विशेषणम् । भोजनं भोगोऽनुभव इति यावत ॥

सुरासुराशिरोरत्नप्रभामुषि(ण्) नख(र)त्विषि ।
(कमला)कमितुः पादयुगळे (रतिरस्तु मे) ॥

**Colophon:**

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिततत्त्वप्रकाशिकाविवरणं जयतीर्थभिक्षुविरचितं सम्पूर्णम् ॥

---

## No. 4783. उपाधिखण्डनटीका.

## UPĀDHIKHAṆḌANAṬĪKĀ.

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 11. Lines, 10 on a page. Character, Nandināgarī. Condition, much injured. Appearance, old.

Begins on fol. 12*a*. The other works herein are Viṣṇutattva-nirṇaya 1*a*, Nyāyakalpalatā 7*b*, Kathālakṣaṇapañcikā 8*a*, Māyā-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



vādakhaṇḍanaṭīkā. 10*a*, Prapañcamithyātvānumānakhaṇḍana-pañcikā 17*a*, Tattvōdyōtavivaraṇa 22*a*, Brahmasūtrabhāṣya-vyākhyā (Dīpikā) 51*a*, Mahābhāratatātparyanirṇaya 77*a*, Dvādaśanāmastōtra 208*a*.

Complete.

Same work as the above.

---

## No. **4784.** कथालक्षणपञ्चिका.
## KATHĀLAKṢAṆAPAÑCIKĀ.

Pages, 3. Lines, 10 on a page.

Begins on fol. 8*a* of the MS. described under No. 4783.

Incomplete.

A commentary on a work called Kathālakṣaṇa, which deals with the various kinds of controversial dialectics adopted by philosophical disputants.

**Beginning :**

श्रियः कमितुरानम्य चरणाम्बुरुहद्वयम् ॥
यथाबोधं विधास्यामः कथालक्षणपञ्चिकाम् ॥

अथ कथां लिलक्षयिषुराचार्यः प्रारिप्सितपरिसमाप्त्यादिप्रयोजनेष्टदेवताप्रणामनुतिपुरस्सरं विवक्षितमर्थं दर्शयति—

नृसिंहमखिलाज्ञानतिमिरशिशिरद्युतिम् ।
संप्रणम्य प्रवक्ष्यामि कथालक्षणमञ्जसा ।

इह हि कृतदेवतानतीनामप्रिया ग्रन्थापरिसमाप्तिः ; सा भक्तिश्रद्धयातिशयपूर्वकत्वाभावनिमित्ता, न तत्पूर्वकस्य प्रारिप्सितपरिसमाप्त्यहेतुतां गमयितुं शक्नोति ; न ह्येकदेशव्यभिचारेण सामग्री व्यभिचारिणी स्यात् ; अत एव भक्त्याद्यतिशयपूर्वकत्वलक्षणं प्रणामस्य सम्यक् प्रकर्षं शिष्यान् ग्राहयितुं सम्प्रणम्येत्युक्तम् । या त्वकृतपरदेवतानतीनामपि समीहितसिद्धिः ; सा कारणान्तरादपि भविष्यति ; न ह्येकस्यैकमेव

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कारणम् । अथ कथां विवक्षतः तत्फलस्याज्ञाननिवृत्त्युपलक्षिततत्त्वज्ञानस्य निष्पादकत्वेन नृसिंहस्तुतिरवसरोचितेति तथैव विशिनष्टि—अखिलेति ।

अथ कथां विभागेनोद्दिशति—

वादो जल्पो वितण्डेति त्रिविधा विदुषां कथा ।

तत्त्वनिर्णयैकप्रयोजनत्वेनाभ्यर्हितत्वाद्वादस्य प्रथममुद्देशः ।

**End :**

न ह्यसदेव जल्पे वक्तव्यमिति नियमः । प्रत(ती)यमानसदति-क्रमे कारणाभावात्किं नाम सदपरिस्फूर्तावैकान्तिकभद(परा)भवाद्वरः पाक्षिक इति मन्वानोऽसदप्युपादत्ते । न च तत्साधनं तत्त्व.

---

No. **4785.** तत्त्वविवेकः.

TATTVAVIVĒKAḤ.

**Pages,** 2. Lines, 8 on a page.

Begins on fol. 10*a* of the MS. described under No. 4781.

Complete.

A brief summary in verse of the important conclusions of Dvaita-Vēdānta ; by Ānandatīrtha.

**Beginning :**

स्वतन्त्रं परतन्त्रञ्च प्रमेयं द्विविधं मतम् ।
स्वतन्त्रो भगवान्विष्णुः निर्दोषाखिलसद्गुणः ॥

द्विविधं परतन्त्रञ्च भावोऽभाव इतीरितः ।
पूर्वापरसदात्वेन त्रिविधोऽभाव इष्यते ॥

**End :**

खण्डितं रूपमेवात्र विकारोऽपि विकारिणः ।
कार्यकारणयोश्चैव तथैव गुणतद्वतोः ॥

क्रियाक्रियावतोस्तद्वत् तथा जातिविशेषयोः ॥
विशिष्टशुद्धयोश्चैव तथैवांशांशिनोरपि ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



य एतत्परतन्त्रश्च सर्वमेव हरेस्सदा ।
वशमित्येव जानाति संसारान्मुच्यते हि सः ॥

**Colophon:**

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं(तः) तत्त्वविवेक(:)[विवरणं] समाप्तम्(:) ॥

---

No. **4786.** तत्त्वविवेकव्याख्या.

TATTVAVIVĒKAVYĀKHYĀ.

Pages, 15. Lines, 7 on a page.

Begins on fol. 49*a* of the MS. described under No. 4782.

Complete.

A commentary on the Tattvavivēka of Ānandatīrtha: by Jayatīrtha.

**Beginning:**

प्रणम्य रमणं लक्ष्म्याः पूर्णबोधान् गुरूनपि ।
व्याख्यां तत्त्वविवेकस्य करिष्यामो यथामति ॥

ननु परमपुरुषादितत्त्वानां विवेकः शास्त्र एव कृतः, तत्किमनेन प्रकरणेन? विक्षिप्तस्य सङ्ग्रहार्थमिति चेन्न । सङ्ग्रहस्यापि तत्त्वसङ्ख्याने कृतत्वात् । सत्यम्—तथापि तत्त्वसङ्ख्यानोक्तार्थे साक्षित्वेन भगवत्प्रणीततत्त्वविवेकगतवाक्यान्येतानि आचार्यैरुदाहृतानीत्यदोषः । तत्रादौ तावत् सामान्येन तत्त्वस्य विभागोद्देशं करोति—

स्वतन्त्रं परतन्त्रञ्च प्रमेयं द्विविधं मतम् ।

अत्र प्रमेयमित्यनुवादेनैव तत्त्वस्य सामान्यलक्षणञ्चोक्तम्, अनारोपितं हि तत्त्वम् ।

**End:**

यद्यपि केवलस्यास्य ज्ञानं न परमपुरुषार्थोपयोगि ; तथापि परमपुरुषार्थतयावगतं भवत्येव मोक्षसाधनमित्येतत् द्वे विद्ये वेदितव्ये इत्यादिश्रुतिसिद्धमिति हिशब्देन सूचयति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



करतलमिलितामलकप्रख्यं यस्याखिलं विश्वम् ।
कमलापरिबृढममलं वन्दे तं वन्द्यपादाब्जम् ॥

**Colophon:**

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिततत्त्वविवेकविवरणं जयतीर्थभिक्षुविरचितं समाप्तम् ॥

---

## No. 4787. तत्त्वविवेकव्याख्या.

## TATTVAVIVĒKAVYĀKHYĀ.

Substance, palm-lea'. Size, $14\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 19. Lines, 5 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Begins on fol. 11*a*. The other works herein are Tattvasaṅkhyānavivaraṇa 1*a*, Māyāvādakhaṇḍanavivaraṇa 22*a*, Prapañcamithyātvānumānakhaṇḍanapañcikā 32*a*.

Complete.

Same work as the above.

---

## No. 4788. तत्त्वसङ्ख्यानम्.

## TATTVASAṄKHYĀNAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 10*a* of the MS. described under No. 4781.

A brief enumeration of the Tattvas or categories as accepted by the Dvaita-Vēdānta, with a concise description of their nature; by Ānandatīrtha.

Complete.

**Beginning:**

स्वतन्त्रमस्वतन्त्रश्च द्विविधं तत्त्वमिष्यते ।
स्वतन्त्रो भगवान्विष्णुः भावाभावौ द्विधेतरत् ॥
प्राक्प्रध्वंससदात्वेन त्रिविधोऽभाव इष्यते ।
चेतनाचेतनत्वेन भावोऽपि द्विविधो मतः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

असंस्पृष्टश्च संस्पृष्टमसंस्पृष्टं महानहम् ।
बुद्धिर्मनः खानि दश मात्रा भूतानि पञ्च च ॥
संस्पृष्टमण्डं तद्भश्च समस्तं सम्प्रकीर्तितम् ।
सृष्टिस्स्थितिस्संहृतिश्च नियमोऽज्ञानबोधने ॥
बन्धो मोक्षस्सुखं दुःखमावृतिर्ज्योतिरेव च ।
विष्णुनास्य समस्तस्य समासव्यासयोगतः ॥

**Colophon:**

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं तत्त्वसङ्ख्यानं समाप्तम् ॥

---

No. **4789.** तत्त्वसङ्ख्यानविवरणम्.

TATTVASAṄKHYĀNAVIVARAṆAM.

Pages, 16. Lines, 7 on a page.

Begins on fol. 41*a* of the MS. described under No. 4782.

Complete.

A commentary on the Tattvasaṅkhyāna of Ānandatīrtha; by Jayatīrtha.

**Beginning:**

लक्ष्मीपतेः पदाम्भोजयुगं नत्वा गुरोरपि ।
करिष्ये तत्त्वसङ्ख्यानव्याख्यानं नातिविस्तरम् ॥

मुमुक्षुणा खलु परमात्मा जगदुदयादिनिमित्तत्वेन अवश्यमवगन्तव्य इति सकलसच्छास्त्राणामविप्रतिपन्नोऽर्थः । इदश्चावान्तरानेकभेदभिन्नस्य जगतो विज्ञानमवेक्षत इति जगदपि तथा अवगन्तव्यम् । तदिदं प्रधानाङ्गभूतं तत्त्वद्वयं शास्त्रे विक्षिप्य प्रतिपादितम् । शिष्यहिततया सङ्गृह्य प्रतिपादयितुं प्रकरणमिदमारभते भगवानाचार्यः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End :**

सर्वथा स्वरूपस्वभावस्य तदधीनाविति तत्र सिध्यति नियमौ सर्वस्य सृष्टिसंहृती नित्या . . . . . . प्यस्यानित्यस्य च अज्ञानं भावरूपं दुःखं स्पृष्टस्य च ज्ञानाभावस्तु सर्वस्य बोधनं चेतनस्य । सुखं प्राप्त-तमसो विना । दुःखं दुस्पृष्टं विनेत्यादि द्रष्टव्यम् । पदार्थानां सृष्टा-न्यतोऽपि प्रतीयते । अत एवेत्युक्तम् । सकलसत्तादेस्तदधीनत्वात् तत्तद्वस्तु निमित्तमात्रमेव । स्वातन्त्र्येण तु विष्णुरेवास्य स्वर इति ॥

पद्मापद्मासनानन्तप्रभृतीदं यदिच्छया ।
सत्तादि लभते देवः प्रीयतां श्रीपतिस्स मे ॥

**Colophon :**

इति श्रीमदानन्दतीर्थभगवत्पादविरचिततत्त्वसङ्ख्यानविवरणं श्रीमज्ज यतीर्थार्यविरचितं समाप्तम् ॥

---

## No. 4790. तत्त्वसङ्ख्यानविवरणम्.

## TATTVASAṄKHYĀNAVIVARAṆAM.

Pages, 20. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 4787.

Complete.

Same work as the above.

---

## No. 4791. तत्त्वोद्योतः.

## TATTVŌDYŌTAḤ.

Pages, 9. Lines, 8 on a page.

Begins on fol. 12*a* of the MS. described under No. 4781.

Complete.

A short essay in support of the view that the individual soul, even after final emancipation, continues to be distinct as an entity from Viṣṇu the Supreme Soul ; by Ānandatīrtha.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

सर्वत्राखिलसच्छक्तिः स्वतन्त्रोऽशेषदर्शनः ।
नित्यातादृशचिच्चेत्ययन्तेष्टो नो रमागतिः ॥

विमतो भिन्नो मुक्तत्वाद्यादित्थं तत्तथा यथा सम्प्रतिपन्नः । न च भेदविकल्पो युज्यते । अनिर्वचनीयस्य सर्वत्राप्रसिद्धत्वादेव शशविषाणं गोविषाणं वोच्यत इतिवत् ।

**End :**

नचैकजीवाज्ञानपरिकल्पितास्समस्ता इत्यत्र किञ्चिन्मानम्; अतो मुक्तेभ्योऽप्यन्य एव समस्तगुणपरिपूर्णो भगवान् विष्णुरिति सिद्धम् ॥

ब्रह्मेशानादिभिर्देवैः यत्प्राप्तुं नैव शक्यते ।
य(त)द्यत्स्वभावकैवल्यं स भवान् केवलो हरे ॥

परो मात्रया तन्वा वृधान । न ते महित्वमन्वश्नुवन्ति ।

सत्यचिच्चेत्यपतये मुक्तामुक्तोत्तमाय ते ।
नमो नारायणायार्यबृन्दवन्दितपद्द्वय ॥

आनन्दतीर्थपुंसिंहो मायावादिदितेः सुतान् ।
विदार्य युक्तिनखरैरप्रतीपो विभासते ॥

पलायध्वं पलायध्वं त्वरया मायिदानवाः ।
सर्वज्ञहरिरायाति तर्कागमदरारिभृत् ॥

द्रवत द्रवताशु मायिनः प्रविशध्वमतन्द्रिता गुहाः ।
कमलारमणाम्बराश्रयः समुदेत्यखिलज्ञभास्करः ॥

नृहरिस्सकलज्ञनामकः समुपैति हि मायिदानवान् ।
प्रपलायनमत्र तत्क्षमं त्वरया वो वसतिर्गुहासु च ॥

जयत्यानन्दतीर्थेष्टदेवता नरकेसरी ।
विपाटिताज्ञानतमःकवाटात्युरुहुङ्कृतः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जयत्यमितपौरुषः स्वजनचे(ते)ष्टचिन्तामणिः ।
अजेशमुखवन्दितो गुणगणार्णवः श्रीपतिः ॥
सर्वज्ञसन्मुनीन्द्रोच्चसन्मनःपङ्कजालयः ।
अजितो जयति श्रीशो रमाबाहुलताश्रयः ॥

**Colophon:**

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितः तत्त्वोद्योतः समाप्तः ॥

---

No. **4792.** **तत्त्वोद्योतविवरणम्.**

TATTVŌDYŌTAVIVARAṆAM.

Pages, 54. Lines, 6 on a page.

Begins on fol. 22*a* of the MS. described under No. 4783. Complete.

A commentary on the Tattvōdyōta of Ānandatīrtha; by Jayatīrtha.

**Beginning:**

विश्वोत्पत्तिस्थितिध्वंसकारणं रमणं श्रियः ।
अभिवन्द्य यथाबोधं तत्त्वोद्योतं विवृण्महे ॥

इहाविद्यातिमिरनिरन्तरे संसारकान्तारे परिखिन्नानामल्पास्थिरसुखखद्योतिकासु द्योतमानास्वपि मनःप्रसादमनासादयतामधिकारिणामनन्तानन्दनिदानस्य परमपुरुषतत्त्वोद्भूतस्य सिद्धये समीहमानो भगवान् आचार्यसूर्यः स्वयमन्तरायविधुरोऽपि निरन्तरायं प्रारिप्सितपरिसमाप्त्यादेः अङ्गमिष्टदेवताभिपूजनं शिष्यानध्यापयितुं प्रकरणादौ निबध्नाति—

सर्वत्राखिलसच्छक्तिः स्वतन्त्रोऽशेषदर्शनः ।
नित्यातादृशचिच्चेत्ययन्तेष्टो नो रमापतिः ॥

देवतास्तुतिमात्रपरत्वादस्य श्लोकस्य क्रियाभिसम्बन्धाभावो न दोषाय । किन्तु रमापतिः सर्वत्राखिलसच्छक्तिः इत्यादिपदैरेव योजना । यद्य(प्य)त्र न विशेषणानां सङ्गत्यपेक्षा, विशेष्यप्रशंसामात्रपरत्वेन निराकाङ्क्षत्वात् ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

द्रवत द्रवताशु मायिनः प्रविशध्वमतन्द्रिता गुहाः ।
कमलारमणाम्बराश्रयस्समुदेत्याखिलज्ञभास्करः ॥

पूर्ववद्विवेचनम् । मायिनश्चोराः मायावादिनश्च । समुदेति; यत इति शेषः ।

नृहरिः सकलज्ञनामकः समुपैति हि मायिदानवान् ।
प्रपलायनमत्र तत्क्षमं त्वरया वो वसतिर्गुहासु च ॥

हिशब्दो हेतौ ।

जयत्यानन्दतीर्थेष्टदेवता नरकेसरी ।
विपाटिताज्ञानतमःकवाटात्युरुहुङ्कृतः ॥

जयति उत्कृष्टो वर्तते । अज्ञानं तम इव अज्ञानतमः प्रकाशप्रतिबन्धकत्वात् तत्कवाटमिव अज्ञानतमःकवाटं परमपुरुषाराधनधामप्रवेशप्रतिबन्धकत्वात् विपाटितमज्ञानतमःकवाटं येन तत् विपाटिताज्ञानतमःकवाटम् । उरु हुङ्कृतं हुङ्कारो यस्यासौ तथोक्तः । अत्राज्ञानं मायामतमेवाभिमतम्; प्रसङ्गात् ।

जयत्यमितपौरुषः स्वजनतेष्टचिन्तामणिः ।
अशेष(जेश)मुखवन्दितो गुणगणार्णवः श्रीपतिः ॥

जनता जनसमूहः ।

अजितो जयति . . . . रमाबाहुलताश्रयः ॥
श्रीमदानन्दतीर्थार्यमनःकमलमन्दिरः ।
कमलाश्लेषसंसक्तः प्रीयतां नः परः पुमान् ॥

**Colophon:**

इति श्रीमदानन्दतीर्थभगवत्पादविरचिततत्त्वोद्योतटीका जयतीर्थरचिता समाप्ता ॥

श्रीपूर्णप्रज्ञरचिततत्त्वोद्योतस्य पञ्चिका ।
श्रीमज्जयार्यरचिता लिखिता प्रीतये हरेः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीवैकुण्ठेन लिखितादस्मात्प्रकरणाद्धरिः ।
प्रीयतां कमलानाथो ज्ञानभक्त्यादिसिद्धये ॥

---

## No. 4793. न्यायकारिकावली.

## NYĀYAKĀRIKĀVALĪ.

Substance, palm-leaf. Size, 15¼ × 1⅜ inches. Pages, 18. Lines, 6 on a page. Character, Nandināgarī. Condition, much injured. Appearance, old.

Begins on fol. 52*a*. The other works herein are Nyāyamuktāvalī 1*a*, Brahmamīmāṁsādhikaraṇārthasaṅgraha 61*a*, Vādāvalī 65*a*, Praṇavadarpaṇakhaṇḍana 79*a*, Nyāyāmṛta 92*a*.

From the 3rd Pāda of the 1st Adhyāya to the 1st Pāda of the 2nd Adhyāya.

A work in verse giving a summary of the various logical arguments adopted in the Madhva-Bhāṣya.

By Gōpālakṛṣṇācārya, son of Vēṅ(kaṭa)kṛṣṇācārya.

**Beginning:**

वाक्यदोषबलात्पूर्वं शूद्रशब्दस्तु यौगिकः ।
यौगिकत्वे तु नास्त्यत्र वज्रशब्दस्य साधकम् ॥
इत्यत्र पूर्वपक्षस्य प्रवृत्तेरस्ति सङ्गतिः ।
काठके श्रुय्य(श्रूय)ते वज्रमुत्पतन्तच्छतक्रतोः ॥

* * * *

सिद्धान्तस्तु हरिस्सर्वजगच्चेष्ट(यि)ता श्रुतेः ।
विद्यते सा च नान्यस्य को ह्येवान्यादिति श्रुतेः ॥

**End:**

स तज्जिहासुः तप्रे(त्प्रे)त्य[सुत]तत्त्यागे तत्परिग्रहे ।
शक्तस्तद्दानतद्वांश्च कथं स्यादन्यथा श्रुतिः ॥
गुणाः श्रुता इत्यादिश्च विरुद्धता स्वतन्त्रता ।
सोपाधिश्चेतनत्वानुमानतः पूर्णसद्गुणः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति श्रीमद्वेदकृष्णाचार्यसुतश्रीमद्गोपालकृष्णाचार्यविरचितायां श्रीमद्ब्रह्म-मीमांसान्यायसङ्ग्रहकारिकावल्यां द्वितीयाध्यायस्य प्रथमः पादः ॥

---

## No. 4794. न्यायमुक्तावली.

## NYĀYAMUKTĀVALĪ.

**Pages**, 102. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 4793.

From the second Pāda of the first Adhyāya to the second Pāda of the second Adhyāya: breaks off in the third Pāda of the second Adhyāya.

An exposition of Dvaita-Vēdānta as based on the Brahmasūtra-bhāṣya of Ānandatīrtha.

By Rāghavēndrayati, a disciple of Sudhīndra.

**Beginning**:

(सर्वत्र प्रसिद्धोपदेशात् । एतमेव ब्रह्मे)त्याचक्षत इति ब्रह्मशब्दस्य तदेव ब्रह्म परमं कवीनामित्यादौ विष्णौ प्रसिद्धत्वाज्जात्यादेर्ब्रह्मपदामुख्यार्थस्य विष्णौ ब्रह्मपदमुख्यार्थस्य तत्त्वम्; अत एवेत्यवधारणायोगात्तद्बलेन ब्रह्मपदेनात्र मुख्यार्थस्य ग्राह्यत्वात् . . . .

अग्न्यादिविद्यादिभिर्ब्रह्मोपासनयाग्न्यादावेव विष्णोर्व्यक्तत्वानुस्मरणी. यत्व[रु]प्राप्यत्वरूपनिमित्तैर्विद्यादिव्यवस्थोपपत्तेर्बाधकाभावाद्वैश्वानरो विष्णुरेवेति । फले तु पूर्वाक्षेपसमाधी ॥

**Colophon:**

इति श्रीसर्वतन्त्रस्वतन्त्रसुधीन्द्रगुरुपादशिष्यराघवेन्द्रयतिकृतायां न्यायमुक्तावल्यामाद्ये द्वितीयः पादः ॥

**End:**

स्वातन्त्र्येण हेतुनानुत्पत्त्युक्तावपि लीलया देहेन[:] प्रादुर्भावस्य चोक्त्या तमसि विलीनः प्रकृतिं पुरुषं कालश्चानुपश्यति । नै[म]नं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पश्यति कश्चनेति श्रुत्यन्तरेण चाभिहितार्थत्वादन्यथानुपपत्त्या नित्यानां स नित्यो निर्गुणस्स नित्यो विभुरित्यादिबहुनित्यत्वश्रुतिविरोधादिति युक्तेस्तु श्रुतिविरोधित्वेनामानत्वादिति । फले तु ब्रह्मणो लये स्रष्टृत्वाद्ययोगेन तदाक्षेपसमाधी । ज्ञोऽत एव । एवं सूचीकटाहन्यायेनाल्पमधिभू(तम)-धिदैवविचारं कृत्वा.

---

## No. 4795. न्यायाध्वदीपिका.

## NYĀYĀDHVADĪPIKĀ.

**Pages, 32.** Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 4646.

Incomplete.

An elementary work similar to the one described under No. 4793, giving a summary of the various logical arguments adopted in the Madhva-Bhāṣya; by Vijayīndra.

**Beginning:**

रक्षोनाथस्य वक्षोभुवि विपुलनखैर्वज्रकल्पैः कृतायां
रक्तस्रोद(त)स्सरस्यां प्रतिफलितमिदं स्वं वपुर्वीक्षमाणः ।
स्मृत्वा (तं) भार्गवाख्यं रघुवरमपि तं रावणं तत्प्रसक्त्या
चैवं रुष्टः प्रहृष्टः प्रदिशतु हृदि शं श्रीनृसिंहोऽनृशंसः ॥

उर्व्यां सङ्क(क)र्णतां याति म(य)द्गुणाकर्णने तर(रत)ः ।
अर्णवं गुणरत्नानां पूर्णबोधं तमाश्रये ॥

(सा)यस्य वाक्कामधेनुः कामितार्थान् प्रयच्छति ।
सेवि(वे)तं जययोगीन्द्रं कामबाणच्छिदं सताम् ॥

श्रीमन्मध्वमताब्धीन्दुं दुर्वादिफणिपक्षिपम् ।
ब्रह्मण्याख्यमुनेः शिष्यं व्यासदेशिकमाश्रये ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मूकोऽपि वावदूकेन्द्रो जायते यदनुग्रहात् ।
श्रीसुरेन्द्रगुरोस्तस्य पादं नत्वा चिरं भजे ॥

न्यायाध्वगामिनामध्वदर्शनाद्गतिसिद्धये ।
तन्वधी(न्यते) विजयीन्द्रेण तन्वी न्यायाध्वदीपिका ॥

ग्रन्थग्रन्थिरहो कस्य नेशयेत्सूक्ष्मबुद्धयः ।
तेषां कृते जयीन्द्रस्य कृतिरेषा प्रवर्तते ॥

नित्यं ये पदवाक्यमानसरणीसंशीलनालङ्कृताः
तेषामेव करोति या प्रतिपदं सन्तोषमाकर्णनात् ।
या चानेकविधेयषट्पदततेः सम्फुल्लमल्ली सदा
सैषा वाग्विजयीन्द्रसंयमिमणेः न्यायाध्वगैः सेव्यताम् ॥

यद्यपि शास्त्रदीपिकादिरूपा दीपिका न्यायाध्वगामिनां गतिसिद्धये तदध्वदर्शनसाधनरूपा पूर्वमेव प्रवृत्तास्ति ; तथापि न तया बालाबालसाधारणं गतिसाधनं दर्शनं सिध्यति ; शास्त्रदीपिकादिप्रौढप्रकाशत्वेन बालदृष्ट्यभिभावकत्वात् ।

**End:**

किन्तु यस्यात्मा शरीरम् । यस्य पृथिवी शरीरम् । जगत्सर्वं शरीरन्ते । तानि सर्वाणि तद्वपुः । तत्सर्वं वै हरेस्तनुः । इत्यादिभिः जगच्छरीरशरीरीभावप्रतिपादनात् । देवो मनुष्यो बालो युवा एकश्शरीरीत्यादिवत् विशिष्टैक्यनिबन्धनम । नेह नानास्ति किञ्चन । मृत्योस्स मृत्युमाप्नोति । य इह नानेव पश्यति । इत्यादिभेदनिषेधस्तु ब्रह्मानधिष्ठितस्वतन्त्रवस्तुभेदनिषेधपरः । ननु च प्रत्यक्षसिद्धं भेदं न प्रतिपादयन्ति वेदान्ताः । अप्राप्त एव शास्त्रस्यार्थवत्त्वात् ; तस्मादद्वैतमेव वेदान्तवेद्यमिति चेन्न—जीवेश्वरभेदस्य जीवानां परस्परं भेदस्य च प्रत्यक्षाद्य(दि)विषयत्वात् । यदि कस्य चिद्भेदस्य प्रत्यक्षसिद्धत्वमात्रेण प्रत्यक्षाद्य(दि)विषय.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4796. न्यायामृतम्.

## NYĀYĀMṚTAM.

Substance, palm-leaf. Size, 18 × 1½ inches. Pages, 180. Lines, 10 on a page. Character, Nandināgarī. Condition, slightly injured. Appearance, old.

Paricchēdas 1 to 4 complete.

A dissertation in support of Dvaita-Vēdānta; by Vyāsayati, a disciple of Brahmaṇyatīrtha.

It criticises unfavourably the views of the Advaita-school.

**Beginning:**

कालप्रापकेण पूर्वेणाग्रपदेन तदैक्षत नामरूपे व्याकरोदितीक्षणनामरूपात्मकप्रपञ्चप्रापकेणोत्तरेण च द्वैतवाक्येन विरोधः । प्रामाण्यस्य स्वतस्त्वेनाद्वैतवाक्येनाद्वैतस्यैव द्वैतवाक्येनैव द्वैतस्य सर्वसिद्धेः । यदि वा विरोधाद्वैतवाक्यस्य लक्षणादिना द्वैतपरत्वं वा अतात्त्विकाविषयत्वेन व्यवस्था वा, तद्विरोधेनाप्रामाण्यं वा, तदा विपरीतं किं न स्यात् ।

**End:**

तस्मात्तरतमभावापन्नमुक्तामुक्तब्रह्मरुद्रादिनियामको भगवान् श्रीपतिः सर्वोत्तम इति सिद्धम् । मुक्तावपि ब्रह्मादीनां तारतम्यसमर्थनम् ॥

नमो निरस्तदोषाय समस्तगुणराशये ।
विमलानन्ददेहाय कमलापतये सदा ॥
मत्प्रेरकेण हरिणा या पूजा स्वस्य कारिता ।
वाक्यज(स्व)रूपा लक्ष्मीशस्तया प्रीणातु केशवः ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्याणां ब्रह्मण्यतीर्थपूज्यपादानां शिष्येण श्रीमद्व्यासयतिना संगृहीते न्यायामृते चतुर्थः परिच्छेदः ॥

समाप्तं श्रीमन्न्यायामृतम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्यायामृतं निस्सृतमादिदेवगुणार्णवस्यैव सुसाधकं परम् ।
सद्व्यासतीर्थैर्लिखितं मयैव तद्दासभृत्येन सुपुस्तकेऽस्मिन् ॥
सुब्बाभट्टस्य पुत्रेण नाम्ना नारायणेति(न) च ।
अश्वीजमासे रक्ताक्षौ पञ्चम्यां वत्सरे मया ॥
काञ्चीस्थेन . . . . . . . . अध्ययनशीलिना ।
न्यायामृतं तु लिखितं प्रीतो भवतु केशवः ॥

---

## No. 4797. न्यायामृतम्.

## NYĀYĀMṚTAM.

**Pages**, 10. Lines, 6 on a page.

**Begins** on fol. 92*a* of the MS described under No. 4793.

Mithyātvabhaṅganirūpaṇa complete.

**Same work as the above.**

---

## No. 4798. प्रणवदर्पणखण्डनम्.

## PRAṆAVADARPAṆAKHAṆḌANAM.

**Pages**, 18. Lines, 6 on a page.

**Begins** on fol. 79*a* of the MS. described under No. 4793.

Complete.

An unfavourable criticism of the Praṇavadarpaṇa of Śrīnivāsācārya, wherein the Praṇava-Ōm-is not considered to form an essential part of the first Sūtra in the Vēdāntasūtras.

By Vijayīndratīrtha.

**Beginning:**

घा(द्यो)तयन्तं दश दिशो भासा सूर्यसमाज्ञया ।
बुद्धिमन्तं दयावन्तं हनूमन्तमुपास्महे ॥
तात्पर्यचन्द्रिकायुक्तं न्यायामृतकलानिधिम् ।
तर्कोरुताण्डवकृतं व्यासतीर्थगुरुं भजे ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथातो ब्रह्मजिज्ञासेति न्यायग्रथनात्मकब्रह्ममीमांसाशास्त्रस्यादिमसूत्रस्योङ्कार एतत्सूत्रावयवो न वेति विप्रतिपत्तिः । नेत्यन्ये ; भवत्येवेति व्यासमतानुसारिणः । तत्रान्येषामयमभिसन्धिः—

मेयत्वसिद्धेर्मानाधीनत्वादोङ्कारस्य एतत्सूत्रावयवत्वे मानं वक्तव्यम् ; तच्च न तावत्प्रत्यक्षम् ; असम्भवात् । नापि विमत ओङ्कार एतत्सूत्रावयवः शिष्टैस्तदादौ नियमेन पठ्यमानत्वात् प्रथमसूत्रस्थाथशब्दवत्—इत्यनुमानम् ; जन्मादिसूत्रोक्तोङ्कारे व्यभिचारात् ।

**End :**

उक्तरीत्या ओङ्कारस्यासंहिततया निर्देशे विशेषणासिद्धेश्च । माङ्गलिकत्वावच्छिन्नसाध्यव्यापकत्वस्य द्वितीयेोपाधेर्विवक्षिततया न कर्तव्येति पदे साध्याव्यापकता शङ्क्या ; कर्तव्येति पदेऽध्याहृते व्यभिचारपरिहाराय माङ्गलिकत्वे सतीति ; अदृष्टार्थत्वे सतीति तु स्वरूपकथनार्थमिति द्रष्टव्यम । तस्मादोङ्कारस्सूत्रावयव इति दिगित्याहुः ॥

---

## No. 4799. प्रपञ्चमिथ्यात्वानुमानखण्डनम्.

## PRAPAÑCAMITHYĀTVĀNUMĀNAKHAṆḌANAM.

Page, 1. Lines, 7 on a page

Begins on fol. 12*a* of the MS. described under No. 4781.

Complete.

An unfavourable criticism of the view of Advaita-Vēdāntins that the phenomenal world is unreal.

By Ānandatīrtha.

**Beginning :**

विमतं मिथ्या दृश्यत्वाद्यदित्थं तत्तथा यथा सम्प्रतिपन्नम् इत्युक्ते जगतोऽभावादाश्रयासिद्धः पक्षः । अनिर्वचनीयासिद्धेः अप्रतिसिद्धविशे-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



षणः । सदसद्वैलक्षण्ये मिथ्यात्वे सिद्धसाधनता । दृश्यत्वाभावादसिद्धो हेतुः । . . . . . प्रत्यक्षादिविरुद्धत्वात् विश्वं सत्यमित्यादिवाक्यविरुद्धत्वाच्च कालात्ययापदिष्टः ॥

**End :**

साध्यधर्मविशिष्टः पक्षः । साध्यसमानधर्मविशिष्टः सपक्षः । साध्यविपरीतधर्मविशिष्टो विपक्षः । पक्षवचनं प्रतिज्ञा । लिङ्गं हेतुः । निदर्शनं दृष्टान्तः ॥

यो दृश्यते सदानन्दनित्यव्यक्तचिदात्मना ।
निर्दोषाखिलकल्याणगुणं वन्दे रमापतिम् ॥

**Colophon :**

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं प्रपञ्चमिथ्यात्वानुमानखण्डनं समाप्तम् ॥

---

No. **4800.** प्रपञ्चमिथ्यात्वानुमानखण्डनव्याख्या—पञ्चिका.

PRAPAÑCAMITHYĀTVĀNUMĀNAKHAṆḌANA-VYĀKHYĀ : PAÑCIKĀ.

**Pages**, 29. Lines, 7 on a page.

Begins on fol. 80*a* of the MS. described under No. 4782.

Complete.

A commentary on the Prapañcamithyātvānumānakhaṇḍana of Ānandatīrtha ; by Jayatīrtha.

**Beginning :**

नत्वा विश्वोदयस्थेमक्षयहेतुं पतिं श्रियः ।
कुर्मः प्रपञ्चमिथ्यात्वमानखण्डनपञ्चिकाम् ॥

जन्माद्यस्य यत इति भगवता सूत्रकारेण जगदुदयादिनिमित्तकारणत्वं परस्य ब्रह्मणो लक्षणमभिहितम् । न च जगत्सत्तामन्तरेण तद्वास्तवं भवति । सापि न परोदीरितप्रपञ्चमिथ्यात्वप्रमाणस्याभासताद्युत्पाद-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नेन विनोपपद्यत इति तदर्थमिदं प्रकरणमारभते भगवानाचार्यः । ननु कथं स्वपक्षसाधनेन विना निर्णयः? सत्यम्—तथापि शास्त्रैकदेशसम्बन्धित्वात्प्रकरणस्य न दोषः ।

**End:**

निर्दोषानन्दनित्याभिव्यक्तज्ञानात्मकत्वेनाजडत्वात् तदाह—सदानन्देति । इत्थम्भूतलक्षणे* तृतीया । न केवलं निर्दोषचिदानन्दात्मकः; नाप्यभेदाद्गुणगुणिभावाभाव इत्युक्तम् । निर्दोषे कल्याणत्वं परिपूर्णत्वादिना रमापतिरित्यनेन भगवता(ति) चाभिवन्दि(न्द्य)ता भवति ॥

उत्पत्तिस्थितिभङ्गं विश्वं यस्मात् प्र[ति]पद्यते पुरुषात् ।
स जयति जगतामन्तर्यामी स्वामी रमानाथः ॥

**Colophon:**

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य प्रपञ्चमिथ्यात्वानुमानखण्डन(स्य)विवरणं जयतीर्थभिक्षुविरचितं सम्पूर्णम् ॥

---

## No. 4801. प्रपञ्चमिथ्यात्वानुमानखण्डनव्याख्या—पञ्चिका.

## PRAPAÑCAMITHYĀTVĀNUMĀNAKHAṆḌANA-VYĀKHYĀ: PAÑCIKĀ.

**Pages**, 11. Lines, 10 on a page.

Begins on fol. 17*a* of the MS. described under No. 4783.

Complete.

Same work as the above.

---

## No. 4802. प्रपञ्चमिथ्यात्वानुमानखण्डनव्याख्या—पञ्चिका.

## PRAPAÑCAMITHYĀTVĀNUMĀNAKHAṆḌANA-VYĀKHYĀ: PAÑCIKĀ.

**Pages**, 33. Lines, 5 on a page.

Begins on fol. 32*a* of the MS. described under No. 4787.

Complete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **4803.** प्रमाणपद्धतिः.

PRAMĀṆAPADDHATIḤ.

Pages, 79. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 4782.

Complete.

An easy introduction to the Pramāṇalakṣaṇa of Ānandatīrtha; by Jayatīrtha.

**Beginning:**

प्रणम्य चरणाम्भोजयुगळं कमलापतेः ।
प्रमाणपद्धतिं कुर्मो बालानां बोधसिद्धये ॥

यद्यपि भगवत्पादैरेव प्रमाणलक्षणादिकमभिहितं, तथापि गम्भीरया वाचा वर्णितम्, न मन्दैः सुखेन शक्यते बोद्धुम्; तदर्थमिदं प्रकरणमारभ्यते । यो धर्मो लक्ष्ये व्याप्य वर्तते, न वर्तते चान्यत्र, स धर्मो लक्षणमित्युच्यते यथा—गोः सास्नादिमत्त्वम् । तद्धि गोषु सर्वत्रास्ति नास्ति चागोषु । अन्यथाभूतन्त्वलक्षणम् ।

**End:**

वासुदेवैकशरणस्य तद्विषयाणि श्रवणमनननिदिध्यासनानि आदरनैरन्तर्याभ्यां बहुकालमनुष्ठितवतो भगवत्साक्षात्कारे सति उद्रिक्तया तद्भक्त्या भगवत्प्रसादादशेषानिष्टनिवृत्तिविशिष्टानन्दादिस्वरूपाविर्भावलक्षणा मुक्तिर्भवतीति ॥

**Colophon:**

जयतीर्थमुनीन्द्रेण बालबोधाय निर्मिता ।
प्रमाणपद्धतिर्भूयात्प्रीत्यै माधवमध्वयोः ॥

इति श्रीमज्जयतीर्थमुनीन्द्रेण विरचितायां प्रमाणपद्धतौ तृतीयं प्रकरणं समाप्तम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4804. प्रमाणपद्धतिः.
## PRAMĀṆAPADDHATIḤ.

Substance, palm-leaf. Size, 13¼ × 1½ inches. Pages, 36. Lines, 8 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

The first Prakaraṇa complete, the second incomplete.

Same work as the above.

---

## No. 4805. प्रमाणपद्धतिव्याख्या.
## PRAMĀṆAPADDHATIVYĀKHYĀ.

Substance, palm-leaf. Size, 15⅞ × 1½ inches. Pages, 120. Lines, 8 on a page. Character, Nandināgarī. Condition, slightly injured. Appearance, old.

Anumāna, Upamāna, and Śabda, complete.

Some leaves are wanting in the beginning.

A commentary on the Pramaṇapaddhati of Jayatīrtha; by Nārāyaṇa, son of Viṭṭhalācārya.

**Beginning:**

(अ)नुमाने विरोधमपि द्वेधा विभज्योद्दिशति—समबलेति । येनानुमानेन यत्साध्यं साधितं तेनानुमानेनैव तद्विपरीतसाधने तेनैवानुमानेन विरोध इत्यर्थः । अन्यदनुमानमनुमानान्तरं तेन चेत्यर्थः । एवं प्रतिज्ञाविरोधावान्तरभेदस्य प्रमाणविरोधस्य प्रभेदं निगद्य स्ववचनविरोधेऽपसिद्धान्तविरोधप्रतिज्ञाविरोधाख्यनिग्रहस्थानयोरन्तर्भावबोधनाय प्रतिज्ञाविरोधावान्तरभेदत्वेनोक्तम् । स्ववचनविरोधं द्वेधा विभज्योद्दिशति—स्ववचनविरोध इति ।

* * * *

दुष्टत्वकल्पनेऽतिप्रसङ्गाद्धकृद्दोष एव न त्वर्थदोष इत्याशयेनाह—तथापीति । तस्मादुदाहरणात्तादवस्थ्यपा(सा)र्थक्यं युक्तमेवेति भावः ॥

प्रमाणपद्धतेस्सम्यक् परिच्छेदो द्वितीयकः ।
नारायणेन व्याख्यातो विट्ठलाचार्यजन्मना ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति श्रीमज्जयतीर्थपूज्यचरणविरचितप्रमाणपद्धतिव्याख्याने विट्ठलाचार्यतनुजेन नारायणेन विरचिते अनुमानपरिच्छेदस्समाप्तः ॥

**End:**

अशेषेति । अवशिष्टेन प्रकरणस्य मुक्तिं प्रति परम्परया साधनोपपादनम् । अत्र सर्वत्र प्रमाणान्यत्रोदाहरणानि द्रष्टव्यानीति । एवं समापित(प्र)करणः श्रीमज्जयतीर्थमुनिः स्वकृतप्रकरणे(णमि)ष्टदेवताया गुरोश्च समर्पयति—जयतीर्थेति । प्रमाणपद्धतिः प्रमाणपद्धत्याख्यो ग्रन्थः माधवो लक्ष्मीपतिः नारायणः मध्वः श्रीमदानन्दतीर्थाचार्यवर्यः तयोः प्रीत्यै भूयादिति अशेषमतिमङ्गलम् ॥

प्रमाणपद्धतेश्शब्दपरिच्छेदो यथामति ।
नारायणेन व्याख्यातो विट्ठलाचार्यसूनुना ॥
श्रियःपतिं देवमनन्तमाद्यं सर्वज्ञमानन्दनिधिं परेशम् ।
अशेषदोषोज्झितमात्मतन्त्रं श्रीवासुदेवं प्रणतोऽस्मि नित्यम् ॥
श्रीमज्जयार्यमुनिवर्यमहं प्रपद्ये श्रीमध्वशास्त्राब्धिसुमन्थनाद्धि ।
सुयुक्तिमन्त्राज्जनितां सुधां यो ददौ कृपालुर्वरभूसुरेभ्यः ॥
अगाधबा(बो)धाप्तसुपूर्णविद्या भवान्तरे श्रीहरिसेवया ये ।
श्रीमन्नृसिंहार्यवरान् गुरो(रूं)श्च गुरोर्गुरुं मे प्रणतोऽस्मि तान्सदा ॥
यद्यप्यार्यैः कृताष्टीका वर्तन्ते पद्धतेश्शुभाः ॥
व्याख्यानं सुखबोधाय कृतं तेषामनुग्रहात् ।
तैश्च येऽर्थाः प्रकटिताः त एवात्र प्रदर्शिताः ॥
कचिद्विवरणं सम्यग्व्यक्तानां तैर्यथामति ।
वाक्यानाञ्च कृता व्याख्या यथाशक्ति यथामति ॥
प्रीयतां गुरुभिः पूज्यो वासवीनन्दनात्मकः ।
नवनीतकरः कृष्णो भैष्मीसत्यासमन्वितः ॥

युवनामसंवत्सर आश्विजबहुलपञ्चमी यल्पु वेङ्कट राम बरदे ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4806. प्रमाणलक्षणम्.

## PRAMĀṆALAKṢAṆAM.

Pages, 4. Lines, 7 on a page.

Begins on fol. 8*a* of the MS. described under No. 4801.

Complete.

A treatise on the nature of true knowledge and on the authoritative means of acquiring it; by Ānandatīrtha.

**Beginning:**

अशेषगुरुमीशेशं नारायणमनामयम् ।
सम्प्रणम्य प्रवक्ष्यामि प्रमाणानां स्वलक्षणम् ॥

यथार्थं प्रमाणम् । तद्द्विविधम्—केवलमनुप्रमाणञ्च । तत्र यथार्थज्ञानं केवलम् । तत्साधनमनुप्रमाणम् । केवलं चतुर्विधम्—ईशलक्ष्मीयोग्ययोगिभेदेन । तत्र पूर्वद्वयमनादि नित्यम् ।

**End:**

स्मृतिप्रमाणद्वैविध्यमात्रकल्पने मिथ्याज्ञानादेः निरासादनुभवविरोधः । तदनुभवाभाव इत्युक्ते अनुभवः स्मृतिश्च नास्तीति उक्ते किमुत्तरम्? स्वसिद्धेः साधनं परसिद्धेः दूषणम् । अतो न दूषणे अपसिद्धान्तादि इष्टापत्तिसिद्धसाधकत्वादसङ्गतमेव ॥

**Colophon:**

आनन्दतीर्थमुनिना ब्रह्मतर्कोक्तमार्गतः ।
मानलक्षणमित्युक्तं सङ्क्षेपाद्ब्रह्मसिद्धये ।
अशेषमानमेयैकसाक्षिणे हयमूर्तये ।
अजेशपुरुहूतेड्य नमो नारायणाय ते ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं प्रमाणलक्षणं समाप्तम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4807. प्रमाणलक्षणम्.

## PRAMĀṆALAKṢAṆAM.

Substance, palm-leaf. Size, 15¼ × 1⅜ inches. Pages, 8. Lines, 5 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Begins on fol. 70*a*. The other work herein is Pramāṇalakṣaṇa-ṭīkā (Nyāyakalpalatā) 1*a*.

Complete

Same work as the above.

---

## No. 4808. प्रमाणलक्षणटीका—न्यायकल्पलता.

## PRAMĀṆALAKṢAṆAṬĪKĀ: NYĀYAKALPALATĀ.

Pages, 137. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 4807.

Complete.

A commentary on the Pramāṇalakṣaṇa of Ānandatīrtha; by Jayatīrtha.

**Beginning :**

प्रणम्यागण्यकल्याणगुणाब्धिं पुरुषोत्तमम् ।
पूर्णबोधानपि गुरून् व्याकुर्वे मानलक्षणम् ॥

इह खलु सुखमेव मे स्याद्दुःखं मनागपि मा भूदिति निखिलापेक्षितस्य मोक्षस्येश्वरसाक्षात्कारमन्तरेणासम्भवात्तस्य च प्रमाणानि विनानुदयात्प्रमाणानां च यथावद्विदितानामेव तद्धेतुत्वोपपत्तेस्तत्स्वरूपं यथावज्ज्ञापयितुमाचार्याः प्रार(रि)प्सितग्रन्थाविघ्नपरिसमाप्त्यादिप्रयोजनकं शिष्टाचारपरम्पराप्राप्तेष्टदेवताननतिपूर्वकं श्रोतृशेमुषीमनुकूलयिष्यन् वक्ष्यमाणमेवाग्रे दर्शयति —

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अशेषगुरुमीशेशं नारायणमनामयम् ।
संप्रणम्य प्रवक्ष्यामि प्रमाणानां स्वलक्षणम् ॥

नारायणस्यैव नमस्कारे को हेतुरित्यत आह—अशेषगुरुमिति ।

* * * *

अन्योक्तानामप्रकृष्टतां वक्ष्यति । द्विविधं लक्षणम्—यावल्लक्ष्यभावि अयावल्लक्ष्यभावीति । आद्यं यथा पृथुबुध्नोदराकारो घट इति, द्वितीयं यथा भोगायतनं शरीरमिति । तत्राद्यमेव व्युत्पाद्य(।)स्य तत्रैव सार्वत्रिकव्यवहारोपयोगित्वादिति भावेनोक्तं स्वलक्षणमिति; तदेव हि स्वरूपभूतं लक्षणं यद्यावल्लक्ष्यभावीति ।

**End:**

ननु नारायणस्य शरीरमस्ति वा न वा? आद्ये मरणादिप्रसङ्ग,: द्वितीये कथं तस्येन्द्रियशून्यस्याशेषमानादिसाक्षित्वमित्यत उक्तम्—अक्षयमूर्तय इति । अस्त्येवेश्वरस्य शरीरम्; तच्च सच्चिदानन्दरूपत्वेनाक्षयमेवेति न कश्चिद्दोष इति । अजादिवन्द्यत्वाच्च नारायण एव नमस्कार्य इति भावेनोक्तम्—अजेशेति ।

अमरा भ्रमरायन्ते कमला वरटायते ।
यत्पदाम्भोरुहद्वन्द्वे वन्दे तं पुरुषोत्तमम् ॥

**Colophon:**

इति श्रीमदानन्दतीर्थभगवत्पादविरचितस्य प्रमाणलक्षणस्य टीका न्यायकल्पलता जयतीर्थभिक्षुविरचिता समाप्ता ॥

प्रमाणलक्षणं (टीकासहितं) समाप्तम् ॥

---

## No 4809. प्रमाणलक्षणटीका—न्यायकल्पलता.

## PRAMĀṆALAKṢAṆAṬĪKĀ: NYĀYAKALPALATĀ.

**Pages,** 2. Lines, 10 on a page.

Begins on fol. 7*b* of the MS. described under No. 4783.

Many leaves in the middle are lost.

Same work as the above.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4810. ब्रह्मसूत्रभाष्यम्.

## BRAHMASŪTRABHĀṢYAM.

Substance, paper. Size, 8⅜ × 6⅜ inches. Pages, 88. Lines, 32 on a page. Character, Telugu. Condition, good. Appearance, not recent.

Complete.

A few stanzas in the beginning are wanting.

A well-known commentary on the Brahmasūtras of Vyāsa; by Ānandatīrtha, the South Indian founder of the Dvaita-school of Vēdānta.

**Beginning:**

यथा व्यासत्वमेकस्य कृष्णस्यान्ये विशेषणात् ।
सविशेषणसूत्राणि ह्यपराणि विदो विदुः ॥

मुख्यस्य निर्विशेषेण शब्दोऽन्येषां विशेषतः ।
इति वेदविदः प्राहुः शब्दतत्त्वार्थवेदिनः ॥

सूत्रेषु येषु सर्वेऽपि निर्णयास्समुदीरिताः ।
शब्दजातस्य सर्वस्य यत्प्रमाणश्च निर्णयः ॥

एवंविधानि सूत्राणि कृत्वा व्यासो महायशाः ।
ब्रह्मरुद्रादिदेवेषु मनुष्यपितृपक्षिषु ॥

ज्ञानं संस्थाप्य भगवान् क्रीडते पुरुषोत्तमः ॥
ओम् अथातो ब्रह्मजिज्ञासा ओम् ।

अथशब्दो मङ्गळार्थोऽधिकारानन्तर्य(र्यार्थ)श्च । अतश्शब्दो हेत्वर्थः । उक्तं च गारुडे—

अथातश्शब्दपूर्वाणि सूत्राणि निखिलान्यपि ।
प्रारम्भ(भ्य)न्ते नियत्यैव तत्किमत्र नियामकम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कश्चार्थश्च तयोर्विद्वन् कथमुत्तमता तयोः ।
एतदाख्याहि मे ब्रह्मन् यथा ज्ञास्यामि तत्त्वतः ॥

एवमुक्तो नारदेन ब्रह्मा प्रोवाच सत्तमः ।
आनन्तर्येऽधिकारस्य मङ्गळार्थे तथैव च ॥

अथशब्दस्ततश्शब्दो हेत्वर्थे समुदाहृतः ।
परस्य ब्रह्मणो विष्णोः प्रसादादिति वा भवेत् ॥

स हि सर्वमनोवृत्तिप्रेरकस्समुदीरितः ।
सिसृक्षोः परमाद्विष्णोः प्रथमं द्वौ विनिस्सृतौ ।

ओङ्कारश्चाथशब्दश्च तस्मात्प्राथमिकात्क(कौ क)मात् ॥

**End:**

ओम् अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् ओम् ।

न च पुनरावर्तते न च पुनरावर्तते । सर्वान्कामानाप्त्वा अमृतस्समभवत्समभवत्समभवत्—इत्यादिश्रुतिभ्यः ॥

ज्ञानानन्दादिभिस्सर्वैर्गुणैः पूर्णाय विष्णवे ।
नमोऽस्तु गुरवे नित्यं सर्वथातिप्रियाय मे ॥

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
बहु(ट्)तद्दर्शितमित्थमेव निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुः
मध्वो युत्त(यत्तु)तृतीयकं कृतमिदं भाष्यं हरौ तेन हि ॥

नित्यानन्दो हरिः पूर्णो निर्दोषः प्रीयतां मम ।
नमस्तस्मै नमस्तस्मै नमस्तस्मै च विष्णवे ॥

**Colophon:**

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते चतुर्थाध्यायस्य चतुर्थः पादः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र अधिकरणानि ११. सूत्राणि २३. ग्रन्थसङ्ख्या ९५.
अस्मिन्नध्याये अधिकरणानि ३४. सूत्राणि ८०. ग्रन्थाः ९८०.

चतुष्षष्ट्युत्तरैः पञ्चशत ५६४ सूत्रैर्विराजितः ।
त्रयोविंशाद्विशतकै २२३ र्नयैर्युक्तो विभात्यसौ ॥

ग्रन्थसङ्ख्या १९६०.

चन्द्राङ्करागभू १७९१ शाके विभवाश्वयुजे सिते ।
अष्टमीगुरुवारे तु {ध्वान्त (मध्व)} भाष्यं समाप्त्यभू(त्रिम)त् ॥

---

## No. 4811. ब्रह्मसूत्रभाष्यम्.

### BRAHMASŪTRABHĀṢYAM.

**Substance**, palm-leaf Size, $9\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 182. Lines, 9 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Begins on fol. 175*a*. The other work herein is Bhārata-tātparyanirṇaya 1*a*.

Breaks off in the third Pāda of the fourth Adhyāya.

Same work as the above.

---

## No. 4812. ब्रह्मसूत्रभाष्यम्.

### BRAHMASŪTRABHĀṢYAM.

**Substance**, paper. Size, $9\frac{1}{8} \times 3\frac{3}{8}$ inches. Pages, 210. Lines, 7 and 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

The transcription of this manuscript is stated to have been completed by Māca Śēṣa, son of Nārāyaṇa on Monday, the 10th day of Āṣāḍha-Kṛṣṇa in the year Rākṣasa.

Complete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4813. ब्रह्मसूत्रभाष्यव्याख्या—तत्त्वप्रकाशिका.

## BRAHMASŪTRABHĀṢYAVYĀKHYĀ : TATTVAPRAKĀŚIKĀ.

**Substance,** paper. Size, 10⅜ × 4⅝ inches. Pages, 419. **Lines,** 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Adhyāyas 2 to 4.

A gloss on the Brahmasūtrabhāṣya of Ānandatīrtha; by Jayatīrtha.

**Beginning:**

पूर्वाध्यायसङ्गतत्वेन एतदध्यायार्थं दर्शयति—उक्तेति । अत्राशेषशास्त्रप्रामाण्येन हरिरेव जगज्जन्मादिकर्तेति योऽर्थः प्रथमाध्याये प्रतिपादितः, तस्य युक्त्यादि(विरुद्धत्वे)न प्रेक्षावदुपादित्सागोचरत्वं स्यात् । अतस्तस्मिन्नुक्तार्थे युक्त्यादिविरोधाभावं दर्श(य)त्यनेनाध्यायेन सूत्रकार इत्यर्थः । एतत्पादप्रतिपाद्यं दर्शयति—प्रथमेति । उक्तेऽर्थेऽविरोधः चतुर्धा स्फुरति—युक्तिसमयाद्द्विविधश्रुतिन्यायोपेतश्रुतिविरोधभेदात् । तत्र सर्वविरोधानां युक्तिमूलत्वेन तदविरोधं प्रथमपादे दर्शयतीत्यर्थः । अथाद्याधिकरणार्थं दर्शयति—प्रथमत इति । यद्यप्ययं पादः प्रागुक्तार्थे युक्तिविरोधं परिहर्तुमेव प्रवृत्तः, तथापि प्रथमाधिकरणे पाशुपतादिस्मृतिविरोधाभावं दर्शयति ; स्मृतीनां युक्तिसमयादिरूपत्वेन तद्विरोधपरिहारस्य समस्ताध्यायार्थभूतस्याप्यत्र सत्त्वेन प्राथम्योपपत्तेः । पदार्थस्याप्यत्र सद्भावेन न कोऽपि दोष इति भावः । अनेनास्य अधिकरणस्य शास्त्रादिसङ्गतिरुक्ता भवति । वेदप्रामाण्येन जगज्जन्मादिकर्तृत्वं विष्णोरुक्तम् । तस्य च पाशुपतादिस्मृतिविरोधे नोक्तजिज्ञासा सम्भवतीति अविरुद्धता नेतव्यम्(व्या) । तद्विष्णोर्जगज्जन्मादिकर्तृत्वं विषयः । युक्तं न वेति सन्देहः । समयविगानं सन्देहबीजम् । पूर्वपक्षस्य सूत्र एव उक्तत्वात् तदुपन्यस्य पूर्वपक्षांशं तावद्व्याचष्टे—स्मृतीति । न विष्णोर्जगत्कारणत्वं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



युक्तम्; तत्प्रमाणाभावात्। न च यतो वा इमानि भूतानि जायन्त इत्यादिश्रुतिः प्रमाणम्; श्रुतेः विष्णोर्जगत्कारणत्वप्रतिपादकत्वे पाशुपत-साङ्ख्ययोगादिस्मृतिविरोधेनाप्रामाण्याख्यदोषप्रसङ्गात्।

**End:**

अतः परमाप्ततमप्रणीतत्वादिदं भाष्यं सकलसुजनैः आदरेणाङ्गी-कार्यमिति भावः ॥

उत्पत्तिस्थितिसंहृतिप्रभृतयो भावा भवन्त्याज्ञया
पद्मापद्मभवादिसर्वजगतो व्यस्ताः समस्ताः सदा।

यस्यागण्यगुणाकरस्य करुणापीयूषवारान्निधेः
सोऽयं दूरनिरस्तदोषनिकरः प्रीतोऽस्तु नारायणः ॥

अगाधबोधैर्विततातिभावभाष्यानुवादेन न मेऽपराधः।
न हीन्दिराराध्यपदो मुकुन्दो दूर्वाङ्कुरैर्मन्दधनैरपूज्यः ॥

मध्वदुग्धाब्धिसम्भूतभाष्येन्दूदितकौमुदी।
भूयात्सत्कुमुदानन्ददात्री तत्त्वप्रकाशिका ॥

**Colophon:**

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमद्ब्रह्मसूत्रभाष्य-स्य टीकायां श्रीमज्जयतीर्थाचार्यभिक्षुविरचितायां तत्त्वप्रकाशिकायां चतु-र्थाध्यायस्य चतुर्थः पादः ॥

श्रीमज्जयार्यहृत्संस्थपूर्णबोधहृदाश्रयः।
व्यासः प्रीणातु मत्स्वामी शोधनेन सुखार्णवः ॥

चतुर्थाध्यायः समाप्तः ॥

ग्रन्थसङ्ख्या ८००० ॥

श्रीतत्त्वप्रकाशिका समाप्ता ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4814. ब्रह्मसूत्रभाष्यव्याख्या—दीपिका.

## BRAHMASŪTRABHĀṢYAVYĀKHYĀ : DĪPIKĀ.

Substance, palm-leaf (Srītāla). Size, 19¼ × 2 inches. Pages, 72. Lines, 10 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Ṛgvēdasaṁhitā 37*a*.

Breaks off in the course of the commentary on the sixth Sūtra of the first Pāda in the first Adhyāya.

A commentary on the Brahmasūtrabhāṣya of Ānandatīrtha; by Jagannāthayati.

**Beginning :**

जिज्ञास्यं जन्मरक्षालयनियतिमतिप्रत्यगज्ञानबन्ध-
श्रेयोदं शास्त्रगम्यं श्रुतिकृतिवचनैर्मुख्यवृत्त्याभिधेयम् ।
भैष्मीसत्यासमेतं बहुगुणवपुषं भीतिपूर्वा(द्वा)रदूरं
भक्तिश्रुत्यादिचिन्त्यं भजनपरगतिं भावये वेणुकृष्णम् ॥

आम्रस्तम्भात्समागत्य ताम्रतुण्डान्निहत्य यः ।
नम्रं नौमि जगन्नाथं कम्रोपात्तं नृकेसरी ॥

अनधीत्य मुहुर्भाष्यं यस्य व्याकृष्यनुग्रहात् ।
तमुपासे नृसिंहार्कं प्रत्यूहतिमिरापहम् ॥

पूर्णबोधान् गुरून् वन्दे जयार्यान् व्यासदेशिकान् ।
रामचन्द्रगुरूनार्यान् लक्ष्मीनाथगुरूनपि ॥

येनायं निरणायि मध्वगुरुसद्भाष्यप्रकाशाशयः
प्रासण्डि(पाषण्डि) प्रतिवादिदर्शनगणः प्राबन्धि गुर्वर्णवः ।
शिष्येभ्यः समदायि वित्तमुभयं प्रालम्बि विद्यासनं
सोऽयं श्रीरघुनाथतीर्थगुरुराट् शुद्धिं विदध्यान्मतेः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जयार्यैरचितां टीकामनुसृत्य यथामति ।
जगन्नाथाख्ययतिना क्रियते भाष्यदीपिका ॥
क्वचिद्वा याविवृत्यैव टीकार्थोऽपि विविच्यते ।
तत्त्वप्रदीपतात्पर्यचन्द्रिकाद्युक्तिमार्गतः ॥

परमानन्दाद्यात्मकस्य परमात्मनः प्रतिबिम्बतया स्वतः चिदानन्दाद्यात्मकस्य जीवस्यानाद्यविद्याकामकर्मादिनिमित्तबन्धध्वंसाय निखिलजीवजडात्मकात् प्रपञ्चात् परमार्थतोऽत्यन्तभिन्नतया . . . . प्रवर्तितमिति तत्त्वम् ॥

**End:**

ननु कथमन्नमयशब्दः तत्प्राचुर्यार्थः । ओषधीभ्योऽन्नम् । अन्नात्पुरुष इति प्रसिद्धान्नविकारदेहमुक्त्वा स वा एष पुरुषोऽन्नरसमय इति पुरुषपदोक्तदेहस्य तच्छब्देन परामर्शादित्यत आह स इति । स वा एष इति वाक्येन पूर्वं पुरुषपदोक्तदेहादन्यस्य यस्मादात्मन आकाशादिकमुत्पन्नं तस्मात् मनोऽन्नमयादिपञ्चरूपत्वप्रदर्शनाय प्रारम्भात्प्रक्रान्तत्वादित्यर्थः । अस्याविरोध इत्याकृष्टपदेनान्वयः.

---

## No. 4815. ब्रह्मसूत्रभाष्यव्याख्या—दीपिका.

## BRAHMASŪTRABHĀṢYAVYĀKHYĀ: DĪPIKĀ.

**Pages, 47. Lines, 7 on a page.**

Begins on fol. 52*a* of the MS described under No. 4783.

Wants beginning and end.

Same work as the above.

---

## No. 4816. ब्रह्मसूत्राणुभाष्यम्.

## BRAHMASŪTRĀṆUBHĀṢYAM.

**Pages, 6. Lines, 5 on a page.**

Begins on fol. 10*b* of the MS. described under No. 2770.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Complete.

This is a work on Dvaita-Vēdānta, giving briefly in verse the substance of the conclusions intended, according to this author, to be taught by the Brahmasūtras ; by Ānandatīrtha.

**Beginning :**

नारायणं गुणैस्सर्वैरुदीर्णं दोषवर्जितम् ।
ज्ञेयं गम्यं गुरूंश्चापि नत्वा सूत्रार्थ उच्यते ॥
विष्णुरेव विजिज्ञास्यः सर्वकर्तागमोदितः ।
समन्वयादीक्षतेश्च पूर्णानन्दोऽन्तरसवत् ॥
प्रणता ज्योतिरित्याद्यैः प्रसिध्येरन् न वस्तुषु ।
उच्यते विष्णुरेवैकः सर्वैः सर्वगुणोत्तरः ॥
सर्वगोप्ता नियन्ता चादु(द्द)श्यत्वादूर्जितः सदा ।
विश्वे जीवान्तरत्वाद्यैर्लिङ्गैस्सर्वैरु तच्च हि ॥

**End :**

यथेष्टशक्तिमन्नस्थं विना स्वाभाविकोत्तमाः ॥
अनन्यवशगाश्चैव वृद्धिह्रासविवर्जिताः ।
दुःखादि(र)हिता नित्यं मोदन्ते निर(य)ं सुखम् ॥
पूर्णप्रज्ञेन मुनिना सर्वशास्त्रार्थसङ्ग्रहात् ।
कृतोऽयं प्रीयतां तेन परमात्मा रमापतिः ॥
नमो नमोऽशेषदोषदूरपूर्णगुणात्मने ।
विरिञ्चिशर्वपूर्वेभ्यो वन्द्याय श्रीवराय ते ॥

**Colophon :**

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रानु(णु)भाष्ये आनन्दतीर्थभगवत्पादाचार्यविरचिते चतुर्थोऽध्यायः ॥

---

No. **4817.** ब्रह्मसूत्राणुभाष्यम्.

BRAHMASŪTRĀṆUBHĀṢYAM.

**Pages, 10.** Lines, 5 on a page.

Begins on fol. 4*a* of the MS. described under **No.** 2866.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Incomplete.

**Same work as the above.**

---

No. **4818.** ब्रह्मसूत्राधिकरणार्थसङ्ग्रहः.

BRAHMASŪTRĀDHIKARAṆĀRTHASAṄGRAHAḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 61*a* of the MS. described under No. 4793.

Complete.

A short treatise containing summaries of the contents of the several Adhikaraṇas or sections in the Brahmasūtra-bhāṣya.

By Gōpālakṛṣṇācārya, son of Vēṅ(kaṭa)kṛṣṇācārya.

**Beginning:**

जिज्ञास्यः परमात्मा यो जगज्जन्मादिकारणम् ।
शास्त्रैकगम्यो लिङ्गैश्च स एवोपक्रमादिभिः ॥
(स) वाच्यः सकलैश्शब्दैरानन्दमयनामकः ।
अन्तःप्रविष्ट आकाशप्राणो जो(ज्यो)तिःपदोदितः ॥
गायत्री प्राणनामा चेत्याद्याद्यचरणे नयाः ।
द्वादशाखिलभूतस्थः सर्वात्मा शुभकर्मकृत् ॥
अक्षिण स्थितोऽन्तर्यामी चादृश्यत्वादिगुणाश्रयः ।
वैश्वानराख्यश्चेत्याद्यद्वितीये नयसप्तकम् ॥

**End:**

बाह्यदेहस्योपपन्नो भोग्यव्याप्तिमन्तरा ।
जगत्सृष्ट्यादिषु सुखं चकरीत्यानुभूय्य(य)ते ॥
नाप्यन्तोऽनुभवस्येति न्याया एकादश क्रमात् ।
अध्यायस्य चतुर्थस्य चतुर्थचरणोदिताः ॥

**Colophon:**

इति श्रीमद्वेङ्कृष्णाचार्यसुतश्रीगोपालकृष्णाचार्यविरचितः ब्रह्ममीमांसाधिकरणार्थसङ्ग्रहस्समाप्तः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4819. ब्रह्मसूत्रानुव्याख्यानम्.

## BRAHMASŪTRĀNUVYĀKHYĀNAM.

Substance, paper. Size, 13¼ × 5⅜ inches. Pages, 184. Lines, 11 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

A commentary in verse on the Brahmasūtras of Vyāsa; by Ānandatīrtha. It is called Anuvyākhyānam because it is written in accordance with his well-known Bhāṣya.

**Beginning:**

नारायणं निखिलपूर्णगुणैकदेहं निर्दोषमाप्यतममप्यखिलैस्सुवाक्यैः ।
अस्योद्भवादिदमशेषविशेषतोऽपि वन्द्यं सदा प्रियतमं मम संनमामि ॥

तमेव शास्त्रप्रभवं प्रणम्य जगद्गुरूणां गुरुमञ्जसैव ।
विशेषतो मे परमाख्यविद्याव्याख्यां करोम्यन्वपि चाहमेव ॥

प्रादुर्भूतो हरिर्व्यासो विरिञ्चभवपूर्वकैः ।
अर्थितः परविद्याख्यं चक्रे शास्त्रमनुत्तमम् ॥

गुरुर्गुरूणां प्रभवः शास्त्राणां बादरायणः ।
यतस्तदुदितं मानमजादिभ्यस्तदर्थतः ॥

वक्तृश्रोतृप्रसक्तीनां यदाप्तिरनुकूलता ।
आप्तवाक्यतया तेन श्रुतिमूलतया तथा ॥

युक्तिमूलतया चैव प्रामाण्यं त्रिविधं महत् ।
दृश्यते ब्रह्मसूत्राणामेकधान्यत्र सर्वशः ॥

अतो नैतादृशं किञ्चित्प्रमाणतममिष्यते ।
स्वयङ्कृतापि तद्व्याख्या क्रियते स्पष्टतार्थतः ॥

तत्र ताराथमूलत्वं सर्वशास्त्रस्य चेष्यते ।
सर्वत्रानुगतत्वेन पृथगोङ्क्रियतेऽखिलैः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ओतत्ववाची ह्योङ्कारो वक्तव्यसौ तद्गुणोततताम् ।
स एव ब्रह्मशब्दार्थो व्याहृतीनाञ्च भूमतः ॥
भावनाच्चैव सु(स)त्त्वाच्च सोऽयं पुरुष इत्यपि ।

**End:**

लोकाभिधाश्चापि यतो विमुक्ताः प्रकाशरूपास्सततञ्च सर्वे ।
ब्रह्मैव लोकाधिपतिर्विमुक्तो भवेदिति प्राह तुरश्रुतिश्च ॥
न चेह विज्ञानफलं समुक्तं लोकाधिपत्यं रविबिम्बगे हरौ ।
उक्तं पृथक्तच्च पुरैव यस्मात् भेदोऽमुनेत्यादि च सम्यगुक्तम् ॥
त्वप्रत्ययश्चाप्यतिहाय नैव रूपेण तेनेति भवेदिहार्थः ।
भवत्यसावित्यणुशब्दमात्रं विहाय वाक्यानि बहूनि दोषः ॥
अतो जगद्व्याप्तृतिमन्त एव ब्रह्मादयः पूर्णगुणाः क्रमेण ।
अमन्दमानन्दमजस्रमेव भुञ्जन्तमात्मीयमजात्समासते ॥
नमो नमोऽशेन(ष)विशेषपूर्णगुणैकधाम्ने पुरुषोत्तमाय ।
भक्तानुकम्पादाति(द्दत)शुद्धसंविद्दात्रेऽनुपाधिप्रियसद्गुणात्मने ॥
यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
बट्तद्दर्शितमित्थमेव निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुः
मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥
निश्शेषदोषरहितकल्याणाखिलसद्गुण ।
भूतिस्वयम्भूशर्वादिवन्द्यं त्वां नौमि मे प्रियम् ॥

**Colophon:**

इति श्रीमत्कृष्णद्वैपायनकृतब्रह्मसूत्रानुव्याख्याने श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते चतुर्थाध्यायस्य चतुर्थः पादः ॥

उडुपिवेङ्कटरमणाचार्येण कुम्भघोणस्थमाचिङ्गणरङ्गनाथाचार्याय दत्तम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **4820.** अनुव्याख्यानटीका—न्यायसुधा.

ANUVYĀKHYĀNAṬĪKĀ: NYĀYASUDHĀ.

Substance, palm-leaf. Size, 16¼ × 2 inches. Pages, 162. Lines, 8 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Jijñāsādhikaraṇa only incomplete.

A commentary on the Anuvyākhyāna of Ānandatīrtha; by Jayatīrtha.

**Beginning:**

पूर्णागण्यगुणोदारनित्यसुन्दरमूर्तये ।
श्रीब्रह्मरुद्रवीन्द्रेड्यकीर्तये ब्रह्मणे नमः ॥

*  *  *  *

विश्वं यस्य वशे सर्वमनिन्द्यं शङ्करादिकम् ।
तस्य वायोस्तृतीयांशमाश्रये शमवाप्तये ॥

सत्पद्मबन्धवो यस्य गावो विश्वतमोनुदः ।
स स्यात्तत्त्वप्रकाशाय जयतीर्थरविर्मम ॥

पदवाक्यप्रमाणज्ञः दुर्मतध्वान्तभास्करः ।
व्यासतीर्थमुनीन्द्रो मे भूयाज्ज्ञानसमृद्धये ॥

अस्मद्देशिकपादानां (प्रणम्य च)रणाम्बुजम् ।
श्रीमन्न्यायसुधावाक्यव्याख्यां कुर्वे यथामति ॥

श्रियः पत्ये नित्यागणितगुणमाणिक्यविशद-
प्रभाजालोल्लासोपहतसकलावद्यतमसे ।
जगज्जन्मस्थेमप्रलयरचनाशीलवपुषे
नमोऽशेषाम्नायस्मृतिहृदयदीप्ताय हरये ॥

येन प्रादुरभावि भूमिवलये व्यस्तारि गोसन्ततिः
प्राबोधि श्रितिपङ्कजं करुणया प्राकाशि तत्त्वं परम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ध्वान्तं ध्वंसमनायि साधुनिकरश्चाकारि सन्मार्गग-
स्तेन व्यासदिवाकरेण सततं मा त्याजि मे मानसम् ॥

* * * *

भगवता बादरायणेन प्राणिनां निश्श्रेयसाय प्रणीतमपि ब्रह्ममीमांसाशास्त्रमसाधुनिबन्धान्धतमसावकुण्ठितत्वेनाप्रणीतमिव मन्यमानो भगवानानन्दतीर्थमुनिर्यथाचार्याभिप्रायमस्य भाष्यं विधायानुभाष्यमपि करिष्यन् विलीनप्रकृतितया स्वयमन्तरायविधुरोऽप्यनवरतमीश्वरप्रवणकायकरणवृत्तिरपि नारायणप्रणामादिकं प्रारिप्सितस्य अनन्तरायपरिसमाप्तेः प्रचयस्य च हेतुतया अव(वि)गीतशिष्टाचारावगतमवश्यङ्करणीयं शिष्यान् ग्राहयितुं ग्रन्थादौ नि(ब)ध्नाति—नारायणमिति । अत्र नारायणं सन्नमामीत्यन्वयः ।

**End :**

अत इति । परमते अविद्यानुपपत्तेरित्यर्थः । योगो विषयप्रयोजनयोः परस्परं शास्त्रेण च सम्बन्धः । आदिग्रहणेन स्वपक्षसाधकं प्रमाणं गृह्यते । अ(न)न्तदोषा उक्ता वक्ष्यमाणाश्च । सति खल्वज्ञाने अज्ञो विप्रतिपन्नस्सन्दिग्धो वा शास्त्रे अधिकारी स्यादज्ञातश्च विषयो भवेत् । अज्ञाननिवृत्तिश्च फलम् । न च विषयाद्यभावे सम्बन्धस्सम्भवतीति अधिकार्यादिवर्जितत्वादनारम्भणीयं दुष्टत्वाद्धेयश्च (अज्ञानमित्युपक्रम्य भायेत्युपसंहारोऽज्ञानस्यैवावस्थाभेदेन संज्ञाद्वयं न तु वस्तुभेद इति परमताविष्करणार्थः).

---

## No. 4821. न्यायसुधाव्याख्यानम्—परिमलम्.

## NYĀYASUDHĀVYĀKHYĀNAM : PARIMAḶAM.

Substance, palm-leaf. Size, $15\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 60. Lines, 6 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Begins on fol. 43*a*. The other work herein is Mahābhāratatātparyanirṇayaṭippaṇī 1*a*.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



The second Adhyāya complete.

A commentary on the Nyāyasudhā of Jayatīrtha; by Rāghavēndrayati, a disciple of Sudhīndra.

**Beginning:**

भवापदो विनश्यन्ति यत्पादस्मृतिमात्रतः ।
तं वन्दे कुमतिध्वान्तभास्करं नृहरिं सदा ॥

करिष्यमाणे(तदध्यायार्थप्रतिपादनमेवंविध)भगवदुपासनारूपमिति भावेनाध्यायादौ मङ्गलमाचरति -यत्पदमिति । यस्य स्वरूपं कटाक्षेणापीत्यादेस्तद्विषयमल्पमपि ज्ञानं सम्पादयितुमशक्ता इत्यर्थः । विमतयः विरुद्धमतियुक्ताः । एकवाक्यतासिद्ध्य इति । पादचतुष्टयात्मके स्वस्मिन्निति योज्यम् । द्वितीयाध्यायार्थं विवक्षुरित्यन्वयः ।

**End:**

तथेतीति । अज्ञाताधिकविष(ज्ञे)यविषयकत्वादनधिगतार्थतेत्यर्थः । अतिव्याप्तेश्चेति । प्राक्प्रतिज्ञातातिव्याप्तिमुपपादयति – संशयविपर्यासयोरपीति । इतरेतराश्रयत्वमिति । व्यावर्त्यत्वसिद्धौ लक्षणे विशेषणमर्थवत् सिद्धे च तत्सार्थक्ये लक्षणा.

---

No. **4822.** अनुव्याख्याननयायविवरणम्.

ANUVYĀKHYĀNANYĀYAVIVARAṆAM.

Substance, paper. Size, 8 × 4½ inches. Pages, 63. Lines, 11 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

An explanatory treatise on his own Anuvyākhyāna; by Ānandatīrtha.

**Beginning:**

चेतनाचेतनजगन्नियन्त्रेऽशेषसंविदे ।
नमो नारायणायाजशर्वशक्रादिवन्दित ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृत्वा भाष्यानु(णु)भाष्येऽहमपि वेदार्थसप्ततेः ।
कृष्णस्य सूत्रानुव्याख्यासन्न्यायविवृतिं स्फुटम् ॥
करोमि मन्दबुद्धीनां बुधानाञ्चोपकारिकाम् ।
प्रीत्यै तस्यैव देवस्य तत्प्रसादपुरस्सरः(म्) ॥

जीवव्यतिरिक्तेश्वराभावात्तस्य च स्वप्रकाशत्वेन नित्यसिद्धत्वादजिज्ञास्यतेति प्राप्ते अथातो ब्रह्मजिज्ञासेत्याह । तद्विजिज्ञासस्व । तद्ब्रह्मेति ब्रह्मशब्देन पूर्णगुणत्वोक्तेर्नानुभवसिद्धाल्पगुणजीवाभेदः । अथ कस्मादुच्यते ब्रह्मेति बृहन्तो ह्यस्मिन्गुणा इति श्रुतेः ।

**End :**

अभ्यासपाटवात्स्नेहादसमत्वादुपासना ।
भक्तिश्च सुखरूपे वा मुक्तानां न तु साधनम् ॥ इति श्रुतिः ।

न चानन्तत्वात्कालस्य त्रयोदशीपञ्चदशीवत् कदाचित् समस्तस्यापि सम्भवान्न मुक्तस्यापि पुनरावृत्त्याशङ्केति वाच्यम्; सत्यकामत्वादिमाहात्म्यादशेषकामसत्यत्वान्मुक्तानामपुनर्भावः ॥

विद्याविद्ये सुखं दुःखमशक्तिश्शक्तिरेव वा ।
उत्पत्तिस्थितिनाशाश्च विशेषाश्चापरेऽखिलाः ॥
चेतनाचेतनस्यास्य समस्तस्य यदिच्छया ।
स मम स्वकृतेनैव प्रीयतां पुरुषोत्तमः ॥
यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
बट्तद्दर्शितमित्थमेव निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपुः
मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥
नमोऽब्जभवभूर्यक्षपुरस्सरसुराश्रय ।
नारायणारणं मह्यं मापते प्रेयसां प्रिय ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्ब्रह्मसूत्रानुव्याख्यानन्यायविवरणे चतुर्थाध्यायस्य चतुर्थः पादः समाप्तः ॥

---

No. **4823.** भागवततात्पर्यनिर्णयः.

BHĀGAVATATĀTPARYANIRṆAYAḤ.

Substance, paper. Size, $9\frac{1}{8} \times 5\frac{5}{8}$ inches. Pages, 264. **Lines, 17 on a page.** Character, Dēvanāgarī. Condition, good. **Appearance,** old.

Skandhas 1 to 12 complete.

An attempt to explain and interpret the Śrī-Bhāgavata in accordance with the doctrines of Dvaita-Vēdānta.

By Ānandatīrtha.

**Beginning:**

सृष्टिस्थित्यप्ययेहानियतिदृशितमोबन्धमोक्षाश्च यस्मात्
अस्य श्रीब्रह्मरुद्रप्रभृतिसुरनराधीशशक्त्यात्मकस्य ।
विष्णोर्व्यस्तास्समस्तास्सकलगुणानिधिस्सर्वदोषव्यपेतः
पूर्णानन्दोऽव्ययो यो गुरुरपि परमश्चिन्तये तं महान्तम् ॥

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञस्स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यं सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्य(स्त)कुहकं सत्यं परं धीमहि ॥

अन्वयात् ।

यतो वा इमानि भूतानीत्यादिश्रुतिस्मृतिभ्यः । इतरतः तर्कतः । चेतनाद्धि पित्रादेः पुत्रादिरुत्पद्यते । अभिज्ञः सर्वज्ञः । अतो युज्यते । "यं कामये तं तमुग्रं मम योनिः" इत्यन्येषां तदपेक्षत्वात् । न



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चान्यापेक्षोऽसौ स्वराट् । कुतः ? तेने ब्रह्म हृदा य आदिकवये । स हि विश्वा जातानि परि ता बभूव । नान्यः । हृदा स्नेहात् । यो ब्रह्माणमिति च । स्वात्मतयैव हि तस्य बुद्धिप्रकाशः । न च प्रसादं विना ज्ञातुं शक्यः मुह्यन्ति यं सूरयः । न चातृप्तः प्रवर्तते ॥

* * * *

**Colophon:**

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमद्भागवततात्पर्यनिर्णये प्रथमस्कन्धे प्रथमोऽध्यायः ॥

**End:**

"एवमेव ऋषीणाञ्च कीर्तिं योजयतामुना ।
कृतोपेक्षा महेन्द्रेण किमु विष्णुः परात्परः ॥

तस्माद्विष्णोरशक्यं न भूतभव्यभवत्स्वपि ।
न चानिष्टं गुणैरेष पूर्णो नारायणस्सदा ॥

इति वामने ॥

**Colophon:**

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितश्रीमद्भागवततात्पर्यनिर्णये द्वादशस्कन्धे पञ्चमोऽध्यायः ॥

नित्यानिर्दोषरूपाय गुणपूर्णाय सर्वदा ।
नारायणाय हरये नमः प्रेष्ठतमाय मे ॥

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितश्रीमद्भागवततात्पर्यनिर्णये द्वादशस्कन्धस्सम्पूर्णः ॥

श्रीनृपशालिवाहनशके १७६३ दुर्मति आश्विजकृष्णैकादश्यां हरिवासरे भारद्वाजगोत्रोत्पन्नलक्ष्मणार्यसूनुनारायणश्रहिरिर्गुरुसेवा ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4824. भारततात्पर्यनिर्णयः.

## BHĀRATATĀTPARYANIRṆAYAḤ.

**Substance, palm-leaf.** Size, 17⅝ × 1½ inches. Pages, 444. **Lines,** 6 on a page. Character, Telugu. Condition, good. **Appearance,** new.

Complete.

**A treatise** in verse purporting to interpret the **Mahābhārata** in accordance with the doctrines of Dvaita-Vēdānta; by Ānandatīrtha.

**Beginning:**

नारायणाय परिपूर्णगुणार्णवाय विश्वोदयस्थितिलयोन्नियतिप्रदाय ।
ज्ञानप्रदाय विबुधासुरसौख्यदुःखसत्कारणाय विततय नमो नमस्ते ॥

आसीदुदारगुणवारिधिरप्रमेयो नारायणः परतमः परमात् स एकः ।
संशान्तसंविदखिलं जठरे निधाय लक्ष्मीभुजान्तरगतः स्वरतोऽपि चाग्रे ॥

**End:**

इत्यादिवाक्योक्तमिदं समस्तं तथा पुराणेषु च पाञ्चरात्रे ।
अत्रोदिता याश्च कथास्समस्ता वेदेतिहासादिविनिर्णयोक्ताः ॥

तस्मादयं ग्रन्थवरोऽखिलानां धर्मादिमोक्षान्तपुमर्थहेतुः ।
किं चोदितैरस्य गुणैस्ततोऽन्यैर्नारायणः प्रीतिमुपैति चायम् ॥

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
बट्तद्दर्शितमित्थमेव निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पृक्षो द्वितीयं वपु-
र्मध्वो यस्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥

यस्सर्वगुणसम्पूर्णस्सर्वदोषविवर्जितः ।
प्रीयतां प्रीत य(ए)वालं विष्णुर्मे परमस्सुहृत् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महाभारततात्पर्य-
निर्णये पाण्डवस्वर्गारोहणं नाम द्वात्रिंशोऽध्यायः ॥

---

## No. 4825. भारततात्पर्यनिर्णयः.

## BHĀRATATĀTPARYANIRṆAYAḤ.

Substance, palm-leaf. Size, 13¾ × 1⅝ inches. Pages, 206. Lines, 13 on a page. Character, Nandināgarī. Condition, much injured. Appearance, old.

Breaks off in the 26th Adhyāya.

Same work as the above.

---

## No. 4826. भारततात्पर्यनिर्णयः.

## BHĀRATATĀTPARYANIRṆAYAḤ.

Substance, palm-leaf. Size, 9⅛ × 1⅜ inches. Pages, 216. Lines, 10 on a page. Character, Nandināgari. Condition, injured. Appearance, new.

Breaks off in the 19th Adhyāya.

Same work as the above.

---

## No. 4827. भारततात्पर्यनिर्णयः.

## BHĀRATATĀTPARYANIRṆAYAḤ.

Substance, palm-leaf. Size, 15 × 1⅝ inches. Pages, 54. Lines, 7 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Adhyāyas 25 to 27 complete, 28th incomplete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4828. भारततात्पर्यनिर्णयः.

## BHĀRATATĀTPARYANIRṆAYAḤ.

**Pages**, 252. Lines, 8 on a page.

Begins on fol. 77*a* of the MS. described under No. 4783.

Addhyāyas 1 to 29.

Same work as the above.

---

## No. 4829. भारततात्पर्यनिर्णयः.

## BHĀRATATĀTPARYANIRṆAYAḤ.

**Pages**, 348. Lines, 11 on a page.

Begins on fol. 1*a* of the MS. described under No. 4811.

Adhyāyas 3, 5, 7, 11, 22, and 24 complete.

Same work as the above.

---

## No. 4830. भारततात्पर्यनिर्णयटिप्पणी.

## BHĀRATATĀTPARYANIRṆAYAṬIPPAṆĪ.

**Pages**, 84 Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 4821.

The first three Adhyāyas complete.

A brief commentary on the Bhāratatātparyanirṇaya of Ānandatīrtha; by Varadarāja.

**Beginning:**

आनन्दतीर्थहृत्पद्मकर्णिकावासमच्युतम् ।
नत्वा भारततात्पर्यनिर्णयं विवृणोम्यहम् ॥

अथ भारततात्पर्यनिर्णयव्याजेन सकलशास्त्रतात्पर्यं निक(र्णे)तुकामो भगवानाचार्यः स्वयमन्तरायविधुरोऽपि निरन्तरायप्रारिप्सितपरिसमाप्त्यादिहेतुभूतमिष्टदेवतानतिरूपं मङ्गलं शिष्यान्ग्राहयितुमनुष्ठितं ग्रन्थादौ निबध्नाति—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(नारायणायेति) । नारायणाय नमो नम इति सम्बन्धः । ग्रन्थारम्भसमयेऽपि अपरोक्षीकृतभगवद्रूपत्वात्त इत्यपरोक्षेण निर्देशः । व्य(भ)क्त्यतिशयद्योतनाय नमो नम इति द्विरुक्तिः । न अ(ह्य)निर्धारितस्वरूपस्य वन्दनं युक्तम्; न च लक्षणेन विना स्वरूप(निर्धार)णमित्यतो नारायणस्य लक्षणान्याह—परिपूर्णेत्यादिना ।

**End:**

प्रथमोत्पन्नत्वं नोत्कर्षहेतुः गुणाधिक्यज्ञापकं न भवति । (यथा)—सनकादीनां रुद्रात्प्रथमोत्पन्नत्वमवान्तरसर्गेऽस्ति यतस्तस्मादुत्कर्षज्ञापकमिति द्रष्टव्यम् । नैवमादिसर्गे व्यत्यास इति भावः । ननु कथमेतत् ज्ञातव्यमित्याह—विशेषेति । विशेषवाक्यैरवगम्योऽवगन्तव्य इत्यर्थः । . . . . . . . . . . . . अवान्तरसर्गे प्राथम्यमिति विशेषो ज्ञातव्य इति भावः ॥

**Colophon:**

इति श्रीमन्महाभारततात्पर्यनिर्णयटिप्पणे वरदराजीये तृतीयोऽध्यायः ॥

श्रीमद्भारततात्पर्यनिर्णयो(ये)ऽध्याय एव हि ।
तृतीयो व्याकृतस्तावत्प्रीत्यै माधवमध्वयोः ॥

---

## No. 4831. भारततात्पर्यनिर्णयटिप्पणी—पदार्थविवृतिः.

## BHĀRATATĀTPARYANIRṆAYATIPPAṆĪ : PADĀRTHAVIVṚTIḤ.

**Substance**, palm-leaf. Size, $16\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 385. **Lines**, 7 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Adhyāyas 12 to 20. (12th wants beginning.)

This commentary on the Bhāratatātparyanirṇaya is by Jambukhandī Lakṣmīnarasiṁha.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

मेतत् । शन्तनुः । सतां सज्जनानां मनः पापमार्गे पापसाधनमार्गे प्रायो न गच्छेत् । आत्ममनश्च आत्मनः स्वस्य मनश्च सक्तं सत्यवत्यामिति शेषः ।

आसक्तमिति ज्ञात्वा . . . . . . . क्तिमात्रेण नैच्छत्किन्नाम राजपुत्रीत्यपि ज्ञात्वा जग्राहेत्याह—ज्ञात्वापीति ।

* * * *

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितश्रीमन्महाभारत(तात्पर्य)निर्णयटीकायां पदार्थविवृतौ द्वादशोऽध्यायः ॥

**End :**

अथवानन्तशक्तिसुखज्ञानप्रभवौदार्यवीर्ये इत्येक(प)दम् । अनन्तानि अपरिच्छिन्नानि शक्तिसुखज्ञानप्रभवौदार्यवीर्याणि यस्य स तथा कृष्णोऽपि पार्थैः पाण्डवैर्युधिष्ठिरादिभिः सह मुमुदे सन्तुतोष इति अशेषमतिमङ्गळम् ॥

**Colophon :**

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविराचितश्रीमहाभारततात्पर्यनिर्णयटीकायां सेट्टिकोटिरमणाचार्यशिष्येण जम्बुखण्डीलक्ष्मीनरसिंहेन संगृहीतायां विंशोऽध्यायः ॥

ग्रन्थसङ्ख्या ७०००.

---

## No. 4832. भारततात्पर्यनिर्णयटिप्पणी—भावप्रकाशिका.

## BHĀRATATĀTPARYANIRṆAYAṬIPPAṆĪ : BHĀVAPRAKĀŚIKĀ.

**Substance**, palm-leaf. Size, $16\frac{7}{8} \times 1\frac{1}{2}$ inches. Pages, 78. **Lines**, 8 on a page. Character, Nandināgarī. Condition, good. Appearance, old.

Begins on fol. 69*a*. The other works herein are **Bhārata**tātparyanirṇayaṭīkā 1*a*, Saṅgraharāmāyaṇaṭippaṇī 119*a*.

Adhyāyas 1 to 21 complete, 22nd incomplete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



This commentary on the Bhārata-tātparyanirṇaya is different from the one described above and is called Bhāvaprakāśikā.

By Vādirājatīrtha.

**Beginning:**

प्रणम्य नृहरिं मध्वं गुरूंश्चान्यान्यथामति ।
महाभारततात्पर्यनिर्णयार्थः प्रकाश्यते ॥
वादी मध्वो यस्य राजा सोऽहं तस्य कृपाबलात् ।
वादिराजेन स्वशक्त्या त्रीणे वरणयामि तत् ॥

अथ दशरथात्स्वमातृषु जन्मानन्तरम् । चातुर्यादिगुणानामपि दिने दिने वृद्धिसूचनाय चतुरा इति विशेषणम् । अभिनवशिशूनां तदैव बहिर्गमनाभावात् गेह इत्युक्तम् । रामस्य तु प्रादुर्भावमात्रम्; न लक्ष्मणादिवत् साक्षात्कुमारत्व(मपीति)सूचनाय पुरुषोत्तमपदम्; "यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः" इति गीतोक्ताव्ययत्वे ईश्वरत्वादेरपि पुरुषोत्तमपदेन सूचितत्वादिति भावः । अत एव पुरुषोत्तम आद्यः पूर्वमेव विद्यमानो येषु ते पुरुषोत्तमास्ता(द्या) इति समासः ।

* * * *

अत एव तपोदग्धमिति प्रवदन्मुमोदेत्युक्तम् । निजाश्रितजनस्यैवेत्येवकारसम्बन्धः । सत्तत्त्वविबोधकारणम् अहमपि हरिः समोऽपि हरिः इति सत्तत्त्व(विबोध)कारणम् अन्यतमस्यैको जित एक(:) पराजित इति विमोहक(न)श्च कुर्वन् वि(चि)क्रीड इति योजना ॥

**Colophon:**

इति श्रीकविकुलतिलकश्रीवादिराजतीर्थविरचितायां श्रीमदानन्दतीर्थभगवत्पादविरचितश्रीमन्महाभारततात्पर्यनिर्णयटिप्पण्यां भावप्रकाशिकायां चतुर्थोऽध्यायः ॥

**End:**

पञ्चपाण्डवानां रथैः धर्मराजस्य राजतया पृष्ठगामित्वेन पृष्ठे रथान्तरापेक्षा; अतो द्वावेव पार्श्वरथौ येद्धनन्(योद्धृणाम्) एकः पृष्ठे रथः द्वौ द्वौ पार्श्वयोः एवं चतुर्दशोपरथा इति ज्ञेयम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इत्येकविंशोऽध्यायः ॥

तथापि सकलचेतनाचेतनचेष्टाप्रवर्तकत्वेन अन्तः प्रेरणेनैव निवर्तयितुं प्रवर्तयितुं समर्थोऽपीत्यर्थः । कचित् कस्मिंश्चित्कार्ये प्राप्ते सति सावधारणानि वाक्यानि भवन्तीति वचनात् । अकार्यश्चेदपि [वा] वा[चा]-चैव विनिवाय(र)येत् कार्यश्चेदपि वाचा विधत्त इत्यूचिवानित्यत्र इति-शशापेति पूर्वेण अन्वयः । त्वं राज्यदा न चेत् अस्तिभवत्योस्सर्वदान्वय इति वचनात्.

---

No. **4833.** भारततात्पर्यनिर्णयटीका.

BHĀRATATĀTPARYANIRṆAYAṬĪKĀ.

Pages, 136. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 4832.

Adhyāyas 1 to 23 complete, 24th incomplete.

A brief commentary on the Bhārata-tātparya-nirṇaya: by Jambukhaṇḍī Lakṣmīnṛsiṁha, a disciple of Kōṭiramaṇācārya. This is different from the two commentaries described above.

**Beginning:**

अथेदानीं . . नुबन्धः . . . . . . . . . . . पञ्चधा भवति तथा मृत्युं गमिता गमिष्यति हि यस्मात् तस्मात् आशु निवारयेत्य-वददिति संबन्धः । इति ईरिते उक्ते सति व्यासेनोते शेषः । तेन धृतराष्ट्रेण . . . . . . . . . . . . . . . . . . . . . . .

हरिः व्यासः, प्राह अवदत् । किमिति । अहं तैः दुर्योधनादिदुष्टैस्सह न संवदे । द्वेषिणां नामोच्चारणात् दोषप्राप्तिरिति स्मरणात् । दोषहीनोऽपि तैरित्यूचे । दुष्टैरसह संवादो न कर्तव्य इति अहं न संवदे . . . . . . . सद्बुद्धिं न वदिष्ये इत्यूचे; न तु बोधने अशक्तत्वादिति भावः । मैत्रेय इति । किन्तु मैत्रेय(:)मैत्रयाख्यमुनिः इह अत्र आयास्यति आगमिष्यति । सोऽपि मैत्रेयोऽपि शिक्षार्हां वाचं वाक्यम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एतेषु दुर्योधनादिषु अभिधास्यति वदिष्यति तव ते एष सुतः दुर्योधनः। तां मैत्रेयेणोक्तां वाचं करोति चेत् तदा अस्य [भ]दुर्योधनस्य भद्रं शुभं स्यात् ।

**End:**

सेति । सवासुदेवा वासुदेवेन श्रीकृष्णेन सह वर्तमाना अखिलैस्समस्तैर्यादवैश्च पाञ्चालमात्स्यैश्च पाञ्चाला द्रुपदाद्याश्च मात्स्या विराटाद्याश्च तथा तैर्युता युक्ताः सभार्या भार्याभिस्सह वर्तन्त इति तथा ते पाण्डवाः कृष्णसंशिक्षितार्थास्सन्तः कृष्णेन सम्यक् प्रीतिपूर्वकं शिक्षिता अर्था धर्मादयो येषां ते तथा राज्यधनादिप्रयोजनानि वा उपप्लाव्ये उपप्लाव्यपुरे कतिचित् कतिपयानि दिनानि कतिपयदिवसेषु वासं चक्रुः । इत्यशेषमतिमङ्गळम् ॥

**Colophon:**

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य श्रीमहाभारततात्पर्यनिर्णयस्य टीकायां श्रीकोटिरमणाचार्याणां शिष्येण जम्बुखण्डीलक्ष्मीनरसिंहेन संगृहीतायां त्रयोविंशाध्यायः ॥

उद्योगपर्वकथा आह—तत इति । ततः अज्ञातवासानन्तरं कृष्णस्य अनुमतेः सम्मत्या द्रुपदः राजा युद्धशान्तये कौरवपाण्डवविरोधशान्तये। धृतराष्ट्राय [कर्मणिषष्ठी] धृतराष्ट्रं प्रति स्वपुरोहितं स्वस्य पुरोहितं प्रेषयामास . . . . भीष्मद्रोणादिभिः भीष्मश्च.

---

## No. 4834. मध्वतन्त्रनवमञ्जरी.

## MADHVATANTRANAVAMAÑJARĪ.

Substance, palm-leaf. Size, $14\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 73. Lines, 6 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Incomplete.

A dissertation which supports Dvaita-Vēdānta and criticises unfavourably the views of opponents.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

स्तम्भाज्जम्भारिशैलादिव दिवसकरः प्रोज्झितांहो(हा)[ता]स्त्रिलोकी-
ग्रासव्यासक्तनक्तञ्चरवरतिमिरारिष्टमुष्टिन्धयश्रीः ।
शुक्राद्यादित्यचक्रप्रभयह(नख)रकरः क्लृप्तपद्मानुषङ्गः
सिंहः प्रह्लादमोदी स दहतु दुरितं रंहसा प्रह्वसाध्यः ॥

उर्व्या सकर्णतां याति यद्गुणाकर्णने रतः ।
अर्णवं गुणरत्नानां पूर्णबोधं तमाश्रये ॥
यस्य वाक्कामधेनुर्नः कामितार्थान् प्रयच्छति ।
सेवेयं(य) जययोगीन्द्रं कामबाणच्छिदं सदा ॥
श्रीमद्व्यासयतीन्द्राय वैष्णवेन्दीवराय ते ।
मध्वदुर्वादिमातङ्गमृगेन्द्राय नमो नमः ॥
यो व्यासमुनिदावाग्निः सच्छास्त्रमरुता सह ।
ददाह कुमतारण्यं प्रकाशाय तमाश्रये ॥
श्रीसुरेन्द्रगुरोः पादपद्मरागस्य पीडनात् ।
रक्ते नखदलोपेते न्द्यौ(से)वे शिष्यार्थिशोभिते ॥
मध्वशास्त्रमहितामरद्रुमादुद्धरत्यखिलतन्त्रवित्सताम् ।
बुद्धयेऽद्य नवमञ्जरीमिमां विद्वदिन्द्रविजयीन्द्रसंयमी ॥
दूष्य एव परोक्तांशो मितैश्शब्दैरनूद्यते ।
दूषणञ्चोच्यते तत्र विदाङ्कुर्वन्तु सूरयः ॥

अथातो ब्रह्मजिज्ञासा । अत्र तद्विजिज्ञासस्वेत्याद्येतत्सूत्रमूलभूतमनन-विधिवाक्यानुसारायावैयर्थ्याय च कर्तव्येति पदमध्याहार्यम् ।

* * * *

अन्ये तु भामतीरीत्या तावद्वेदान्तविचार आरब्धव्यो न वेति संशयः । पूर्वपक्षस्तु—न तावद्विचारस्य ब्रह्म विषयः; प्रत्यगात्मन एव ब्रह्मत्वात् तस्य च अहमिति प्रकाशमानत्वेनासंदिग्धत्वात् । नाप्यविद्यानिवृत्तिः प्रयोजनम् ;

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

तत्र वैदिकाश्शब्दाश्चतुर्विधा अन्यत्रैवप्रसिद्धा अन्यत्रप्रसिद्धा उभयत्रप्रसिद्धास्तत्रप्रसिद्धाश्चेति . . . . . . . . . . .
समन्वयं प्रति बाधकन्तु उभयत्रप्रसिद्धाः एषां ब्रह्मण्यप्रसिद्धिरन्यत्र.

---

No. 4835. मायावादखण्डनम्.

MĀYĀVĀDAKHANḌANAM.

**Pages, 2.** Lines, 8 on a page.

Begins on fol. 10*b* of the MS. described under No. 4781.

Complete.

A work by Ānandatīrtha which criticises unfavourably the view of the Advaitins that Māyā is the cause of the phenomenal universe.

**Beginning:**

नरसिंहोऽखिलज्ञानमतध्वान्तदिवाकरः ।
जयत्यमितसज्ज्ञानसुखशक्तिपयोनिधिः ॥

विमतमनारम्भणीयम् अन्यथाप्रतिपादकत्वात् यदित्थं तत्तथा यथा सम्प्रतिपन्नम् । न हि ब्रह्मात्मैक्यस्य याथार्थ्यम्; तत्पक्षे अद्वैतहानेः स्वरूपातिरेके; अनतिरेके स्वप्रकाशत्वात् आत्मनस्सिद्धसाधनता ।

**End:**

महतः परमव्यक्तमव्यक्तात्पुरुषः परः ।
पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः ॥

भूम्नः क्रतुवज्ज्यायस्त्वम् । तथाच दर्शयति—इति विष्णोस्सर्वोत्तमत्वेन सर्वशास्त्रार्थत्वेन भगवता श्रुत्या च अभिहितम् ।

इति सर्वस्व(ज्ञ)मुनिना मायावादतमोऽखिलम् ।
निरस्तं तत्त्ववादेन सतां संशयनुत्तये ॥
नास्ति नारायणसमं न भूतं न भविष्यति ।
एतेन सत्यवाक्येन सर्वार्थान् साधयाम्यहम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितं मायावादखण्डनं समाप्तम् ॥

---

No. **4836.** मायावादखण्डनव्याख्या.

MĀYĀVĀDAKHAṆḌANAVYĀKHYĀ.

**Pages**, 16. Lines, 7 on a page.

Begins on fol. 56*b* of the MS. described under No. 4782.

Incomplete.

A commentary on the Māyāvādakhaṇḍana of Ānandatīrtha; by Jayatīrtha.

**Beginning:**

नरसिंहमसद्योरुप्रत्यूहतिमिरापहम् ।
प्रणिपत्य व्याकरिष्ये मायावादस्य खण्डनम् ॥

इह हि विविधसांसारिकदुःखदर्शनेन विरक्तस्य शमदमादिमतो मुमुक्षोराधिकारिणः तन्निवृत्तये परमानन्दावाप्तये च सकलजीवजडात्मकत्वात् प्रपञ्चात् परमार्थत ये(ए)वात्यन्ताभिन्नं निखिलगुणोदारं निरस्तसमस्तदोषं परब्रह्म प्रतिपादयितुं सकलश्रुतिस्मृतितदुपकरणभूतब्रह्ममीमांसायाश्च प्रवृत्तिरिति तत्त्वम् ।

**End:**

इति विष्णोः पुरुषोत्तमत्वमेव सर्वशास्त्रार्थत्वेन भगवता श्रुत्या चाभिहितम् । एवं प्रकरणार्थमुपपाद्य तस्य प्रयोजनमाह ।

इति सर्वज्ञमुनिना मायावादतमोऽखिलम् ।
निरस्तं तत्त्ववादेन सतां संशयनुत्तये ॥

अन्यथा हि विप्रतिपत्तेः संशयो भवति । प्रकरणार्थमुपसंहरन् तदनुगुणं भगवद्वाक्यं पठति—

नास्ति नारायणसमं न भूतं न भविष्यति ।
एतेन सत्यवाक्येन सर्वार्थान् साधयाम्यहम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वचनप्रसूनमाला जयतीर्थाख्येन भिक्षुणा चरि(रचि)ता ।
भ्रियतां हृदये सदये कमलामहिलेन पुरुषेण ॥

**Colophon :**

इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचितस्य मायावादखण्डनस्य जयतीर्थमुनिविरचितं व्याख्यानं समाप्तम् ॥

---

## No. 4837. मायावादखण्डनव्याख्या.

### MĀYĀVĀDAKHAṆḌANAVYĀKHYĀ.

**Pages**, 22. Lines, 5 on a page.

Begins on fol. 22*a* of the MS. described under No. 4787.

Complete.

Same work as the above.

---

## No. 4838. मायावादखण्डनव्याख्या.

### MĀYĀVĀDAKHAṆḌANAVYĀKHYĀ.

**Pages**, 5. Lines, 10 on a page.

Begins on fol. 10*a* of the MS. described under No. 4783.

Wants beginning.

Complete.

Same work as the above.

---

## No. 4839. वादावलिः.

### VĀDĀVALIḤ.

**Pages, 28.** Lines, 6 on a page.

Begins on fol. 65*a* of the MS. described under No. 4793.

Incomplete.

A controversial pamphlet in support of Dvaita-Vēdānta ; by Jayatīrtha.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning**:

नमोऽगणितकल्याणगुणपूर्णाय विष्णवे ।
सत्याशेषजगज्जन्मपूर्वकर्त्रे मुरद्विषे ॥

अनुवाद्यं(ननु कथम्) सत्यता जगतोऽङ्गीकाराधिकारिणी? विमतं मिथ्या दृश्यत्वाज्जडत्वात्परिच्छिन्नत्वाच्छुक्तिरूप्यवत् इत्यनुमानविरोधादिति चेन्मैवम्—मिथ्यात्वानिरुक्तेः । तत्किमनिर्वचनीयत्वमसत्त्वं वा, साद्विविक्तत्वं वा, प्रमाणाविषयत्वं वा, अप्रमाणविषयत्वं वा, अविद्यातत्कार्ययोरन्यतरत्वं वा, स्वात्यन्ताभावसमानाधिकरणत्वं वा? नाद्यः विकल्पासहत्वात्; तथाहि—किमनिर्वचनीयत्वं निर्वचनविरहः, किं वा निर्वाच्यविरहः? नाद्यः स्वाभ्युपगतव्यवहारविषयत्वविरोधात् ।

**End**:

किं च ब्रह्मणि प्रपञ्चस्यारोपितत्वं वदन्नन्यत्र प्रपञ्चस्य सत्तामङ्गीकरोति न वा? आद्ये प्रपञ्चस्य सर्वमिथ्यात्वप्रतिज्ञाहानिः । न चेत्कस्य कुत्रारोपः? न हि शशविषाणं क्वचिदारोप्यते । नास्माभिः अन्यत्र सतः प्रपञ्चस्य ब्रह्मण्यारोपोऽभिधीयते । (ये)न सर्वमिथ्यात्वप्रतिज्ञाहानिरापद्य(ये)त.

---

## No. 4840. वि·णुतत्त्वनिर्णयः.

## VIṢṆUTATTVANIRṆAYAḤ.

Substance, paper. Size, 8½ × 4½ inches. Pages, 66. Lines, 10 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete in 3 Paricchēdas.

Herein Ānandatīrtha argues out and establishes the conclusion that Viṣṇu is the Supreme Being.

**Beginning**:

सदागमैकविज्ञेयं समतीतक्षराक्षरम् ।
नारायणं सदा वन्दे निर्दोषाशेषसद्गुणम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विशेषणानि यानीह कथितानि सदुक्तिभिः ।
साधयिष्यामि तान्येव क्रमात्सज्जनसंविदे ॥
ऋगाद्या भारतं चैव पाञ्चरात्रमथाखिलम् ।
मूलरामायणं चैव पुराणं चैतदात्मकम् ॥
ये चानुयायिनस्त्वेषां सर्वे ते च सदागमाः ।
दुरागमास्तदन्ये ये तैर्न ज्ञेयो जनार्दनः ॥
ज्ञेय एतैस्सदा युक्तैः भक्तिमद्भिस्सुनिष्ठितैः ।
न च केवलतर्केण नाक्षजेन च केन चित् ॥

**End:**

अतो निश्शेषदोषवर्जितः पूर्णानन्तगुणो नारायण इति सिद्धम् ॥

यस्य त्रीण्युदितानि वेदवचने रूपाणि दिव्यान्यलं
बट्तद्दर्शनमित्थमेव निहितं देवस्य भर्गो महत् ।
वायो रामवचोनयं प्रथमकं पृक्षा द्वितीयं वपु-
र्मध्वो यत्तु तृतीयमेतदमुना ग्रन्थः कृतः केशवे ॥
स्वतन्त्रायाखिलेशाय निर्दोषगुणरूपिणे ।
प्रेयसे मे स(सु)पूर्णाय नमो नारायणाय ते ॥

**Colophon:**

इति श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीमद्विष्णुतत्त्वनिर्णये निर्दोषाशेषसद्गुणत्वसमर्थनं नाम तृतीयपरिच्छेदः समाप्तः ॥

प्रजोत्पत्त्यब्दके मासि ज्येष्ठे कृष्णबुधे दिने ।
पञ्चम्यां तु प्रदोषे तु लेखनेन समापितः ॥
प्रशाख्या रङ्गनाथेन वि णुतत्त्वविनिर्णयः ।
सर्वे प्रीणन्तु भगवान् प्रीणातु च दयां मयि ॥
कृत्वा तु मच्छ्रमं ज्ञात्वा योऽभूल्लेखनतस्सदा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4841. विष्णुतत्त्वनिर्णयः.
## VIṢṆUTATTVANIRṆAYAḤ.

Pages, 20. Lines, 7 on a page.

Begins on fol. 17*a* of the MS. described under No. 4781.

Breaks off in the first Paricchēda.

Same work as the above.

---

## No. 4842. विष्णुतत्त्वनिर्णयः.
## VIṢṆUTATTVANIRṆAYAḤ.

Pages, 14. Lines, 10 on a page.

Begins on fol. 1*a* of the MS. described under No. 4783.

Wants beginning.

Same work as the above.

---

## No. 4843. विष्णुतत्त्वनिर्णयव्याख्या.
## VIṢṆUTATTVANIRṆAYAVYĀKHYĀ.

Pages, 52. Lines, 9 on a page.

Begins on fol. 140*a* of the MS. described under No. 4102.

Wants beginning and end.

A commentary on the Viṣṇutattvanirṇaya of Ānandatīrtha; by Jayatīrtha.

**Beginning:**

. . तीत्यादौ तदप्रतीतेरिति बोध्यम्। भट्टाचार्यसम्मतिमाह—तदुक्तमिति। अभिधापदस्य करणव्युत्पत्त्या लिङ्गादिपरत्वे षष्ठीसमासः, भावनापरत्वे कर्मधारय इति बोध्यम्। अभिधां भावनामिति पाठः प्रामादिकः। न्यायसुधायां समस्तपदत्वेन व्याख्यानात्। अर्थविषयकत्वमिति। यथाश्रुते बाधादिति भावः।

* * * *

प्रतिबन्धकत्वं यदि कार्यानुत्पादव्याप्यत्वं तदिष्ट[त्व]मेव; अनुमितौ व्यभिचारज्ञानादीनामिव तत्प्रतिबन्धकस्य कृतिसाध्यताज्ञानकरत्वाविरोधादिति।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

ननु कारणं प्रति प्रमाजनको वेदः; प्रकृते च वैरिविषयबलवद्वेषवतोऽनधिकारित्वादतः प्रामाण्यदोष इति शङ्कते--न चेति । इच्छा नास्तीति । इष्टसाधनताज्ञानस्य इच्छासामग्र्यां सत्त्वादित्यर्थः । ननु अन्यतममिति । वेदार्थस्य निष्ठाशून्यमि(त्वादि)ति भावः । सर्वत्रेति । मुमुक्षोः तत्र इच्छाविरहादित्यर्थः । अधिकारिणं प्रति वेदस्य प्रामाण्यात्.

---

## No. 4844. सत्तत्त्वरत्नमाला.

## SATTATTVARATNAMĀLĀ.

Substance, paper. Size, $10\frac{1}{4} \times 4\frac{1}{4}$ inches. Pages, 52. Lines, 9 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Begins on fol. 1*b*. The other work herein is Sattattvaratnamālāṭīkā 28*b*.

Complete.

A treatise in verse on the nature of the various categories accepted by Mādhvācārya and his followers; by Ānandatīrthavara, son of Viṭṭhalācārya.

**Beginning:**

नारायणं गुणगणार्णवमात्मतन्त्रं निर्दोषमब्जजमुखैः परिसेविताङ्घ्रिम् ।
मोक्षाद्यशेषपुरुषार्थदमिन्दिरेशं श्रीमध्वदेवपरमेष्टमहं नमामि ॥

व्यासञ्च विज्ञानसहस्रभानुं रामं स्वभक्तार्णवपूर्णचन्द्रम् ।
कृष्णञ्च सम्पूर्णगुणाम्बुराशिं वन्दे रमां मध्वमुनिं तथा गुरून् ॥

श्रीमध्वदेवकृतशास्त्रपयोब्धिगेषु सत्तत्त्वरत्ननिकरेषु कियन्ति बुद्धौ ।
संस्थापितानि गुरुभिर्मम तानि मालां वाक्सूत्रकेन(ण)हरयेऽर्पयितुं करोमि ॥

जयति श्रीरामनाथः सम्पूर्णामितसद्गुणः ।
यदधीनामिदं विश्वमस्वतन्त्रं सदैव हि ।
अस्वतन्त्रं प्रमेयन्तु भावाभावात्मना द्विधा ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



.प्राकप्रध्वंससदात्वेन त्रिविधोऽभाव इष्यते ।
चेतनोऽचेतनश्चेति भावश्च द्विविधः स्मृतः ॥
अचेतनं त्रिधा प्रोक्तं नित्यश्चानित्यमेव च ।
नित्यानित्यश्चेति नित्यं सर्वव्याप्तमुदाहृतम् ॥
नित्यास्तु वेदवर्णाश्च परमाकाश एव च ।
पञ्चाशता हि वर्णानां क्रमाद्योगैः परस्परम् ॥
अनन्तानाञ्च वेदानां स्थितिरित्यतिकौतुकम् ।
ईश्वराचिन्त्यशक्त्यैव घटना केवलं भवेत् ॥
मूलवेदऋगादिश्च तथावान्तर एव च ।
शाखोपशाखाभेदेन वेदोऽनेकविधो मतः ॥

**End :**

अनन्तानन्तरूपेण गायन् ध्यायन् सदा हरिम् ।
अमन्दानन्दसन्दोहो रमते हर्यनुग्रहात् ॥
एवं विमुक्तास्सर्वेऽपि पुनरावृत्तिवर्जिताः ।
ध्यायन्तः कमलानाथं मोदन्ति च रमन्ति च ॥
इत्थं ह्यनन्तमुक्ताश्च मुक्तिमेष्यन्त्यनन्तकाः ।
यस्य प्रसादमात्रेण स हरिर्मे प्रसीदतु ॥
अनन्तानन्तकल्याणपरिपूर्णगुणात्मकः ।
कमलारमणो नित्यं पातु मां करुणार्णवः ॥
शास्त्राब्धिवृद्धिपूर्णेन्दुः गीर्वाणगणसेवितः ।
वाणीप्राणप्रियः पातु मध्वाख्यप्राणनायकः ॥
श्रीविष्णुतीर्थाम्बुजनामतीर्थत्रिविक्रमार्यादिमहानुभावान् ।
भजे सुपूर्णप्रमितिप्रसादप्राप्तप्रसादप्रतिभाप्रगल्भान् ॥
दुर्वादिमत्तेभमहाङ्कुशं लसच्छ्रीमध्वशास्त्राम्बुजदिव्यसंह(हंस)म् ।
गुणाब्धिमज्ञानतमोनि(नु)देशं जयार्यमीडे सुजनाब्धिचन्द्रम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमन्नृसिंहार्यमुखेन्दुबिम्बात्स्रवत्सुतत्त्वामृतपानतृप्तम् ।
नारायणार्यावनिदेवमीडे सज्ज्ञानसिद्ध्यै परमं गुरुं मे ॥
अन्तस्तमोहरमनन्तसमाश्रयं श्रीमध्वार्यशास्त्ररतसज्जनकञ्जबन्धुम् ।
व्याख्याप्रभाप्रकटितामलतत्त्वसङ्घं श्रीविट्ठलार्यतरणिं शरणं प्रपद्ये ॥
ये ये सुपर्णमतिशास्त्रमहापयोब्धि(धि)सुव्यक्तविष्णुमहिमामृतभोगतृप्ताः ।
तेषां महासुमनसां पदपांसुपूरैः पूतो भवामि सततं स्वभिषिक्तदेहः ॥

* * * *

श्रीविट्ठलार्यतनुजेन यथावबोधमानन्दतीर्थवरनामयुजा कृतायाम् ।
सत्तत्त्वरत्ननिकरोत्त(त्क)रमालिकायां श्रीमत्फलप्रकरणं परिपूर्णमञ्जः ॥
श्रीमध्वशास्त्रसुमहाब्धिगतत्त्वरत्नेष्वल्पैस्सुमन्दमतिना रचितापि माला ।
सन्धार्यतां स्वहृदये कमलाप्रियेण नारायणेन स(त)तं करुणार्णवेन ॥
स्थित्वा मत्संस्थदेवेषु य इमां मालिकां व्यधात् ।
समर्प्य स्वकृतां तस्मिन् प्रीयतां स्वयमेव सः ॥

**Colophon:**

इति श्रीमद्विट्ठलाचार्यवर्यतनूजेनानन्दतीर्थवरनामकेन विरचिता सत्तत्त्वरत्नमाला समाप्ता ॥

---

## No. 4845. सत्तत्त्वरत्नमालाटीका.

### SATTATTVARATNAMĀLĀṬĪKĀ.

Pages, 413. Lines, 9 on a page.

Begins on fol. 28*b* of the MS. described under No. 4844.

Complete.

A commentary on the Sattattvaratnamālā of Ānandatīrthavara.

**Beginning:**

ग्रन्थादौ शास्त्राध्यायचतुष्टयोक्तगुणत्वेन भगवन्तं स्तुवन्नमति — नारायणमिति । आत्मतन्त्रमिति गुणपूर्णत्वाद्युपपादनार्थम् । यथोक्तम् । स्वतन्त्रत्वात् सुखसज्ज्ञानशक्तिगुणैः पूर्णः सर्वदैवाखिलैश्चैवेत्यादिहठवादे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मध्वहनूमद्भीमाख्यरूपत्रयेण विशेषत उपास्यादिरूपत्रयं नमन् गुरूंश्च प्रणमति—व्यासमिति । चिकीर्षितप्रतिज्ञां करोति—श्रीमध्वदेवेति । कियन्ति कानिचित् । अल्पानीत्यर्थः । तत्त्वनिरूपणाय प्रस्तावयति—जयतीति । अनेन तत्त्वं द्विविधम्—स्वतन्त्रमस्वतन्त्रं चेत्युक्तं भवति । स्वतन्त्रमस्वतन्त्रं चेत्यादि तत्त्वसङ्ख्यानवचनार्थानुवादोऽयम् ।

**End:**

श्रीमध्वनिर्जरवरार्यगुरोः श्रीमदानन्दतीर्थाख्यानां शर्वादिसर्वगीर्वाणमहाचार्यवर्याणां गुरवे । सत्तत्त्वेति । सन्ति निर्दुष्टानि अबाधितानि परापरतत्त्वान्येव रत्नानि । तेषां निकराः समूहाश्च तेषु उत्कराः उद्गतप्रकाशा इति विशेषणस्य परनिपातः । तेषां मालिकायामित्यर्थः । श्रीमध्वशास्त्रेति । यद्यपि श्रीमध्वाचार्यवर्यकृतशास्त्रमहासमुद्रे देवतादुरधिगम्यान्यनन्तानि तत्त्वानि प्रतिपादितानि । अहंतु नानादोषकलुषिततया अत्यल्पाधिकारित्वाच्चाल्पचित्तः । अतः स्वल्पतमान्येव सामान्यतो मयावगतानि तत्त्वानि । तत्समीकरणे च चित्तकौशल्यं नास्ति । एवमल्पमेधसाकुशलेनापि रचिता सत्तत्त्वरत्नमाला असमीचीनापि न भगवदुपेक्षाविषया भवेत् । किन्तु परमकारुणिकतया सह रमया भगवान्नारायणो दिव्यमाणिक्यमालामिव इमामपि मद्वाचकसूत्रप्रोक्तामपि तत्त्वमालां स्वहृदये निधाय मह्यं प्रसीदतामित्याशयः । नैवं समर्पणेऽपि मम स्वातन्त्र्यम्; अपि तु कर्ता अर्पयिता भोक्ता च स्वयमेव । तथापि केवलं कृपावशेनैव प्रीयतामित्याशयवानाह—स्थित्वेति । मयि स्थितेषु तत्त्वाभिमानिषु ब्रह्मादिदेवेषु स्थित्वा ॥

महालक्ष्मीमुखाम्भोजमध्वास्वादनमानसः ।
नारायणस्सदा पातु दीनं मां दीनवत्सलः ॥

क्वाहं सुमन्दधिषणः कलुषी क्व चैतत् शास्त्रं शिवादिविबुधैरधिगम्यमञ्जः ।
वैयात्यमद्भुतमिदं यदहं प्रवृत्तः तत्क्षम्यतां सुरगणैरपराधजातम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्त्वरत्नप्रकाशोऽयं स्वप्रकाशाय विष्णवे ।
समर्पितो मया तेन प्रीयतां कमलापतिः ॥
नमः श्रीसुखतीर्थार्यहृदयाम्भोजवासिने ।
रमाप्रणयिने मोक्षदायिने शेषशायिने ॥

**Colophon :**

इति श्रीमद्विट्ठलाचार्यवर्यतनुजेन आनन्दतीर्थनामकेन विरचितायां सत्तत्त्वरत्नमालिकायां फलप्रकरणं सम्पूर्णम् ॥

---

No. **4846.** सङ्ग्रहरामायणटिप्पणी—भावरत्नप्रदीप्तिः.

SAṄGRAHARĀMĀYAṆAṬIPPAṆĪ : BHĀVARATNA-PRADĪPTIḤ.

Pages, 63. Lines, 11 on a page.

Begins on fol. 119*a* of the MS. described under No. 4832.

Incomplete.

A brief commentary on the Saṅgraharāmāyaṇa of Nārāyaṇa Paṇḍita.

**Beginning :**

शक्तोऽपि यद्यपि जनः शुभसङ्क्रमेण
हस्ताश्रयेण रहितोऽपि बुधः प्रयान्तु(तु) ।
तर्ह्यप्यहं दृष्ट(ढ)मतं सकलैकशक्तं
गन्तुं करोमि कमनीयकरावलम्बम् ॥

विघ्नविघातादिसाधनतयाविगीतशिष्टाचारपरम्पराद्यवगतं नारायण-वन्दनं नारायणभट्टारकः श्रीमतो भगवतः पूज्यपादस्य परमशिष्यभूतः स्वामिनो नारायणस्य प्रापितः स्वाभिमतसिद्ध्ये सकलसज्जनमनस्सन्तोषकर-मवश्यकरणीयं ग्रन्थादौ निबध्नाति—वन्द इति । अहं ब्रह्म वन्द इत्यन्वयः ; वदि अभिवादनस्तुत्योरिति धातोरित्यप्य(यम)र्थो ग्राह्यः । ब्रह्मणि जीवास्सर्वेऽपि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्यादिश्रुतेः ब्रह्मशब्दस्य जीवेऽपि श्रवणात् तद्व्रन्दनशङ्कां निवारयितुमाह—नारायणाख्यमिति ।

**End:**

अजस्रम् अखण्डिततया उन्नम्यमनोज्ञनासम् उन्नतमनोहरनासिकायुक्तं कनत्कपोलदीप्य(मान)गण्डमण्डलं नवकुन्ददन्तं कुन्दकुट्मलसमानदन्तपङ्क्ति-युक्तं रम्यभ्रूमुखं मनोहरभ्रूयुक्तमुखं स्निग्धस्मितं रमणीयमन्दहाससहितम् आततान चकार विस्मितमकरोत् ।

---

## No. 4847. सर्वमूलाद्यन्तश्लोकसङ्ग्रहः.

## SARVAMŪLĀDYANTAŚLŌKASAṄGRAHAḤ.

Substance, palm-leaf. Size, 9 × $1\frac{7}{8}$ inches. Pages, 9. Lines, 9 on a page. Character, Nandināgarī. Condition, good. Appearance, old.

Begins on fol. 63*a*. The other work herein is Ṛgbhāṣya 1*a*.

Complete.

Contains the beginning and end of the various original treatises produced by Ānandatīrtha.

**Beginning:**

जयत्यब्जभवेशेन्द्रवन्दितः कमलापतिः ।
अनन्तविभवानन्दशक्तिज्ञानादिषड्गुणः ॥

नृसिंहमखिलाज्ञानतिमिराशिशिरद्युतिम् ।
सम्प्रणम्य प्रवक्ष्यामि कथालक्षणमञ्जसा ॥

आनन्दतीर्थमुनिना ब्रह्मतर्कानुसारतः ।
कथालक्षणमित्युक्तं प्रीत्यर्थं शार्ङ्गधन्वनः ॥

ईश—

नित्यानित्यजगद्धात्रे नित्याय ज्ञानमूर्तये ।
पूर्णानन्दाय हरये सर्वयज्ञभुजे नमः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यस्माद्ब्रह्मेन्द्ररुद्रादिदेवतानां श्रियोऽपि च ।
ज्ञानस्फूर्तिस्सदा तस्मै हरये गुरवे नमः ॥

* * * *

पूर्णागण्यगुणोदारधाम्ने नित्याय वेधसे ।
अमन्दानन्दसान्द्राय प्रेयसे विष्णवे नमः ॥

अशेषगुरुमीशेशं नारायणमनामयम् ।
संप्रणम्य प्रवक्ष्यामि प्रमाणानां स्वलक्षणम् ॥

अशेषमानमेयैकसाक्षिणेऽक्षयमूर्तये ।
अशेषपुरुहूतेड्य नमो नारायणाय ते ॥

**End:**

लक्ष्मीकान्तसमन्ततो विकलयन्नैवेश(शि)तुस्ते समं
पश्याम्युत्तमवस्तु दूरतरतोऽपास्तं रसो योऽष्टमः ।
यद्रोषोत्करदक्षनेत्रकुटिलप्रान्तोत्थिताग्निस्फुरत्-
खद्योतोपमविस्फुलिङ्गभसिता ब्रह्मेशशक्रोत्कराः ॥

**Colophon:**

इति श्रीमदानन्दतीर्थभगवत्पादविरचितानां सप्तत्रिंशत्संख्याकाना-
माद्यन्तश्लोकसङ्ग्रहः सम्पूर्णः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## 3. VIŚIṢṬĀDVAITA-VĒDĀNTA.

---

### No. 4848. अद्वैतकालानलः.
### ADVAITAKĀLĀNALAḤ.

Substance, palm-leaf. Size, $20\frac{1}{8} \times 1\frac{5}{8}$ inches. Pages, 142. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 66*a*. The other work herein is Advaitavidyāvijaya 1*a*.

Incomplete.

A criticism of the view of the Advaita-school of Vēdānta that the Brahman referred to in the Vēdānta is none other than the Attributeless Pure Being.

**Beginning:**

निर्विशेषब्रह्मणि वेदान्तानां समन्वयो न सम्भवति; निर्धारितैकप्रकारकनिश्चयं प्रत्येव धर्मिज्ञानाधीनविचारस्य जनकत्वात्, विचारसध्रीचीनवेदान्तवाक्यजन्यज्ञानस्य निष्प्रकारकत्वानुपपत्तेः ! ब्रह्मजिज्ञासासूत्रे अस्ति तावत् ब्रह्म नित्यशुद्धबुद्धमुक्तस्वभावं सर्वज्ञं सर्वशक्तिसमन्वितं ब्रह्म; ब्रह्मशब्दस्य हि व्युत्पाद्यमानस्य नित्यत्वशुद्धत्वादयो ह्यर्थ इति सर्वज्ञत्वादिधर्मविशिष्टब्रह्मणो जिज्ञास्यत्वबोधकभाष्यानुपपत्तेश्च, निष्प्रकारकज्ञानीयविषयताया अपि विशेषरूपतया तस्य निर्विशेषब्रह्मणि निर्विशेषत्वभञ्जकत्वापत्तेः ।

**End:**

हेयगुणप्रसक्तिश्च आत्मत्वादिसाधारणधर्मात् । न च सार्वज्ञ्यादीनामप्रसक्तत्वात्तत्प्रसक्त्यर्थं सगुणवाक्यमिति वाच्यम्; तर्हि अग्नीषोमीयपश्वालम्भनस्याप्रसक्तत्वात्; प्रसक्त्यर्थं तद्वाक्यमिति तुल्यमिति कारणत्वेन सार्वज्ञ्यादिप्रसक्तिरिति स्वोक्तिविरोधः । यदि सार्वज्ञ्यादिकमप्रसक्तम्; तर्हि प्रक्षालनाद्धीति न्यायेन अप्रसञ्जनमेव वरम् । तस्मान्न निषेधवाक्यैकवाक्यत्वसम्भव इति महाचार्याः प्राहुः.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4849. अद्वैतखण्डनम्.

## ADVAITAKHAṆḌANAM.

Substance, palm-leaf. Size, 16¼ × 1¼ inches. Pages, 77. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Samāsavādārtha 39*a*, Sakṛnnamaskārasamarthana 47*a*.

Wants beginning and end.

An unfavourable criticism of some of the leading principles of Advaita-Vēdānta.

**Beginning :**

विवादे अनादौ संसारे यस्य कस्यचिदेकस्य मुक्तौ सर्वमुक्तिप्रसङ्गः । इदानीं संसारोपलम्भ . . . . . . . .

अत्र वदन्ति परे—

न ह्यसाम्प्रदायिकत्वमुत्पत्तिविरोधि । अपूर्वजातीयानुत्पत्तिप्रसङ्गात्; किन्तु . . . . . . . . . प्रमाणसिद्धत्वे संसारोपलम्भ एव; अतः पूर्वं तत्त्वज्ञानानुदयप्रमाणमिति एतद्दूषणम् । तत्र विधिरूपाणि विशेषणानि चिन्तितानि, इह तु प्रतिषेधरूपाणि इति विशेषः । प्रपञ्चार्थश्चायं चिन्ताभेद इति विधिरूपविशेषणत्वेनानन्दादीनां प्रतिपादनात्तद्विरोधापत्तिः । यदि चान(न्दादि)धर्मान्वयेऽपि सद्विद्यादौ निर्गुणब्रह्मविद्यात्वमित्यभिमानः; तर्हि कुतो वा संयद्वामत्वादिगुणान्वयशाल्यन्तरिक्षविद्यादिषु न निर्गुणब्रह्मविद्यात्वाभिमानस्तव न जातः?

* * * *

न हीश्वरस्सर्वगतो न भवति; अवच्छिन्नाभिन्नत्वात्सर्वगतत्वोक्तौ घटस्यापि सर्वगतत्वं वक्तुं सुकरमिति ईश्वरस्य घटतुल्ययोगक्षेमत्वापत्तिः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तस्माज्जीवेश्वरयोरैक्यमनुपपन्नमेवेति पारमार्थिकभेदस्वीकारावश्यम्भावादद्वैत-भङ्गः ।

**End:**

वेदान्तानां मिथ्यात्वाच्च तत्प्रतिपाद्यब्रह्मणस्सत्यत्वं दुर्घटम्—इति विजयोक्तरीत्या मानान्तरसंवादाभावविशिष्टदोषमूलकत्वज्ञानजन्यत्वनिश्चये सत्यप्रमात्वनिश्चयावश्यम्भावात् ।

* * * *

व्याप्यसन्देहस्य व्यापकसन्देहजनकता च व्यापकनिश्चयसामग्री-शून्यदशायामेव; अन्यथा व्याप्यसन्देहदशायामपि व्यापकनिश्चया-पत्तेः.

---

## No. 4850. अद्वैतविद्याविजयः.

## ADVAITAVIDYĀVIJAYAḤ.

Substance, paper. Size, $13\frac{1}{2} \times 8\frac{1}{2}$ inches. Pages, 128. Lines, 20 a page. Character, Telugu. Condition, good. Appearance, new.

Incomplete.

A treatise which supports Viśiṣṭādvaita-Vēdanta and criticises unfavourably the views of the Dvaita and Advaita schools of Vēdānta.

By Rāmānujadāsa otherwise known as Mahācārya.

**Beginning:**

द्वैतोपनिषदा सार्धं श्रुतयोऽद्वैतगोचराः ।
घटकश्रुतिसंयुक्तास्सद्विद्यामनुरुन्धते ॥

द्वैतश्रुतिभिश्चिदचिदीश्वरभेदप्रतिपादनेन विशेषणविशेष्यभेदः प्रति-पाद्यते । घटकश्रुतिभिर्विशेषणविशेष्यवैशिष्ट्यमद्वैतश्रुतिभिश्च तादात्म्य-मिदं सर्वमिति कृत्स्नस्यापि भगवदात्मकत्वप्रतिपादनेन सिद्धं विशिष्टा-द्वैतं प्रतिपाद्यते । तथाहि—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्वैतश्रुतयस्तावत्प्रश्नोपनिषदि पञ्चमे खण्डे—यः पुनरेतं त्रिमात्रेणो-मित्यनेनैवाक्षरेण परं पुरुषमभिध्यायीत । स तेजसि सूर्ये सम्पन्नो यथा पादोदरस्त्वचा विनिर्मुच्यते । एवं ह वै पाप्मना विनिर्मुक्तस्सा-मभिरुन्नीयते ब्रह्मलोकम् । स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुष-मीक्षत इति जीव एवोचितः परस्तस्मात्परः पुरुषः स सामभिरुन्नीयत इति च मोक्षभेदः प्रतिपाद्यते ।

See under the next number for the end.

---

## No. 4851. अद्वैतविद्याविजयः.

## ADVAITAVIDYĀVIJAYAḤ.

Pages, 130. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 4848.

Same work as the above.

Contains the following three Bhaṅgas.

(१) प्रपञ्चमिथ्यात्वभङ्गः.

(२) जीवेश्वरैक्यभङ्गः.

(३) अखण्डार्थत्वभङ्गः.

See under the previous number for the beginning.

**End :**

अत एवोत्तरतापनीये—

नहीदं सर्वं निरात्मकमिति सर्वात्मकत्वमुक्त्वा आत्मैवेदꣳसर्वमिति सामानाधिकरण्येन निर्देशः । शरीरवाचिशब्दानां शरीरिपर्यन्तत्वं च दृश्यते ; तथा च धर्मवाचिनां धर्मिपर्यन्तत्वमपि । प्रपञ्चस्य ब्रह्मशरीरत्वं तदपृथक्-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सिद्धत्वं श्रुत्यनुग्राहकम् ; अतस्तत्पदं जगत्कारणत्वयोगिब्रह्मपरम् ; अतस्सामानाधिकण्यसामञ्जस्यमिति ॥

**Colophon :**

इति अद्वैतविद्याविजये अखण्डार्थत्वभङ्गः ॥
अद्वैतविद्याविजये भङ्गत्रयं समाप्तिमगमत् ॥

---

## No. 4852. अधिकरणयुक्तिविलासः.

## ADHIKARAṆAYUKTIVILĀSAḤ.

Substance, paper. Size, 11 × 8¾ inches. Pages, 166. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Incomplete.

An explanation of the various arguments and reasonings employed in the Adhikaraṇas or topical sections of the Vēdānta-sūtras.

**Beginning :**

यत्पादाम्बुजसेवया समभवच्छारीरके मे मतिः
यच्छात्रास्तु जयन्ति वादसमये . . . . . ।
. . . . . . . . . . . . . . . . . . . . . .
. . . . . धुरन्धरमहं श्रीश्रीनिवासं गुरुम् ॥
श्रुतप्रकाशिकाभाष्याद्यर्थ एवात्र लिख्यते ।
मादृशां मन्दबुद्धीनां सौकर्यायेति दृश्यताम् ॥

शारीरकमीमांसायां चतुर्लक्षण्यां मुमुक्षुभिर्निरस्तनिखिलदोषगन्धमनवधिकातिशयासङ्ख्येयकल्याणगुणगणं निखिलजगदेककारणं परं ब्रह्म ज्ञातव्यम् ; मोक्षसाधनं च असकृदावृत्तस्मृतिसन्तानरूपं दर्शनसमानाकारमुपासनात्मकं ज्ञानम् ; तत्फलं चार्चिरादिना परं ब्रह्मोपसम्पद्य पुनरावृत्तिरहितस्वस्वरूपाविर्भावपूर्वकानन्तमहाविभूत्यनवधिकातिशयानन्तब्रह्मानन्द इति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतिपाद्यते । तत्र समन्वयाध्याये वेदान्तवाक्यजाते ब्रह्मैव जगत्कारणतया प्रतिपादयतीति स्थाप्यते ।

**End:**

यद्येवं मुण्डके श्रुतं चन्द्रसूर्याद्यभिभावकाप्राकृततेजोरूपः जगत्कारणं वस्त्विह निरतिशयदीप्तियुक्तज्योतिश्शब्दार्थ इति पूर्वपक्षिणा गृह्यते ; कथं तर्हि आदित्यादिकमेव ज्योतिरिति इह पूर्वपक्षः क्रियते? नह्यादित्यादिकमेवादित्याद्यभिभावकमिति वक्तुं शक्यते ; अत्रोच्यते—

न तत्र सूर्यो भातीति मन्त्रेण सूर्याद्यति(भि)भावकत्वं नोच्यते ; किन्तु सूर्याद्यभास्यत्वम् ;

न तत् भासयते सूर्यो न शशांको न पावक इति गीतावचनात् । सूर्याद्यभास्यत्वं च सूर्यादेरपि सम्भवतीति पूर्वपक्ष्याशयः । अत्र विषयवाक्यस्थज्योतिश्शब्दः प्रसिद्धम्.

---

## No. 4853. अधिकरणसारार्थदीपिका.

## ADHIKARAṆASĀRĀRTHADĪPIKĀ.

Substance, paper. Size, 8⅞ × 5½ inches. Pages, 66. Lines, 12 on a page. Character, Dēvanāgarī. Condition, good. Appearance, old.

Complete.

A summary of the contents of the various Adhikaraṇas or topical subdivisions of the Pūrva and the Uttara Mīmāṁsās. The oneness of the Mīmāṁsā as a Śāstra is clearly pointed out here.

By Maṅgācārya Śrīnivāsasūri, a disciple of Samarapuṅgavācārya of Vādhūla-gōtra.

**Beginning:**

श्रियः पतिः परमकारुणिको भगवान् सर्वेषां पुरुषाणामुपादित्सितजिहासितेष्टानिष्टतत्त्वसाधनानां त्याज्योपादेयविभागार्थं हर्तुं मनस्सदसती

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



च विवेक्तुमीशो मानं प्रदीपमिव कारुणिको ददान्ती(ती)त्युक्तरीत्या वेदाख्यं प्रमाणं प्रदायावताराादिमुखेन तद्विषयज्ञानं चोदपादयत् । तच्च ज्ञानं नारायणात्समुत्पन्नं ज्ञानं कृतयुगे स्थितमिति कृतयुगे तेनैवाकारेणावर्तिष्ट । . . . . . . . . . . . . . .

एवं चाथातो धर्मजिज्ञासेत्यारभ्यानावृत्तिश्शब्दादनावृत्तिश्शब्दादित्येवमन्तं भागद्वयात्मकवेदाख्यैकप्रबन्धव्याख्यानतया एकशास्त्रम् । उक्तं च बोधायनेन—

संहितमेतच्छारीरकं जैमिनीयेन षोडशलक्षणेनेति शास्त्रैकत्वसिद्धिरिति । तत्र जैमिनीयेन पशुपुत्रवृष्ट्यन्नस्वर्गाद्यैहिकामुष्मिकफलसाधनधर्मो निरूप्यते । तत्र प्रथमेऽध्याये विध्यर्थवादमन्त्रनामधेयात्मकस्य प्रवृत्तिनिवर्तनप्राशस्त्यतज्ज्ञापनानुष्ठेयार्थप्रकाशनधात्वर्थावच्छे(द)मुखेन धर्मे प्रामाण्यं निरूपितम् ।

* * * *

ततश्शारीरकेणाध्यायचतुष्टयेनोत्तरभागप्रतिपाद्यं ब्रह्म निरूप्यते । (तत्र प्रथम)द्विकेन चेतनाचेतनविलक्षणं निखिलजगदेककारणं ब्रह्मस्वरूपं निरूप्यते ।

**End:**

अनावृत्तिश्शब्दादनावृत्तिश्शब्दादित्यधिकरणे भगवत्स्वातन्त्र्याच्चान्मुक्तस्य पुनरावृत्तिरसम्भवतीत्याशङ्क्य इमं मानवमावर्तं नावर्तन्त इति अनावृत्तिश्रवणात् आश्रितस्यामुग्धस्य भगवतस्तन्निवर्तनसङ्कल्पासम्भवाच्च न मुक्तस्य पुनरावृत्तिरित्युपसंहृतम् ॥

**Colophon:**

वाधूलकुलतिलकश्रीमत्समरपुङ्गवाचार्यसंप्राप्तशोभितकु(श्री)भाष्यहृदयेन मङ्गाचार्यश्रीनिवाससूरिणा विरचितायामधिकरणसारार्थदीपिकायां चतुर्थाध्यायस्य चतुर्थः पादः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4854. अधिकरणसारावलिः.

## ADHIKARAṆASĀRĀVALIḤ.

Substance, paper. Size, 13⅛ × 8⅜ inches. Pages, 172. Lines, 18 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

This summarises the teachings of the Vēdānta-sūtras by condensing the substance of each of the Adhikaraṇas, as found in the Śrī-bhāṣya of Rāmānuja, in one or more stanzas : by Vēṅkaṭanātha otherwise known as Vēdāntācārya.

**Beginning :**

स्वस्ति श्रीरङ्गभर्तुः किमपि दधदहं शासनं तत्प्रसक्त्यै
सत्यैकालम्बि भाष्यं यतिपतिकथितं शश्वदग्धा(ध्या)प्य युक्तान् ।
विश्वस्मिन्नामरूपाण्यनुविहितवता तेन देवेन दत्तां
वेदान्ताचार्यसंज्ञामवहितबहुवित्सार्थमन्वर्थयामि ॥

* * * *

वृत्तिग्रन्थे तु जैमिन्युपरति(चि)ततया षोडशाध्याय्युपात्ता
सङ्कर्षः काशकृत्स्नप्रभव इति कथं तत्त्वरत्नाकरोक्तिः ।
अत्र ब्रूमस्तदुक्तौ न वयमिह मुधा बाधितुं किञ्चिदर्हा
निर्वाहस्त्वपि वचना(स्तूपचारात्क्वचि)दिह घटते ह्येकतात्पर्ययोगः ॥
सौत्री सङ्ख्या शुभाशीरधिकृतिगणना चिन्मयी ब्रह्मकाण्डे
तादर्थ्येऽनन्तरत्वेऽप्यधिकरणभिदानल्पसारे(रैः) प्रकल्प्य(प्या) ।
अक्षोण्या(र्म्या)शाहिकाला(ष्ठा)द्विरदमुनिवसूर्म्यद्रितत्त्वादिदीशा(तिशक्र)-
ध्य(र्ये)क्षैरक्षैः प्रयादै(जै)रिह भवति रसैः पादनीतिप्रबन्धः ॥

* * * *

अथातो ब्रह्मजिज्ञासा ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कार्ये व्युत्पत्तिराद्या नियतमिति गिरस्तत्परा एव सर्वा
नान्या वेदेऽपि गीतिस्तत उपनिषदामूषरप्रायतैव ।
नातस्तद्वेद्यमीमांसनमुचितमिति प्रत्यवस्थीयमाने
सिद्धे व्युत्पत्तिमाद्यां बहुमुखमवयन् ब्रह्म जिज्ञास्यमाह ॥

**End:**

पाराशर्यः प्रभातादुपनिषदमृतोदन्वतस्सारभूतं
निर्मथ्यादत्त सूत्रैरवितथनिगमाचार्यनामा मुनीन्द्रः ।
यत्तन्निष्कृष्टमित्थं यतिपतिहृदयारूढमारूढतार्क्ष्यैः
तद्दक्ता वाजिवक्त्रः स(ह) मम गुरुभिर्वादिहंसाम्बुवाहैः ॥

**Colophon:**

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु अधिकरणसारावल्यां चतुर्थाध्यायस्य चतुर्थः पादः ॥

भाष्यकृतो भाष्यगताधिकरणसारावलिर्मया लिखिता ।
निगमशिखरार्यकृ(रचि)ता निखिल(ा) श्रुत्यन्तलक्ष्मणाख्येन ॥
पठितव्या भागवतैः परितस्सन्तुष्टमानसैस्सुभृशम् ।
नी(ने)तव्या न च कुत्राप्याश्रितवर्गैरपि प्रियैः कल्यैः ॥

आहत्य ग्रन्थसङ्ख्या पञ्चशतोत्तरसहस्रम् ॥ (१,५००)॥

---

## No. 4855. अधिकरणसारावलिः.

## ADHIKARAṆASĀRĀVALIḤ.

Substance, palm-leaf. Size, 15 × 1⅛ inches. Pages, 260. Lines, 5 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Complete.

Same work as the above.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4856. अधिकरणसारावलिः.

## ADHIKARAṆASĀRĀVALIḤ.

Substance, palm-leaf. Size, 17¼ × 1⅜ inches. Pages, 139. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Complete.

Same work as the above.

---

## No. 4857. अधिकरणसारावलिः.

## ADHIKARAṆASĀRĀVALIḤ.

Substance, palm-leaf. Size, 15¾ × 1¼ inches. Pages, 171. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, not old.

Begins on fol. 1*a*. The other works herein are, Mahābhārataparvādhyāyasūcī (showing the number of Adhyāyas in each Parva) 87*a*, Anusmṛti 88*a*, Aupāsanamantra 92*a*, Vaiśvadēvavidhānam 93*a*.

Complete.

Same work as the above.

---

## No. 4858. अधिकरणसारावलिः.

## ADHIKARAṆASĀRĀVALIḤ.

Pages, 155. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 2891.

Complete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4859. अधिकरणसारावलिः.

## ADHIKARAṆASĀRĀVALIḤ.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 47. Lines, 10 on a page. Character, Grantha. Condition, slightly injured. Appearance, not old.

Breaks off in the second Pāda of the third Adhyāya.

Same work as the above.

---

## No. 4860. अधिकरणसारावलिः.

## ADHIKARAṆASĀRĀVALIḤ.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{1}{8}$ inches. Pages, 146. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Breaks off in the fourth Pāda of the 4th Adhyāya.

Same work as the above.

---

## No. 4861. अधिकरणसारावलिः.

## ADHIKARAṆASĀRĀVALIḤ.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 144. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Breaks off in the fourth Pāda of the fourth Adhyāya.

Same work as the above.

---

## No 4862. अधिकरणसारावलिव्याख्या—अधिकारणचिन्तामणिः.

## ADHIKARAṆASĀRĀVALIVYĀKHYĀ : ADHIKARAṆA-CINTĀMAṆIḤ.

Substance, paper. Size, $13 \times 8\frac{1}{4}$ inches. Pages, 355. Lines, 23 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

This is a commentary on the Adhikaraṇasārāvali of Vēdāntācārya; by Varadanātha also known as Kumāra-Vēdāntācārya.

325-A

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

वेदान्ताचार्यसूनुस्सकलगुणनिधिर्वादिदर्पोपहन्ता
विश्वामित्रान्ववाये समुचितमतिमान् सर्वतन्त्रस्वतन्त्रः ।

शास्त्रे ब्रह्मप्रधाने स्वगुरुविरचिताधिक्रियासारपङ्क्ते-
श्चिन्तामण्याख्यटीकां वरदगुरुरयं सुप्रहामातनोति ॥

इह खलु श्रीमान् वेदान्ताचार्यश्शारीरकशास्त्राधिकरणेषु सारतमार्थसङ्ग्रहकपद्यावलीरूपप्रबन्धनिर्माणेन स्वस्य श्रीरङ्गराजदिव्याज्ञालब्धवेदान्ताचार्यसंज्ञामन्वर्थयितुमारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्तिप्रचयगमनार्थमाशीर्वादरूप . . . . . . . . . . . . . . स्वस्त्याशीः क्षेमपुण्यादाविति निघण्टुपाठात् स्वस्तिशब्दः आशीर्वादपरः श्रोतव्यः क्षेमप्राप्त्यादिः सर्वविधाप्याशीरस्त्वित्यर्थः । . . . . . . . . . . . . प्रबन्धस्य विद्यमानत्वात् किमर्थमपूर्वग्रन्थनिर्माणेनेत्यत्राह—श्रीरङ्गभर्तुरिति ।

अयमर्थः—. . . . . . . . वेदान्तशास्त्रं सम्यगभिवर्धयेति श्रीरङ्गनाथस्य दिव्याज्ञां शिरसि निधाय तत्प्रसादार्थं यतिपतिकथितं प्रणीतं सत्यैकालम्बि भाष्यं युक्तानास्तिकान् सर्वानध्याप्य सकलजगन्नामरूपनिर्वाहकेण तेनैव श्रीरङ्गनाथेन विरचितां वेदान्ताचार्यसंज्ञां सकलविद्वज्जन . . . . . . . . . तुं शारीरकाधिकरणसारार्थसङ्ग्रहकपद्यावलीरूपप्रबन्धनिर्माणमिति . . . . . प्रबन्धस्य निरतिशयभोग्यत्वेन शारीरकशास्त्राधिकरणानामुपकारकत्वाविशेषेण ।

**End :**

इत्थं निर्मितस्य स्वग्रन्थस्य प्रथमं पाराशर्यप्रसादलब्धत्वमनुवदन्नध्यात्मसारभूतमकर्तृत्वाभिमानं पुरस्कृत्य स्वाचार्यरूपविशिष्टेन सर्वविद्या-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रवर्तकेन भगवता हयग्रीवेणैव विरचितत्वं ख्यापयति—पाराशर्य इति ।

अयमत्रान्वयः—अवितथनिगमाचार्यनामा मुनीन्द्रः भगवान् पाराशर्यः प्रभूतादुपनिषदमृताम्भोनिधेस्सारभूतमर्थं यत्तद्वेदान्तसूत्रैर्निर्मथ्यादत्त । एवमस्माभिर्निष्कृष्टं भाष्यकारहृदयारूढं तदिदममृतमस्मद्गुरुभिर्वादिहंसाम्बुवाहैस्सह श्रीमान् हयग्रीव एव तद्वक्ता तत् स्वयमेव वक्ता । वक्तेति तृन्प्रत्ययान्तः । तेनात्र द्वितीयानिर्देशः ॥

आविध्य मतिमन्थानं येन वेदमहार्णवात् ।
जगद्धिताय जनितो महाभारतचन्द्रमाः ॥

इति श्लोकार्थो भाव्यः ॥

जयति यतिराजवाणी प्रतिभटसिद्धान्तकर्तनकृपाणी ॥
श्रुतियुवतीनां वेणी दिव्यपदारोहभव्यनिश्श्रेणी ॥
आचार्यैर्निर्मितानामखिलगुरुजनग्रन्थसंवादभाजां
पद्यानामुद्यदर्कप्रतिभटमहसामर्थतत्त्वप्रसिद्ध्यै ।
व्याख्यामाख्याद्विचित्रां वरदगुरुरयं सर्वसिद्धान्तवेदी
वेदान्ताचार्यसूनुर्विमतमतकथावीरसंहारसिंहः ॥

**Colophon:**

इति निखिलतार्किकचूडामणिना सर्वतन्त्रस्वतन्त्रेण श्रीमद्वरदनाथापरनाम्ना (कुमार)वेदान्ताचार्येण विरचिते शारीरकाधिकरणचिन्तामणौ चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

समाप्तश्च चतुर्थाध्यायः ॥

श्रीमल्लक्ष्मणयोगीन्द्रसिद्धान्तविजयध्वजम् ।
विश्वामित्रकुलोद्भूतं वरदार्यमहं भजे ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **4863.** अधिकरणसारावलिव्याख्या–अधिकरणचिन्तामणिः.
ADHIKARAṆASĀRĀVALIVYĀKHYĀ : ADHIKARAṆA-CINTĀMAṆIḤ.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{5}{8}$ inches. Pages, 255. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

Breaks off in the fourth Pāda of the second Adhyāya.

Same work as the above.

---

No. **4864.** अध्यात्मचिन्ता.
ADHYĀTMACINTĀ.

Substance, palm-leaf. Size, $9\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 23. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

A treatise on the nature of the soul in the light of Viśiṣṭādvaita-Vēdānta ; by Saumyajāmātṛ-muni.

**Beginning :**

अस्मद्विधपरित्राणप्रेमपेद्रा(प्रव)णमानसम् ।
वादिकेसरिणं वन्दे सौम्यजामातरं मुनिम् ॥
नमोऽस्त्वस्मद्गुरुभ्यश्च तद्गुरुभ्यस्तथा नमः ।
परमेभ्यो गुरुभ्यश्च निखिलेभ्यो नमो नमः ॥
नमोऽस्तु राममिश्राय पुण्डरीकदृशे नमः ।
नाथाय मुनये नित्यं नमः परमयोगिने ॥
आद्याय कुलनाथाय नमोऽस्तु शठवैरिणे ।
नमस्सेनाधिपतये ज्ञानयाथात्म्यदायिने ॥
श्रियै श्रीज्ञानपायिन्यै जगन्मात्रे नमो नमः ।
श्रीधरायादिगुरवे नमो भूयो नमो नमः ॥
इत्थं सञ्चिन्त्य मनसा शुभां गुरुपरम्पराम् ।
अध्यात्मविषयां चिन्तां करोम्यात्मविशुद्धये ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आत्मा न देवो न नरो न ति(र्यक्पशवो)न च ।
न देहो नेन्द्रियं नैव मनः प्राणो न नापि धीः ॥
न जडो न विकारी च ज्ञानमात्रात्मको न च ।
तथा ज्ञातृत्वकर्तृत्वभोक्तृत्वनिजधर्मकः ॥
परमात्मैकशेषत्वस्वभावस्सर्वदा स्वतः ।

**End :**

. . . . . . . . . . . . भिनिर्दिशन् ।
इत्थं त्वत्सन्निधौ वाचमुक्तां मम दयानिधे ॥
सत्यां कुरुष्व दय . . . . . . प्रतिपादनात् ।
सौम्यजामातृमुनिना सम्यग्दृष्टामिमां सदा ।
चिन्ता(मध्यात्मविषयां) परिचिन्वन्भवेत्सुखी ॥

---

No. **4865.** अभेदखण्डनम्.

ABHEDAKHAṆḌANAM.

Pages, 4. Lines, 9 on a page.

Begins on fol. **169*a*** of the MS. described under No. 3978.

Complete.

A refutation of the theory of the Advaita-Vēdānta which inculcates the oneness of the individual soul with the Supreme Brahman.

**Beginning :**

वेदान्तदेशिककटाक्षविवृद्धबोधं कान्तोपयन्तृयमिनः करुणैकपात्रम् ।
वत्सान्ववायमनवद्यगुणैरुपेतं भक्त्या भजामि परवादिभयङ्करार्यम् ॥

अत्र खलु कश्चित् चिरन्तनसरस्वतीसीमन्तोदन्तानभिज्ञः भेदमहं खण्डयामीति जल्पति । तं प्रति पृच्छामः—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किं करोषि वृथा जल्पान् भेदमहं खण्डयामीति । तदिदं भेदखण्डनं स्वशिरःखण्डनं न जानीषे ; कुतस्तदिति चेत् ? भेदमहं खण्डयामीति खण्डनीयस्य खण्डयितृशिरसश्च भेदाभावेन भेदखण्डनस्य स्वशिरः खण्डनत्वापातात् । किं च भोः किं घटपटयोर्भेदं खण्डयसि ? किंस्विदविद्याब्रह्मणोः ? किं वा दूष्यदूषणयोः ? उत ब्रह्महत्याश्वमेधयोः ? आहोस्वित् वसिष्ठचण्डालादीनाम् ? आद्यः कल्पो न कल्पते—घटपटयोरभेदे घटेन शीतं निवार्येत पटेन पानीयमानीयेत । न द्वितीयः—भवन्मते त्वविद्याया अनिर्वचनीयत्वात्ततो ब्रह्मणो भेदाभावे ब्रह्माप्यनिर्वचनीयं स्यात् ।

**End :**

जीवेश्वरभेदस्य जीवानां परस्परभेदस्य च प्रत्यक्षाद्यविषयत्वात् । यदि कस्य चिद्भेदस्य प्रत्यक्षसिद्धत्वमात्रेण प्रत्यक्षाद्यविषयस्यापि भेदस्य शास्त्राविषयत्वमुच्येत, तर्हि सोऽयं देवदत्त इत्यादौ कस्यचिदभेदस्यापि प्रत्यक्षसिद्धत्वात् सर्वोऽप्यभेदः शास्त्राविषयस्स्यादिति तुल्यमेतत् । तदुक्तं वरदाचार्यैः—

न द्वैतं प्रतिपादयन्त्युपनिषद्वाचः प्रसिद्धं हि तत्
किन्त्वद्वैतमनन्यगोचरतया तद्वेद्यमास्थीयताम् ।
अप्राप्ते खलु शास्त्रमर्थवदिति व्यर्थः प्रयासो यतः
प्रख्यातादितरस्तु शास्त्रविषयो भेदस्त्वदद्वैतवत् ॥

इति सर्वमवदातम् ॥

**Colophon :**

इत्यभेदखण्डनं सम्पूर्णम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4866. अरुणाधिकरणसरणिविवरणी.

## ARUṆĀDHIKARAṆASARAṆIVIVARAṆĪ.

Substance, palm-leaf. Size, 18 × 1⅜ inches. Pages, 127-128. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

A treatise explaining an argument adopted in the Ānandamayādhikaraṇa of the Śrī-bhāṣya of Rāmānuja.

By Śrīnivāsa, son of Śrīnivāsatātārya of Śaṭhamarṣaṇavaṁśa, and disciple of Kauṇḍinya-Śrīnivāsadīkṣita and brother of Aṇṇayārya.

**Beginning :**

ब्रह्माद्वितीयमनपायकृपावलोकं स्तोकेतरस्वगुणभव्यमपव्यळीकम् ।
एकं वशीकृतविचित्रचरित्रलोकं श्रीकान्तमात्तकरुणं शरणं भजामि ॥

विततपयोधरद्युतितरङ्गितमङ्गयुगं
विरचितभास्वदब्जरुचिभङ्गमपाङ्गयुगम् ।
दधदधिसिन्धुसीमिशायितं दयितं जगतां
किमपि मनो धिनोति मिथुनं निरपायधनम् ॥

वैशिष्ट्यं गुणिनां गणैः प्रतिपदं व्यक्तं विविक्तं वदत्
भाष्यं भाष्यकृतां कृतार्थयि(य)तु नः प्राध्वं परध्वंसने ।
दत्ता श्रीनिधिदीक्षितार्यविनतिस्तत्तादृशी मे मतिं
मत्तातांश्च मदग्रजांश्च मखिनः चित्तेऽभियुक्तान्वृणे ॥

सुशोभितारुण्यवशीकृताङ्ग्या कयापि सर्वत्र नवक्रियान्वितः ।
कृतावतारः प्रथिताध्वरोचिषः स कोपि राजा समये समेधताम् ॥

अरुणाधिकरणसरणिर्गुरुणा निरणायि या यतीन्द्रेण ।
तरुणैस्तन्मुक्तैःप(क्तपरि)ष्करणैर्निष्कण्टकं करोम्येनाम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इह तावदरुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणातीत्यत्रारुणापदस्याकृत्यधिकरणन्यायेन गुणमात्रवाचित्वमङ्गीकुर्वन्तो यौगिकैकहायनीपदाद्यवगतगोद्रव्यवदारुण्यमपि क्रयभावनायां करणत्वेनान्वेतीति पूर्वमीमांसका मन्यन्ते । अन्ये तु गुणवाचकतां प्रसाध्यापि तद्विशेषण एव तृतीयाश्रु(श्रु)तिबोधितं प्रकृतक्रयभावनाकरणत्वं कल्पयन्ति ।

भगवद्भाष्यकारास्तु आनन्दमयाधिकरणे समानाधिकरणपदानां विशिष्टैकार्थवृत्तित्वमुपपादयन्तः अरुणापदमपि समभिव्याहृतस्वसमानाधिकरणैकहायनीशब्दबोध्यद्रव्यपरमनुमन्यमाना आरुण्यादिविशिष्टद्रव्यमेव क्रयभावनायां करणमनुगृह्णन्ति ।

तमिमं सैद्धान्तिकं पक्षं व्यवस्थापयितुं प्रकरणमिदमारभ्यते—

पूर्वमीमांसकास्तावदाहुः—अरुणाशब्दोऽयं गुणमात्रवचनः आकृत्यधिकरणन्यायात् । तथाहि शब्दास्त्रिविधाः—जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाश्चेति । तत्र गौरश्वः पुरुषो हस्ती शकुनिर्मृग इत्यादयो जातिशब्दाः । शुक्लो नीलः कपिलः कपोत इत्यादयो गुणशब्दाः याचकः पाचकः पाठकश्चलाचलः पतापत इत्यादयः क्रियाशब्दाः ।

**End :**

नचेह तथा निर्देशोऽस्ति । अतो द्वयोस्समुच्चित्य क्रियाकरणत्वकल्पनं न युक्तमित्यरुणाशब्दस्य विशिष्टपरत्वाश्र(य)णेन विशि . . . . . . . . . श्रित्यैव एकवाक्यत्वसमर्थनेन अस्मदुक्तसिद्धान्तप्रकार एव समीचीन इत्यस्मदुक्तावेव पूर्वोत्तरपक्षौ सूत्रकारानुमताविति भाष्यहृदयविदामभिमतः पन्थाः । यथोक्तन्त . . . . . . गुरुणारुणाधिकरणे —न ह्येकहायन्य(न्वया)योगादारुण्यान्वयमभिधानिक्यमपि त्वापेक्षि(कत्व)तः प्रापितम् ; यद्भूतेऽरुणयेति । केवलगुणं वा द्रव्यनिर्देशवत् वाक्यस्थानागिरस्तु कारकवि . . . . . . . गताः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अरुणाधिकरणसरणिस्समगाणि रामानुजार्यमुनिभिर्या ।
उचितेयमनुचितान्या परिषदि विदुषां स्फुटीभवति ॥
उपात्तेऽपि द्रव्ये पि(वि) सदृशविभक्तिव्यपगमात्
प्रकृत्य . . . . परिणमति खल्वाकृतिनयात् ।
विभक्तिस्त्वर्थैक्यं प्रथयति समानैव पदयो-
स्त्रिरूपा सा सङ्ख्यान्वयमिव दिशेत्कारकधिया ॥

इति ।

* * * *

कौण्डिन्यश्रीनिवासाध्वरिवरगु(रु)णालभ्यसौलभ्यभूम्ना
यज्ज्ञातं यत्त्वधीतं यदगणि सहजादण्णयार्यान्महे(खी)न्द्रात् ।
तस्यांशः कश्चिदस्यां स(हृदय)हृदयानन्ददायी व्यधायी-
त्युज्झन्तो दोषचिन्तामनु(सृत)कृपया क्षन्तुमर्हन्ति सन्तः ॥
यत्तातस्तातयार्यश्शुभगुणगणना(वान्)लक्ष्ममाम्बा यदम्बा
ज्येष्ठस्स्पष्टस्स्वतन्त्रस्स्थितिहितमतिमानण्णयार्यो मखीन्द्रः ।
तेन श्री(शैल)वंशाम्बुधिकृतजनुषा श्रीनिवासेन क्लृप्ता
सैषा श्रीभाष्यभूषा नयमणिकलिकामञ्जरी मञ्जुरीतिः ॥

रञ्जनी यत्र या कुञ्जपुञ्जमञ्जुलताश्रिता ।
(मञ्जरी)यं जरीजृम्भ्यादञ्जनाचलरञ्जने ॥

**Colophon:**

इति श्रीशठमर्षणकुलतिलकश्रीनिवासतातार्यतनूभवकु(कौ)ण्डिन्यश्रीनिवासदीक्षितकृपाकटाक्षलक्षितभा(ष्या)र्थेन निजसहजाण्णयाचार्यदीक्षितचरणपरिचरणाधीताखिलतन्त्रतात्पर्यमर्यादानुबद्धसिद्धान्तपद्धतिना श्रीनिवासविदुषा विनि(र्मिता विद्वत्)सम्मतारुणाधिकरणसरणिविवरणी समाप्ता ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4867. अरुणाधिकरणमञ्जरी.
## ARUṆĀDHIKARAṆAMAÑJARĪ.

Substance, paper. Size, 13 × $8\frac{1}{4}$ inches. Pages, 166. Lines, 22 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Tattvaṭīkā, a commentary of Śrī-bhāṣya 85*a*.

Complete.

Same work as the above. The benedictory verses in the beginning are wanting in this MS.

इत्थं बाधकनिकरैर्ध्वस्तान्मीमांसकांश्च [च] शैवांश्च ।
प्रेक्ष्यान्यथाधिकरणं व्यवृणोत्कृपयाथ भाष्यकृद्भगवान् ॥

**Colophon:**

अरुणाधिकरणमञ्जरी समाप्ता ॥

---

## No. 4868. अस्तिब्रह्मेतिश्रुत्यर्थविचारः.
## ASTIBRAHMĒTIŚRUTYARTHAVICĀRAḤ.

Substance, palm-leaf. Size, $17\frac{3}{8}$ × $1\frac{1}{2}$ inches. Pages, 86. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete.

An enquiry into the meaning of a passage in the Taittirīyōpaniṣad.

By Vigrahaṁ Dēśika.

**Beginning:**

समयमियन्तमसन्तं सन्तं सन्तन्वतीह(ते हि) मां सन्तम् ।
सन्तु निरन्तरचिन्तासन्ततयो मेऽन्तरणणयार्यगुरौ ॥
अकृतकफणितिस्वीकृतमस्ति ब्रह्मेति वेदितुस्सत्त्वम् ।
तद्भेदनस्वरूपं तत्त्वदृशाख्यायि देशिकाख्येन ॥
अन्यैर्विज्ञंमन्यैस्सत्त्वं तन्मुक्तिरूपमित्युक्तम् ।
तत्सर्वथा न युक्तं तर्क्याः कल्पास्तथा परेऽप्यल्पाः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमद्वेङ्कटवीरार्यकृता स्वकृतिपञ्चिका ।
सञ्चिका देशिकाख्येन सन्तोषार्थं विमृश्यते ॥

तत्र तावन्मङ्गलश्लोके अण्णयार्यमिति ख्यातमित्यत्रेतिशब्दपूर्वपदात् द्वितीयाप्रयोगो न साधीयान्; तत्र प्रातिपदिकार्थस्येतिशब्दार्थेऽन्वयेन तत्कर्मकत्वस्य समभिव्याहृतक्रियानन्वयात्कारकाधिकारीयेण कर्मणि द्वितीयेति सूत्रेण द्वितीयाया अप्रवृत्तेः ।

* * * *

तत्र हि सन्तमेनं ततो विदुरिति श्रुतिगततच्छब्देन तदनन्तरपूर्ववाक्यप्रतिपन्नब्रह्मास्तित्वज्ञानमनूद्य तत इति तदुत्तरतसिना तत्साध्यतयावगता सत्ता तादृशश्रुतिगतसच्छब्देन प्रतिपाद्यते ।

**End :**

तथा च तच्छब्दस्य कल्याणगुणविशिष्टब्रह्मास्तित्वज्ञानरूपास्तिक्यवत्परतया तदनन्तरपूर्वगीतबुद्धियोगयुक्तपुरुषपरतयेत्यप्यलममिति प्रतिभाति । तदेवं श्रुत्युक्तसत्ताया ब्रह्मास्तित्वज्ञानरूपताया उपपादिततया परमतनिरसनं मुक्तिरूपताया विस्तरेण निरस्ततया स्वमतस्थापनं च श्रीमद्भिरतिदुष्करमित्यास्तां विस्तरः ॥

---

## No. 4869. आनन्दतारतम्यखण्डनम्.

## ĀNANDATĀRATAMYAKHAṆḌANAM.

Substance, palm-leaf. Size, 13¼ × 1¼ inches. Pages, 11. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is Ṣaṣṭhīdarpaṇa 6*b*. Complete.

An unfavourable criticism of the doctrine held by the followers of Ānandatīrtha that heavenly bliss is of various kinds and degrees.

By Śrīnivāsācārya of Śaṭhamarṣaṇa-gōtra.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

शेषाशेषाय निर्दोषगुणभूषाय शेषिणे ।
निर्मलानन्दनिर्माणधर्मिणे ब्रह्मणे नमः ॥

इह केचिद्देवमनुष्याणां मुक्तानां परस्परमानन्दे तारतम्यमाचक्षते । तद्धि विधानतारतम्यायत्तं दुरपह्नवम् । मुक्तिसाधनं हि ज्ञानम् । तत्तारतम्यं लोकत एवावगतम् । देवानामृषीणां च बहुतरतपश्चर्याप्रतिपादनपुराणावगतं च प्रयत्नाधिक्यं च फलाधिक्यगमकम् । अन्यथा प्रयत्नानर्थक्यप्रसङ्गात् . . . . . . . . . . . . . . .

अतो निर्दोषत्वमात्रेण तत्साम्यमुपपन्नमिति न तेनानन्दसाम्यसिद्धिरिति । अत्र ब्रूमः—अस्तु साधनतारतम्यम्; न तत्स्वाभाविकम्; अपि तु कर्मकृतमिति ।

**End:**

चतुर्वेदशिखावचनं तु मुक्तपरतन्त्रतद्वाचकपदाभावाच्छतानन्दपदं बद्ध एव चतुर्मुखे प्रसिद्धेश्च तत्परमेव । पौराणिकवचनानि तूक्तिविरोधात्परमसाम्यश्रुतिविरोधाच्च सालोक्यादिमुक्तिपराणि वा जीवन्मुक्तपराण्युपासनकालीनानुभवपराणि वा नेयानीत्यन्यत्र विस्तरः ॥

**Colophon:**

इति श्रीशठमर्षणकुलतिलकश्रीनिसाचार्यविरचिते(तं) तारतम्यखण्डनं नाम प्रकरणं सम्पूर्णम् ॥

---

No. **4870.** आनन्दतारतम्यखण्डनम्.

ĀNANDATĀRATAMYAKHAṆḌANAM.

Pages, 19. Lines, 12 on a page.

Begins on fol. 15*a* of the MS. described under No. 4574.

Complete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4871. ओङ्कारवादार्थः.

## ŌṄKĀRAVĀDĀRTHAḤ.

Substance, palm-leaf. Size, 18 × 1¼ inches. Pages, 75. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 13*a*. The other work herein is Brahmalakṣaṇa nirūpaṇa 1*a*.

A Viśiṣṭādvaita-Vēdānta work in which the syllable Ōṁ is shown not to form a part of the first aphorism in the Brahmasūtras.

Complete.

By Śrīnivāsa, son of Śrīnivāsācārya and Lakṣmāmbā and disciple of Kauṇḍinya-Śrīnivāsadīkṣita.

**Beginning:**

मदनकदनवेल्लद्वल्लवीजाललोल-
त्कुचतटघटितोद्यत्कुङ्कुमालङ्कृताङ्गः ।
निगमनिकरचूडाक्रीडलीलानुकूलः
कलयतु शुभगामी कोऽपि कामी मुदं नः ॥
यद्यपि चेदं प्रकरणमुपयुक्तं चन्द्रिकानिराकरणे ।
तदपि प्रथमे सूत्रे प्रणववदाप्नोति किं न पार्थक्यम् ॥

इह कतिचिदतिसाहसिनः प्रथममथातो ब्रह्मजिज्ञासेति ब्रह्ममीमांसोपक्रमसूत्रे सकलैः पठ्यमानमोङ्कारं तदवयवमभिदधति; तदेतत्प्रमाणपथानुवर्तिनो नानुमन्यन्ते । तथा हि—

तस्य तदवयवत्वे न तावत्प्रत्यक्षम्; असम्भवात्, शब्दस्वरूपमात्रग्राहिण(ः) श्रोत्रस्य साधुत्वासाधुत्वयोरिवावयवत्वानवयवत्वयोरुदासीनत्वात् ।

**End:**

तस्मादप्रामाणिकामिदं ध्वान्तमतानुवर्तिनामवयवत्वकथनमिति सर्वं समञ्जसम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमच्छ्रीशैलवंशाम्बुधिशशिकमलावासतातार्यपुत्रः
पौत्रश्चित्रावधानप्रगुणगुणनिधेरण्णयाचार्यनाम्नः ।
स्वाचार्याचार्यसेवासमधिगतहितोदन्तवेदान्ततत्त्वो
व्यातानीच्छ्रीनिवासो नयमणिकलिकां ध्वान्तदौर्गत्यहृच्छ्रीम् ॥

**Colophon:**

इति श्रीशठमर्षणकुलतिलकश्रीनिवासतातार्यनन्दनेन कौण्डिन्यश्रीनिवासदीक्षितकरुणाकटाक्षवीक्षातिशयमीमांसाद्वन्द्वनिर्द्वन्द्वमतिना निजाग्रजाण्णयदीक्षिताचार्यानुग्रहचतुस्तन्त्रीपारावारपारदृश्वना लक्ष्माम्बागर्भशुक्तिमुक्तामणिना श्रीनिवासाचार्यविदुषा विरचितोऽयमोङ्कारवादार्थस्समाप्तिमाससाद ॥

दूरीभवद्दुरितदूषितमानसानामारक्षणाय बहुभावमिवाप्नुवानः ।
नारायणो निखिलदीपकदिव्यधामा संसेव्यतां प्रणवदर्पणमन्दिरेऽस्मिन् ॥

---

## No. 4872. ओङ्कारवादार्थः.

## OṄKĀRAVĀDĀRTHAḤ.

Substance, palm-leaf. Size, $13\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 19. Lines, 10 on a page. Character, Grantha. Condition, injured. Appearance, new.

Incomplete.

Same work as the above.

---

## No. 4873. गीताभाष्यव्याख्या—तात्पर्यचन्द्रिका.

## GĪTĀBHĀṢYAVYĀKHYĀ: TĀTPARYACANDRIKĀ.

Substance, paper. Size, $11 \times 8\frac{1}{4}$ inches. Pages, 163. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

The first Adhyāya complete, and the second incomplete.

A commentary on the Gītābhāṣya of Śrī-Rāmānujācārya; by Vēdāntadēśika.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

श्रीमान्वेङ्कटनाथार्यः . . सन्निधत्तां सदा हृदि ॥

यतिपरिबृढो यद्गीतानामदर्शयदञ्जसा
निगमपरिषन्नेदीयांसं निरामयमाशयम् ।
जननपदवीयातायातश्रमापहरां धियं
जनयतु स मे देवः श्रीमान् धनञ्जयसारथिः ॥

अनुचितपदवीभिश्चिन्तयित्वा प्रयाता-
न्यलमलमतिमात्रैरत्र चिन्ते(न्ते)विषादैः ।
उपनिषदमुदारामुद्वमन् क्वापि लक्ष्ये
शरणमुपगतान्नस्त्रायते शार्ङ्गधन्वा ॥

सन्तस्सानुग्रहैश्चित्तैस्तमःप्रमथिनीमिमाम् ।
भजन्तु भगवद्गीताभाष्यतात्पर्यचन्द्रिकाम् ॥

श्रीमद्गीतां व्याचिख्यासुरविघ्नपरिपूरणप्रचयगमनार्थं परमाचार्यस्य सङ्ग्रहश्लोकनिर्माणमुखेन तदर्थोपदेष्टृतां तदनुवृत्तेस्स्वाचार्यस्य सम्प्रीणनता-मप्यनुसन्दधानः परमाचार्यभजनरूपं मङ्गलमाचरति—यत्पादाम्भोरुहेत्यादि । यच्छब्देन सर्वोत्तराचार्यगुणपौष्कल्यहेतुकां प्रसिद्धिं सूचयति ।

See under the next number for the end.

---

## No. 4874. गीताभाष्यव्याख्या—तात्पर्यचन्द्रिका.

## GĪTĀBHĀṢYAVYĀKHYĀ : TĀTPARYACANDRIKĀ.

Substance, paper. Size, 11 × 9 inches. Pages, 405. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains the Adhyāyas 10 to 18 complete.

Same work as the above.

See under the previous number for the beginning.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

पट्टुप्रज्ञैरवहितैरपि युष्माभिश्चतुर्भिरप्युपायैरकम्पनीयो नयो ध्रुव-शब्दाभिप्रेत इत्याह—निश्चलेति । मतिर्ममेत्यस्यान्वयार्थमितिशब्दोऽध्याहृतः । ममैवमिति ।

विद्या राजन्न ते विद्या मम विद्या न हीयते ।
विद्याहीनस्तमोध्वस्तो नाभिजानासि केशवम् ॥
मायां न सेवे भद्रं ते न वृथा धर्ममाचरे[त्] ।
शुद्धभावं गतो भक्त्या शास्त्राद्वेद्मि जनार्दनम् ॥

अतस्ते ध्रुवा नैवं मतिः; मम तु एवं समीचिना मतिस्संजातेति भावः ॥

कृष्णस्तत्त्वं परं तत्परमपि च हितं तत्पदैकाश्रयत्वं
शास्त्रार्थोऽयं च षट्कैस्त्रिभिरिह कथितस्तत्र पूर्वत्र षट्के ।
भक्त्यर्थस्वात्मदृष्टेः करयुगलदशामध्यमे भक्त्युपायः
स्वोक्तानुष्ठानवृत्तिं द्रढयितुमखिलं प्रोक्तमन्तेऽप्यशोधि ॥

अध्यायैश्शिष्यमोहस्तदुपशमविधिः कर्मयोगोऽस्य भेदाः
तत्सौकर्यादियोगस्तदु[प]चितमहिमा भूतिकामादिभेदः ।
भक्तिः तन्मूलभूमा भजनसुलभता भक्तिशैघ्र्यादिजीवाः
त्रैगुण्यं शासिताज्ञा तदधिगमपरस्सारवर्गश्च गीतः ॥

इत्यादिस्सर्वयोगो भगवति परमैकान्त्यसंप्रीतियुक्तम्
एषामन्योन्ययोगो भगवति कलया नित्यनैमित्तिकानाम् ।
. . . . . . . . . . . .
त्रिष्वप्येतेषु योगः परममिह फलं वक्तुमन्यत्प्रसक्तम् ॥

शुद्धादेशवशंवदीकृतयतिक्षोणीशवाणीशत-
प्रज्ञातल्पपरिष्कृतश्रुतिशिरःप्रासादमासेदुषीम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नित्यानन्तविभूतिसन्निधिसदासामोददामोदर-
द्वित्रालिङ्गनदौर्ललित्यमिलितोन्मेषा मनीषास्तु मे ॥
तत्त्वं यत्प्रणवे धनञ्जयरथेऽप्यग्रे दरीदृश्यते
तच्चित्तो भुवि वेङ्कटेश्वरकविर्भक्तानुकम्प्यस्सताम् ।
तत्तादृग्गुरुदृष्टिपातमहिमग्रस्तैनसा येन सा
गीताविष्णुपदी यतीश्वरवचस्तीर्थैरवागाह्यत ॥

**Colophon:**

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतौ भगवद्रामानुजविरचितगीताभाष्यटीकायां तात्पर्यचन्द्रिकायामष्टादशोऽध्यायः ॥

श्रीतात्पर्यचन्द्रिका समाप्ता ॥

---

## No. 4875. गीताभाष्यव्याख्या—तात्पर्यचन्द्रिका.

## GĪTĀBHĀṢYAVYĀKHYĀ : TĀTPARYACANDRIKĀ.

Substance, paper. Size, 11 × 9 inches. Pages, 400. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

From the third Adhyāya to the ninth Adhyāya.

Same work as the above.

---

## No. 4876. गीतार्थसङ्ग्रहः.

## GĪTĀRTHASAṄGRAHAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 172*a* of the MS. described under No. 2851.

A clear and short exposition of the contents of the various chapters in the Bhagavadgītā; by Yāmunācārya.

326-A

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

स्वादयन्निह . यामुनाह्वयम् ॥
स्वधर्मज्ञानवैराग्यसाध्यभक्त्येकगोचरः ।
नारायण(:) परं ब्रह्म गीताशास्त्रे समीरितः ॥
ज्ञानकर्मात्मके निष्ठे योगलक्षेषु संस्तुते ।
आत्मानुभूतिसिद्ध्यर्थे पूर्वषट्केन चोदिते ॥
मध्यमे भगवत्तत्त्वं याथार्थ्यव्याप्तिसिद्धये ।
ज्ञानकर्माभिनिर्वर्त्यो भक्तियोगः प्रकीर्तितः ॥
प्रधानपुरुषव्यक्तसर्वेश्वरविवेचनम् ।
कर्मधीभक्तिनि(नी)त्यादिः पूर्वशेषोऽन्तिमोदितः ॥
अस्थानस्नेहकारुण्यधर्माधर्मधियाकुलम् ।
पार्थं प्रपन्नमुद्दिश्य शास्त्रावतरणं कृतम् ॥

**End:**

निजकर्मादिभक्त्यन्तं कुर्यात्प्रीत्यैव कारितः ।
उपायतां परित्यज्य न्यसेद्देवे तु तामभीः ॥
एकान्तात्यन्तदास्यैकातिथ्यन्(थ्यं) पदमवाप्नुयात् ।
तत्प्रधानमिदं शास्त्रमिति गीतार्थसङ्ग्रहः ॥
यत्पदाम्भोरुहध्यानविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोऽहं यामुनेयं नमामि तम् ॥

**Colophon:**

गीतार्थसङ्ग्रहं(हः) सम्पूर्णम्(:) ॥

---

## No. 4877. गीतार्थसङ्ग्रहः.
## GĪTĀRTHASAṄGRAHAḤ.

Substance, palm-leaf. Size, 11⅜ × 1⅜ inches. Pages, 4. Lines, 7 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins on fol. 15*a*. The other works herein are—Sahasranāmāvali 1*a*, Adhikaraṇasaṅgraha 13*a*, Vēdāntakārikāvali 17*a*,

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Aitarēyōpaniṣad 29*a*, Padmākṣatulasīmālikāpratiṣṭhā 33*a*, **Bhakta-vaibhava** 36*a*, Pūjāvaikalyaprāyaścitta 38*a*, Vivāhakāla **45*a*,** Caturvyūhapūjā 46*a*, Prāṇapratiṣṭhāmantra 47*a*, Pratiṣṭhākrama 50*a*, Vēṅkaṭēśāṣṭōttaraśatanāmāvali 86*a*, Nṛsiṁhāṣṭōttaraśatanāmāvali 89*a*, Śaraṇāgativiṣaya 90*a*, Saṁprōkṣaṇavidhi 94*a*, Kūrmādidhyāna 100*a*, Padārthasaṅgraha 103*a*, Ghaṇṭāravaviṣaya 113*a*.

Complete.

Same work as the above.

---

## No. **4878.** गीतार्थसङ्ग्रहः—भगवद्गीताव्याख्या.

## GĪTĀRTHASAṄGRAHAḤ : BHAGAVADGĪTĀ-VYĀKHYĀ.

Pages, 174. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. **2022.**

Complete.

A commentary on the Bhagavadgītā ; by Nārāyaṇa-muni.

The transcription of this manuscript was completed on **the 13th** day of the Āśvina month in the year Bahudhānya.

**Beginning :**

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ॥
श्रीशैलवंशकलशाम्बुधिपूर्णचन्द्रं श्रीराघवार्यपदपङ्कजमत्तभृङ्गम् ।
प्रज्ञानिधिं प्रणतलक्ष्मणशीलमार्यं श्रीतातयार्यगुरुमन्वहमाश्रयामः ॥
श्रीशैलवंश[कलश]म्बुधिपूर्णचन्द्रमा(म)नन्तयार्यस्य सुतं महान्तम् ।
कारुण्यवात्सल्यकृपालवालं श्रीतातयार्यं शरणं भजेऽहम् ॥
यो नित्यमच्युतपदाम्बुजयुग्मरुक्मव्यामोहतस्तदितराणि तृणाय मेने ।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धो रामानुजस्य चरणौ शरणं प्रपद्ये ॥
सञ्चिन्तयेद्भगवतश्चरणारविन्दं वज्राङ्कुशध्वजसरोरुहलाञ्छनाढ्यम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उत्तुङ्गरत्नविलसन्नखचक्रवाळज्योत्स्नाभिराहतमहद्धृदयान्धकारम् ॥

* * * *

वेङ्कटवरदाचार्यस्स जयति शान्त्यादिषड्गुणैकनिधिः ।

यस्याहमत्र जन्मनि चरणौ संश्रित्य लब्धसत्ताकः ॥

श्रियःपतिराखिलहेयप्रत्यनीककल्याणैकतान(:), स्वेतरसमस्तवस्तु-चिदचिद्वस्तुशेषी,

* * * *

सकलमुमुक्षुजनानुजिघृक्षया परमपुरुषार्थलक्षणमोक्षसाधनभूतं सकल-वेदान्तसारतममर्थं प्रकाशयाञ्चकार । एवंरूपभगवत्प्रवृत्तिं जानन्नपि धृत-राष्ट्रः प्रबलतरपापवासनाप्रमृष्टविवेकस्सुयोधनविजयबुभुत्सया सञ्जयं पृच्छति—

धृतराष्ट्र उवाच—

(मू.)

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।

मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥

(व्या).

हे सञ्जय ! धर्मक्षेत्रे धर्मानुष्ठानोपयोगे विशिष्टदेशभूते । कुरुक्षेत्रे कुरुर्नाम पाण्डवधार्तराष्ट्राणां कूटस्थो राजा तस्य क्षेत्रं तस्मिन् कुरुक्षेत्राख्यदेशे । युयुत्सवः योद्धुमिच्छवस्सन्तः । समवेताः सम्मिळिताः । मामका मदीया दुर्योधनादयः । पाण्डवाः पाण्डुतनया युधिष्ठिरादयश्च । किमकुर्वत किं कृतवन्तः ।

सञ्जय उवाच—दृष्ट्वा तु पाण्डवानीकमिति ।

**End:**

नीतिश्च । ध्रुवा निश्चला । इत्येवं मम मतिस्सञ्जाता । तव तु नैवं मतिरस्तीति भावः ॥ अत्र—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विद्या राजन्न ते विद्या मम विद्या न हीयते ।
विद्याहीनस्तमोध्वस्तो नाभिजानाति(सि) केशवम् ॥

मायां न सेवे भद्रं ते न वृथा धर्ममाचरे ।
शुद्धभावं गतो भक्त्या शास्त्राद्वेद्मि जनार्दनम् ॥

इति ग्रन्थद्वयोक्तं सञ्जयधृतराष्ट्रयोः परस्परवैलक्षण्यम् । मे इत्यत्र विवक्षि . . . . . . चिते यदि कृष्णार्जुनावास्मिन् समये प्रसादनीयौ तवेति फलितार्थः ॥

इति श्रीगीतार्थसङ्ग्रहे अष्टादशोऽध्यायः ॥

कान्तोपयन्तृसूरीं . . . . . यदीरिकाम्(तात्) ।
गीतामहादरीमध्यादयं प्राप्योऽर्थसङ्ग्रहः ॥

गीताशास्त्रमिदं पुण्यं यः पठेत्संयतः पुमान् ।
विष्णोस्तत्पदमाप्नोति भयशोकादिवर्जितम् ॥

* * * *

आत्रेयगोत्रजातेन कृष्णमार्योद्भवेन वै ।
गीतार्थसङ्ग्रहंचा(हश्चा)द्य नृसिंहार्येण लिख्यते ॥

---

No. **4879.** **गीतार्थसङ्ग्रहः—भगवद्गीताव्याख्या.**

GĪTĀRTHASAṄGRAHAḤ : BHAGAVAD-GĪTĀVYĀKHYĀ.

Substance, palm-leaf. Size, $16\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 322. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Addhyāyas 1 to 17 complete, 18th incomplete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4880. गीतार्थसङ्ग्रहरक्षा.

## GĪTĀRTHASAṄGRAHARAKṢĀ.

Pages, 77. Lines, 10 on a page.

Begins on fol. 131*a* of the MS. described under No. 2851.

Complete.

A commentary on the Gītārthasaṅgraha of Yāmunācārya; by Vēdāntadēśika.

**Beginning:**

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

गीतोपनिषदाचार्यं प्रणमे पुरुषोत्तमम् ।
येनावतारिता लोके गीतोपनिषदात्मिका ॥

भाष्यकृत्परमाचार्यं प्रपद्ये यामुनं मुनिम् ।
विशोध्य गीतातत्त्वार्थं कृतो येनार्थसङ्ग्रहः ॥

तस्मै रामानुजार्याय नमः परमयोगिने ।
य(:) श्रुतिस्मृतिसूत्राणामन्तर्ज्वरमशीशमत् ॥

प्रणम्य शिरसाचार्यान् तदादिष्टेन वर्त्मना ।
गीतार्थसङ्ग्रहव्याख्या क्रियते सुमनोमुदे ॥

क यामुनेयस्सर्वज्ञः काहमज्ञानशेवधिः ।
क च तत्सूक्तिगाम्भीर्यं क व्याख्या मन्दधीकृता ॥

आचार्या ह्यत्र कर्तारो न मे कर्म(र्तृ)त्वशेमुषी ।
विलेख्यकरणीभूता साहमस्मिन् विलेखिनी ॥

यद्यस्त्यत्र ह्यनुक्तं वा दुरुक्तं वानसूयतः(वः) ।
कृपया परयोपेताः क्षन्तुमर्हन्ति साधवः ॥

अनाद्यविद्याकर्मवासनारुचिप्रकृतिसम्बन्धैरनादितश्चक्रवत्परिवर्तमान -

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निबिडनीरन्ध्रनिस्सीमनिस्सङ्ख्यदुस्तरतमःप्रचुरदुःखात्मकहेयतमसंसारकुहरे परितो भ्राम्यमाणानविदितोत्तरणोपायाननाकलितवेदान्तार्थानज्ञातात्मस्वरूपानस्मानवलोक्य,

एवं संसृतिचक्रस्थे भ्राम्यमाणे स्वकर्मभिः ।
जीवे दुःखाकुले विष्णोः कृपा काप्युपजायते ॥

इत्युक्तरीत्या सञ्जातकारुण्येन भगवता

* * * *

सर्वचेतनानुजिघृक्षयार्जुनशोकापनोदनव्याजेन सर्वोपनिषत्सारभूतमध्यात्मशास्त्ररूपगीताशास्त्रं भूमाववतारितम् । तत्र भगवता श्रीमद्यामुनमुनिना उपनिषत्सारभूतगीतार्थानामतिनिगूढतया मादृशैर्मन्दमतिभिर्ज्ञातुमशक्यत्वमाशङ्क्य सङ्ग्रहः कृतः । प्रथमश्लोकेन शास्त्रार्थस्सङ्गृहीतः । त्रिभिः श्लोकैष्षट्कत्रयार्थास्सङ्गृहीताः । ततः परमष्टादशभिः श्लोकैरष्टादशाध्यायार्थास्सङ्गृहीताः । शिष्टैः श्लोकैः कर्मयोगज्ञानयोगभक्तियोगतदधिकारिस्वरूपं च प्रपञ्चितमिति क्रमविभागः ।

**End:**

इति गीतार्थसङ्ग्रह इति । इत्थमेव सर्वविशिष्टसम्प्रदायपरम्परागतस्समीचीनो गीतार्थः न पुनरन्यकुदृष्टिभिरुन्नीतः स्वयोगमहिमचुळकितपरमपुरुषविभूतियुगळभग(व)न्नाथमुनिनियोगागतश्रीराममिश्रसकाशात् बहुशास्त्रविद्भिरपि बहुश्रुतस्य भगवद्गीतार्थप्रपञ्चस्य सङ्ग्रह इति मुमुक्षुभिस्सङ्ग्राह्य इति भावः ॥

सारं फल्गुनसारथीयवचसां श्रीयामुनेयोद्धृतं
विस्पष्टैरिति वेङ्कटेश्वरकविर्व्याचष्ट भाष्याक्षरैः ।
यद्वादेषु कुदृष्टिबाह्यकुहनाकोलाहलास्कन्दिभिर्वाग्जालैर्जयघोषणाझणझणैर्विद्राणनिद्रा दिशः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु गीतार्थसङ्ग्रहरक्षा सम्पूर्णा ॥

---

## No. 4881. गीतार्थसङ्ग्रहरक्षा.

## GĪTĀRTHASAṄGRAHARAKṢĀ.

Substance, palm-leaf. Size, 17¼ × 1⅝ inches. Pages, 34. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 117*a*. The other works herein are Pāñcarātrarakṣā 1*a*, Nikṣēparakṣā 75*b*, Rahasyarakṣā 133*a*.

Complete.

Slightly different from the above.

**Beginning :**

मानत्वं भगवन्मतस्य महतः पुंसस्तथा निर्णय-
स्तिस्रस्सिद्धय आत्मसंविदखिलाधीशानतत्त्वाश्रयाः ।
गीतार्थस्य च सङ्ग्रहस्स्तुतियुगं श्रीश्रीशयोरित्यमून्
यद्ग्रन्थाननुसंदधे यतिपतिस्तं यामुनेयं नुमः ॥

श्रीमद्वेङ्कटनाथेन यथाभाष्यं विधीयते ।
भगवद्यामुनेयोक्तगीतासङ्ग्रहलक्षणम् ॥

तत्त्वं जिज्ञासमानानां हेतुभिः सर्वतोमुखैः ।
तत्त्वमेको महायोगी हरिर्नारायणः परः ॥

आलोड्य सर्वशास्त्राणि विचार्य च पुनःपुनः ।
इदमेकं सुनिष्पन्नं ध्येयो नारायणस्सदा ॥

इत्यादिभिः तत्त्वहितरूपं समासादध्यात्मशास्त्रसारार्थमृषयः सञ्जगृहुः । तदेतदुभयं सर्वोपनिषत्सारसङ्कलनात्मिकायां भगवद्गीतायां प्रतिपाद्य-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तया प्रदर्शयंस्तत्र तत्राप्युपनिषदां तत्त्वप्राधान्यस्य शारीरके सूत्रितत्वादिहापि तत्प्रधानतया व्यपदिशति ॥

---

## No. 4882. चिदचिदीश्वरतत्त्वनिरूपणम्.

## CIDACIDĪŚVARATATTVANIRŪPAṆAM.

Substance, paper. Size, $11\frac{1}{4} \times 8\frac{3}{4}$ inches. Pages, 31. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 17*a*. The other works herein are Viśiṣṭādvaita-siddhānta 1*a*, Aṣṭādaśarahasyārthavivaraṇa 35*a*.

Complete.

An investigation into the nature of the soul, the world and Īśvara.

By Varadanāyaka-śūri.

**Beginning :**

श्रीमत्त्रय्यन्तसिद्धान्तगुरुपुत्रेण वर्ण्यते ।
सत्त्वोत्तरप्रसादार्थं तत्त्वत्रयनिरूपणम् ॥

यतिपतिमतनिष्ठान्यामुनार्यप्रबन्धैरधिगतपरमार्थानास्तिकान्प्रीणयिष्यन् ।
चिदचिदधिपतीनां चिन्तनाय प्रबन्धं व्यतनुत वरदार्यः सर्वतन्त्रस्वतन्त्रः ॥

सर्वतो नारायणस्य चरणावुपायत्वेनोपेयत्वेनाभिगच्छतां प्रथमं प्रकृत्यात्मभावादिनिवृत्त्यर्थं तत्त्वत्रयनिरूपणं कर्तव्यमेव । तत्त्वत्रयमित्यचेतनं जीवः प्रव(प)रश्च कथ्यते । तत्र तत्त्वमिति प्रामाणिकत्वेनाभिधीयते । तच्च द्विविधम्—द्रव्यमद्रव्यं चेति । तत्राद्रव्यं दशविधं भवति—सत्त्व[रत्त्व]रजस्तमश्शब्दस्पर्शरूपरसगन्धास्संयोगश्शक्तिः—इति दशविधमद्रव्यम् । द्रव्यं षड्विधम्—अव्यक्तः, कालः, जीवः, ईश्वरः, नित्यविभूतिः, धर्मभूतज्ञानम्—इति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End :**

एवंविधप्रतिबोधाभावेऽपि एकदेशज्ञानमात्रेणापि भरसमर्पणं कुर्वेतामीदृशप्रतिबोधः परमकारुणिकस्य भगवतः प्रसादात्काले भविष्यति । सर्वमवदातम् । इदं सर्वमप्यर्थजातं द्रविडदेशवासिनामाचार्यैस्तद्भाषया प्रणीते तत्त्वत्रयचुळके सङ्ग्रहेणाभिहितम् । सकलदेशवासिनामपि विदुषामवगमायास्माभिस्संस्कृतभाषया सम्यगुपपादितम् ॥

* * * *

वरदगुरुरवादीद्राव(दू)काग्रयायी गुरुजनपरतन्त्रस्सर्वतन्त्रस्वतन्त्रः ।
चिदचिदधिपतीनां चिन्तनाचक्रमेतत् प्रणिहितहरिचक्रान् प्रीणयन् प्राणभाजः ॥

चिदचिदीश्वरतत्त्वनिरूपणं वरदनायकसूरिनिगुम्भितम् ।
परमपूरुषभक्तिपरायणाः प्रतिपदं परिपश्यत सूरयः ॥

**Colophon:**

समाप्तोऽयं ग्रन्थः ॥

---

## No. 4883. जिज्ञासादर्पणः.

## JIJÑĀSĀDARPAṆAḤ.

Substance, paper. Size, $8\frac{1}{2} \times 6\frac{5}{8}$ inches. Pages, 134. Lines, 14 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

An elaborate investigation into the meaning of the word Jijñāsā in the first aphorism in the Vēdānta-Sūtras.

By Śrīnivasa, son of Śrīnivāsatātārya and Lakṣmamba, and the disciple of Kauṇḍinya-Śrīnivāsadīkṣita.

**Beginning :**

भवबन्धं जिहासन्तो यमन्तरसं . . . . . . ।
जिज्ञासन्ते सदा सन्तस्तमनन्तमुपास्महे ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुरून् कृपागुरून् नत्वा धृत्वा च तदनुग्रहम् ।
सतां सन्तोषमाधित्से जिज्ञासादर्पणार्पणात् ॥

इह तावत् त्रय्यन्तसन्ततिसमर्थनाय प्रवृत्तेन भगवता बादरायणेन प्रणीतानि ब्रह्मसूत्राणि । तेषां परकीयव्याख्यानप्रत्याचिख्यासया भवभयाभितप्तभुवनभागधेयवैभवभावितावतरणो भगवान् भाष्यकारः प्रववृते । तत्रेदमादिमं सूत्रम्—अथातो ब्रह्मजिज्ञासा । तत्र जिज्ञासाशब्दो मीमांसाशब्दवद्विचारे रूढ इति केचित् । प्रमितिरूपफलेच्छारूपया जिज्ञासयार्थादाक्षिप्तो विचार इत्यपरे । इच्छाया इष्यमाणप्रधानत्वादिष्यमाणं ज्ञानमिह विधीयत इति श्रीमद्भाष्यकाराः । तेषामयमा[तेषामयमा]शयः—

तत्र नाद्यः पक्षो युक्तः; ज्ञाधातोरिच्छायामार्थ(धातुकस्य)धातोः कर्मणस्समानकर्तृकादिच्छायां वेति सनो विधानेन ज्ञानेच्छाया एव तदर्थतौचित्यात् ।

**End:**

अतः कर्मसमाराध्यो वेदार्थश्च हरिर्यतः ।
अधीत्य वेदान् कर्माणि विचार्यैतद्विचिन्तनम् ॥

युक्तमित्यथशब्दार्थस्तदानन्तर्यमेव नः ।
अतश्शब्दोऽपि तस्यैव हेतुभावाभिधायकः ॥

अधीत्य कर्मा(सा)ज्ञान्निगमान्विचार्य कर्मास्थिरस्वल्पफलं प्रधार्य ।
तस्मादकस्मात् प्रविरज्य कार्य(ा)पर्यायतो ब्रह्मविचारणा(यैः) ॥

**Colophon:**

इति श्रीशैलकुल(तिलक)ताताचार्यनन्दनेन लक्ष्माम्बागर्भशुक्तिमुक्तामणिना कौण्डिन्यश्रीनिवासदीक्षितकरुणाकटाक्षवीक्षा . . . . निजाग्रजाण्णयाचार्यदीक्षितानुग्रहगृहीतचतुस्तन्त्रनियन्त्रितस्वान्तेन श्रीनिवास विदुषा विरचितं जिज्ञासादर्पणं समाप्तम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4884. ज्ञानयाथार्थ्यवादः.
## JÑĀNAYĀTHĀRTHYAVĀDAḤ.

Pages, 50. Lines, 7 on a page.

Begins on fol. 34*a* of the MS. described under No. 3121.

Complete.

A Viśiṭṣādvaita-Vēdānta work which supports the view that our perceptive knowledge of things accords with reality; by Anantārya, a resident of Yādavādri (Mélkōṭe).

**Beginning:**

जगज्जन्मस्थेमप्रविलयमहानन्दलहरी-
निदानं श्रीकान्तं निरुपधिककारुण्यजलधिम् ।
समाराध्य श्रीमद्यतिपतिमतं तन्यत इदं
मतीनां याथार्थ्यं यदि(दु)गिरिजुषानन्द(न्त)विदुषा ॥

ज्ञानत्वव्यापकं याथार्थ्यमिति वेदान्तसिद्धान्तः । यद्यपि नैयायिकमतेऽपि "सर्वं ज्ञानं धर्मिण्यभ्रान्तं प्रकारे तु विपर्ययः" इतिन्यायेन भ्रमस्यापि धर्म्यंशे प्रमात्वाङ्गीकारात्तद्वति तत्प्रकारकत्वरूपयाथार्थ्ये ज्ञानत्वव्यापकत्वमक्षुण्णम्; तथापि ज्ञानत्वनिरूपितप्रतियोगिवैयधिकरण्याघटितव्यापकत्वस्य सिद्धान्त्यभिमतस्य नैयायिकैरस्वीकारान्न दोषः; धर्मितावच्छेदकांशे प्रमात्वस्य निरुक्तव्यापकतानाश्रयत्वात् । उक्तञ्च जिज्ञासाधिकरणे भाष्ये—

यथार्थं सर्वविज्ञानमिति वेदविदां मतमिति ॥

अत्र सर्वशब्देन प्रतियोगिवैयधिकरण्य(ा)घटितज्ञानत्वनिरूपितव्यापकत्वमेव विवक्षितम् ।

**End:**

अत एवाद्वैतवादिभिरपि प्रत्यक्षस्थले अनिर्वचनीयख्यातिः परोक्षेऽन्यथाख्यातिरङ्गीकृतेत्यादिकं वादान्तरे प्रपञ्चितमिति सर्वमवदातम् ॥

**Colophon:**

इत्यनन्ताचार्यकृतिषु ज्ञानयाथार्थ्यवादः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

---

## No. 4885. ज्ञानयाथार्थ्यवादः.

## JÑĀNAYĀTHĀRTHYAVĀDAḤ.

Substance, paper. Size, 11 × 8¾ inches. Pages, 39. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 22*a*. The other works herein are Mōkṣakāraṇatāvāda 1*a*, Pratijñāvādārtha 11*a*.

Complete.

Same work as the above.

---

## No. 4886. ज्ञानरत्नप्रकाशिका.

## JÑĀNARATNAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 16⅓ × 1¼ inches. Pages, 66. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Incomplete.

By Śrīnivāsācārya, son of Tātayadēśika and brother of Aṇṇayārya.

This work obviously aims at showing that worship and meditation of the Brahman lead to the final deliverance of the soul.

**Beginning:**

श्रीकान्तकरुणालोकस्तोकान्तरितवैभवान् ।
टीकाचार्यान्नमस्कुर्मो लोकोत्तरगुणोत्तरान् ॥
वाचामगोचराचारचातुरीचारुचेतसे ।
प्राचीनां शिरसो वाचामाचार्यायास्तु मे नतिः ॥
दुर्नयारम्भसंरम्भनिर्णयोन्मूलनक्षमान् ।
अंण्णयार्यान्नमाम्यस्मत्पितन् तातयदेशिकान् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यतो मया समग्राहि समग्रा भाष्यफक्किका ।
श्रीनिवासमखीन्द्रांस्तान् शिरसा शरणं वृणे ॥
प्रणम्य पूर्णपाण्डित्यानण्णयार्यान्निजाग्रजान् ।
क्रियते श्रीनिवासेन ज्ञानरत्नप्रकाशिका ॥
प्राचां ग्रन्थेष्वनुक्तानामप्युक्तानां च सर्वशः ।
सङ्ग्रहात् सुखबोधाच्च ग्राह्या प्राज्ञैरियं कृतिः ॥

इह तावदनवरतपरमपुरुषध्यानादेव सकलसांसारिकभयनिवृत्तिपूर्वकपरब्रह्मानन्दानुभवरूपमपवर्गमामनन्ति श्रुतयः—

ब्रह्मविदाप्नोति परम् । तमेवं विद्वानमृत इह भवति । ज्ञात्वा देवं मुच्यते सर्वपाशैः । ध्यात्वा मुनिर्गच्छति भूतयोनिम् । समस्तसाक्षि तमसः परस्तादित्यादिकाः ।

**End :**

अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ।

इत्यारभ्य,

आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
ता यदस्यायनं पूर्वं तेन नारायणस्स्मृतः ॥

इत्यन्तेनाराध्यस्वरूपमभिधाय.

---

## No. **4887.** णत्वचन्द्रिका.

## ṆATVACANDRIKĀ.

Substance, palm-leaf. Size, $16\frac{7}{8} \times 1\frac{1}{2}$ inches. Pages, 28. Lines, 6 on a page. Character, Telugu and Grantha. Condition, slightly injured. Appearance, new.

Begins on fol. 19*a*. The other works herein are Navakōṭi 1*a*, Paramukha-capēṭikā 7*a*.

Complete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Herein the author establishes that the syllable Ṇa makes it impossible to interpret the word Nārāyaṇa to mean Śiva, and that the word denotes Viṣṇu and none other than Viṣṇu; by Tirupputkuḻi Kṛṣṇatātaācārya, son of Dēśika.

**Beginning:**

रघुकुलजलधेरुदितो विमलः पूर्णो विधुस्सदा जयति ।
यत्पादोद्भवममृतं शिरसा धृत्वा शिवश्शिवो भवति ॥

वकुळभूषणपादसरोरुहप्रवणमानससंयमिशेखरम् ।
कलयतो निगमान्तगुरोः पदे कृतधियै गुरवे करवै नमः ॥

लक्ष्मीकुमारतातार्यवंशाब्धिहिमदीधितेः ।
देशिकस्य सुतः कृष्णः कुरुते णत्वचन्द्रिकाम् ॥

उपबृंहणदर्शितया नारमयनं यस्येत्यादिव्युत्पत्त्या शिवपरो नारायणशब्दस्साधुर्न वेति विप्रतिपत्तिः । अत्र विधिकोटिश्शैवानाम् । निषेधकोटिरौपनिषदानाम् । अयश्च णं च अयणे । नारे नरसम्बन्धिनी अयणे शुभावहविधिज्ञाने यस्मात्स इति व्युत्पत्त्या शिवपरनारायणशब्दस्य साधुताया उभयसम्प्रतिपन्नतया विधौ सिद्धसाधनस्य निषेधे बाधस्य च वारणाय तृतीयान्तम् ।

**End:**

तस्मात्सर्वथा उक्तनिर्वचनात् नारायणशब्दस्य शिवे रूढिर्न सम्भवतीति । तथा च नारमयनं यस्येत्यादिव्युत्पत्त्या शिवपरस्य नारायणशब्दस्य व्याकरणाविहितकार्यघटिततया साधुत्वं न सम्भवत्येवेति सिद्धम् ॥

**Colophon:**

श्रीशैलकृष्णसुधिया रचिता णत्वस्य चन्द्रिका सेयम् ।
कलयतु कुवलयमखिलं हृष्टं चामोदमेदुरं च सदा ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **4888.** णत्वदर्पणः.

NATVADARPANAH

Pages, 32. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 3140.

Complete.

By Śrīnivāsācārya, disciple of Kauṇḍinya-Śrīnivāsa.

Similar to the above.

**Beginning:**

सद्ब्रह्मात्मादयश्शब्दास्सर्वकारणवाचिनः ।
पर्यवस्यन्ति यत्रैनं नारायणमुपास्महे ॥
णत्वं वेदान्तसिद्धान्तव्यवस्थापकतां नयन् ।
अङ्गं शृङ्गं श्रुतेर्यस्तु व्याचक्रे तं नमाम्यहम् ॥

इह तावत्सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्म (ब्रह्म)वा इदमग्र आसीत् आत्मा वा इदमेक एवाग्र आसीत् . . . . . छागपशुन्यायेन सामान्यशब्दानां विशेषशब्दानुरोधित्वेन न्याय्यम् ।

**End:**

एवं चोत्तरपदत्वे चेत्यन्यपदान्तविधिविषयत्वाण्णत्वस्य पदान्ते निषिद्धत्वेन क्वापि पदान्तविधित्वाभावादपदान्तस्य मूर्धन्य इत्याधिकारमाश्रित्य पदान्तस्येति सूत्रं णत्वं च प्रत्याचक्षाणेन भाष्यकारेण तथैवोक्तत्वात्तत्र प्रत्ययलक्षणनिषेधाभावादन्तर्वर्तिनीं विभक्तिमाश्रित्य तत्र पदत्वाविघातान्न कथं चन नाराय(ण)शब्दे सूत्रान्तरेण णत्वप्राप्तिरिति पूर्वपदादित्येव णत्वस्य वक्तव्यत्वात्तस्य च संज्ञामात्रविषयत्वादसाधारण्यं तस्य दुर्वारमिति तेनैव सर्वेषां वेदान्तवाक्यानां पर्यवसानं युक्तमिति निष्कण्टकोऽयं घण्टापथः ॥

नारायणपदे णत्वं संज्ञात्वैकान्तिकं यतः ।
तेन नारायणो विष्णुर्नान्ये मन्ये शिवादयः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कौण्डिन्यश्रीनिवासार्यमखिनो निखिलार्थदान् ।
अस्मद्भाष्यगुरून् शश्वद्विश्वश्रेयःप(प्र)दान्नुमः ॥
अग्रजानुग्रहोपात्तशास्त्रविस्तृतबुद्धिना ।
श्रीनिवासेन विदुषा निर्मितं णत्वदर्पणम् ॥

---

## No. 4889. णत्वदर्पणः.

## NATVADARPANAH.

Substance, palm-leaf. Size, $14\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 38. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol. 1*a*. The other works herein are Paratattvanirṇaya 21*a*, Śrīvicāra (Maṇipravāla) 46*a*.

Complete.

Same work as the above.

---

## No. 4890. णत्वदर्पणः.

## NATVADARPANAH.

Substance, palm-leaf. Size, $15\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 24. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is Navakōṭi 13*a*.

Complete.

Same work as the above.

---

## No. 4891. तत्त्वनिर्णयः.

## TATTVANIRṆAYAḤ.

Substance, palm-leaf. Size, $17\frac{5}{8} \times 1\frac{1}{2}$ inches. Pages, 40. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Śiśupālavadha 21*a*.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Complete.

A treatise in support of the view that Viṣṇu is the Supreme Brahman of the Vēdānta.

By Varadārya.

**Beginning :**

श्रीमद्रामानुजमुनिवरैर्यामुनाद्यैर्मुनीन्द्रै-
रप्याचार्यैर्बहुभिरपरैर्विस्तरेणाभ्यधायि ।
विष्णुस्तत्त्वं परमिति परन्यायमन्वादिवाक्यैः
व्यक्तार्थाभिः श्रुतिविततिभिस्तद्वयं संक्षिपामः ॥

अत्रैवं साध्यते—नारायणः परं ब्रह्मेति । अत्र पूर्वपक्षी मन्यते रुद्र एव सर्वस्मात्परं तत्त्वमिति । तथाहि—यतो वा इमानीत्यादिना जगत्कारणमेव परं तत्त्वमित्यवगम्यते । तच्च कारणं किमित्यपेक्षायां छान्दोग्ये सदेव सौम्येदमग्र आसीदित्यनेन वाक्येन जगत्कारणं सच्छब्द-वाच्यमिति प्रतीयते ।

**End :**

न च स ब्रह्मा स शिव इत्याद्यभेदोपदेशात् ब्रह्मादीनां नारायणेन स्वरूपैक्यमाशङ्कनीयम्; स्रष्टृत्वसृज्यत्वार्च्यत्वार्चकत्वादिभेदव्यपदेशात् । अभेदव्यपदेशस्तु तदात्मत्वनिबन्धन इति प्रागेवोक्तम् । श्रुत्यन्तराण्येव-मप्युक्तरीत्या नेतव्यानि । अतस्सर्ववेदेषु वेदान्तेषु च सर्वस्मात्परत्वेन प्रति(पाद्यमानं)ब्रह्म नारायण एव; न ब्रह्मरुद्रादिरिति सिद्धम् । तदेवं प्रत्यक्षश्रुतिभिर्नारायणस्यैव परत्वावगमात् पौरुषेयवचसान्तदनुरोधेनैव प्रामाण्यात्तदनुरोधि(धी)न्येव पुराणादीनि श्रुत्युपबृंहणतयोपादेयानि । किञ्च नारायणपराणां पुराणानां सत्त्वमूलतया प्रामाण्यम् । इतरेषां रजस्तमो-मूलतया अप्रामाण्यञ्च पुरुषनिर्णये सुव्यक्तमुक्तम् । तस्मान्नारायण एव मुमुक्षुभिर्जिज्ञास्यं परं ब्रह्मेति सिद्धम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

वात्स्यश्रीदेवराजार्यनयनानन्ददायिना ।
वरदेन कृतस्तत्त्वनिर्णयः श्रुतिसम्मतः ॥
शुक्लाब्दे वृश्चिके मासे राकायां भृगुवासरे ।
वात्स्येन रङ्गनाथेन लिखितस्तत्त्वनिर्णयः ॥

---

## No. 4892. तत्त्वभास्करः.

## TATTVABHĀSKARAḤ.

Substance, palm-leaf. Size, 18⅜ × 1½ inches. Pages, 482. Lines, 8 on a page. Character, Grantha and Telugu. Condition, slightly injured. Appearance, old.

Pūrvabhāga, complete in 12 Prakaraṇas; Uttarabhāga breaks off in the 4th Prakaraṇa and contains also Prakaraṇas 7 and 8.

This is a Viśiṣṭādvaita-Vēdānta work; by Pēlāpūr-dīkṣita.

The subjects treated of herein are given below :—

पूर्वभागः—

१. मायादिशब्दार्थनिर्णयः.
२. ब्रह्मरुद्रजनकत्वसमर्थनम्.
३. भगवतस्सर्वेनन्तव्यत्वसमर्थनम्.
४. भगवतो गायत्रीप्रतिपाद्यत्वप्रतिपादनम्.
५. भगवतस्सर्वकर्मसमाराध्यत्वसमर्थनम्.
६. कल्याणगुणसम्पत्तिप्रदर्शनम्.
७. द्रमिडोपनिषत्प्रामाण्यसमर्थनम्.
८. नारायणोपनिषदो भगवत्परत्वसमर्थनम्.
९. वीरप्रमाणप्रदर्शनम्.
१०. निषेधोपसंहारिप्रदर्शनम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



११. निरपेक्षोपबृंहणम्.

१२. तप्तमुद्राधारणम्.

उत्तरभागः—

१. ऊर्ध्वपुण्ड्रस्य सर्वपरविद्यासाधारण्यसमर्थनप्रकरणे साधकोपन्यासः.

२. ऊर्ध्वपुण्ड्रस्य सर्वपरविद्याङ्गत्वसमर्थनप्रकरणे बाधकपरिहारः.

३. अनेन जीवेनेतिश्रुत्यर्थनिरूपणसमर्थनम्.

७. देवताधिकरणम्.

८. आकृत्यधिकरणम्.

**Beginning :**

. . . . . . . . . .

. . . . . . . . . .

समग्रहरिमूर्तयस्समुदितास्समस्तैर्गुणैः
विलक्षणशुभाश्रया विविधपूरुषार्थप्रदाः ।
तथापि रणपुङ्गवे दधति वैभवं वैभवं
रमेमहि रमामहीपरिबृढे परे ब्रह्मणि ॥
अरिष्टतातिः स्वयमाश्रितानामनन्तकल्याणगुणाम्बुराशिः ।
आम्नायमूर्ध्नी गुरुराविरासीदस्मत्कृतैरच्युततोषणौघैः ॥
विद्यासु धर्म्यासु महावदान्यो वादाहवे वीररसावतारः ।
आम्नायचूडागुरुरस्मदार्यः क्षेमङ्करैर्नश्शरणं कटाक्षैः ॥
भद्रभक्त्यमृतपूरपूरितः सामवेदगुरुपक्षसद्गतिः ।
भव्यमावहतु देवराड्गुरुः कामरत्ननिधियोगिपद्मभाक् ॥
पेलापूर्दीक्षितेनैष रामानुजमताप्रियः ।
काशा(वाद)नक्षत्रमालाख्यः क्रियते तत्त्वभास्करः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इह तावदयमर्थः प्रतिपाद्यते—मायादिशब्दा ये . . . . . . . . . तेषां सर्वेषां विवक्षितार्था वैदिकैरेव वाक्यशेषैः प्रदर्श्यन्त इति । वैदिकपदार्थोऽपि हि वाक्यशेषाभावादि . . . . . . . . . . . . . . रेव मायाशब्दार्थ इति ।

**End:**

शारीरभाष्यप्रतिपादितरीत्यैवाकृतिवर्णनं युक्तमिति स्थितम् ॥

**Colophon:**

इति तत्त्वभास्करे पेलापूर्दीक्षितविरचिते उत्तरभागे आकृत्यधिकरणं नाम प्रकरणमष्टममादितो विंशं समाप्तम् ॥

---

## No. 4893. तत्त्वभास्करः.

## TATTVABHĀSKARAḤ.

Substance, palm-leaf. Size, 18½ × 1⅜ inches. Pages, 118. Lines, 8 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Wants beginning and end.

Same work as the above.

---

## No. 4894. तत्त्वमार्ताण्डः—ब्रह्मसूत्रव्याख्या.

## TATTVAMĀRTĀṆḌAḤ: BRAHMASŪTRAVYĀKHYĀ.

Substance, paper. Size, 13¼ × 8⅜ inches. Pages, 776. Lines, 27 on a page. Character, Telugu. Condition, good. Appearance, new.

The first Adhyāya complete.

A commentary on the Brahmasūtra.

It criticises the Candrikā of Vyāsatīrtha and supports the Śrībhāṣya of Rāmānuja.

By Śrīnivāsa, son of Śrīnivāsatātārya and Lakṣmī of Śrīśaila family and disciple of Aṇṇayadīkṣita.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

रामानुजार्यं वेदान्तदेशिकं प्रणमाम्यहम् ।
श्रीवासं परकालं च वीरराघवदेशिकम् ॥

श्रीशैलवंशकलशाम्बुधिपूर्णचन्द्रमाचार्यदीक्षितगृहीतसमस्तशास्त्रम् ।
ख्यातं दिशासु महनीयगुणाम्बुराशिं वन्दामहे जयवराभिधदेशिकेन्द्रम् ॥

भ्राता तस्याभिजातानुपमनिपुणधीस्सर्वतन्त्रस्वतन्त्र-
स्त्राता नैतादृशोऽन्यो निगमशिरस इत्याहिमाद्र्या च सेतोः ।
जाताभिख्यो विभाति प्रतिमतकथकाटोपनीहारचण्ड-
ज्योतिर्भूतप्रतापो विमलगुणनिधिः श्रीनिवासार्यवर्यः ॥

प्रायच्छन्निजवैश्वदेवसमये माध्वैस्समभ्यर्थितः
कारुण्याच्छतदूषणीनिगदितान्दोषान्परोच्चाटनान् ।
तेषां वीक्ष्य तु चन्द्रिकादिषु पुनर्दर्पान्धतां तादृशीं
वेदान्तार्यविभावसुस्समजनि श्रीश्रीनिवासात्मना ॥

वेदान्तार्यशिखामणिः किमथ वा श्रीभाष्यकारो भवे-
दाहोस्वित्खलनिग्रहाय स हयग्रीवावतारोऽपरः ।
इत्थं पण्डितमण्डलीबहुमतं श्रीश्रीनिवासाभिधं
वन्दे देशिकसार्वभौममनिशं वादीभकण्ठीरवम् ॥

प्रपद्ये तत्त्वमार्तण्डं ध्वान्तविध्वंसनं शुभम् ।
यत्प्रभावान्निरस्ताभूच्चन्द्रिका माध्वजीविनी ॥

जगज्जन्मस्थेमाप्ययनियमनामेयमहिमा
नतत्रातीभीतिप्रदमृदुळकारुण्यपटिमा ।
त्रयीशृङ्गाभङ्गप्रगुणगुणसर्वस्वगरिमा
रमानेता चेतःपदमिदमुपैतु प्रतिपदम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्रयीमयीं दुग्धमदुग्ध [मदुग्ध] यो मुनिः पयस्विनीं सूत्रमिषादशेषतः ।
विपच्य चातश्चय(च्य) विमथ्य यो ददौ तदर्थगव्यं प्रणमामि तावुभौ ॥

त्रयीशिखरपद्धतिं परदुरुद्धतेरुद्धरन्
अपार्थपरकत्थनान्यपि कदर्थयन्नर्थतः ।
समस्तपथगायिना समुदगायि यो व्यास इ-
त्यमुं जितकुदर्शनं हृदि सुदर्शनं भावये ॥

* * * *

अद्वैतशुष्कतरुदुस्स(स्त)रहव्यवाहमद्वन्द्वविद्वदवतंसस(म)मंसतान्ये ।
शेषाविशेषमपि यं ज्ञपयन्त्यशेषास्तं वेङ्कटाध्वरिणमिद्धगुणं प्रणौमि ॥
समुन्नयन्नार्यमतं विनिर्णयन् विघूर्णयन् दुर्नयभाञ्जि चूर्णयन् ।
समस्ततन्त्रेष्वसम(ः) स्तुतस्तु यस्तमण्णयार्यं गुरुवर्यमाश्रये ॥
यत्पादपङ्कजपरागपरागतैना यो नाम कश्चन विपाश्चिदिनत्वमेति ।
तन्त्रस्वतन्त्रममलं कमलानिवासतातार्यमार्यजनधुर्यममुं श्रयेय ॥
यस्मात्परस्मादिव भावनीयादध्यैषि भाष्यं सकलैरदूष्यम् ।
पूर्वेण तन्त्रेण समं समस्तं तं श्रीनिवासाध्वरिणं वृणीय ॥
अग्रजचरणानुग्रहजाग्रदशेषप्रशस्तशास्त्रगतिः ।
श्रुत्यन्तभाष्यदूषणकृत्यानधुना धि(धु)नोमि तानबुधान् ॥

* * * *

सुदर्शनाचार्यनिदर्शिताध्वनां कियान् भवेत् ध्वान्तविधूनने श्रमः ।
तथापि दोषातिगभाष्यभास्वतः स्वतःप्रकाशाय यते कृतेर्मुखात् ॥
भाष्यार्णवमवतीर्णो विस्तीर्णे यदवदं नयद्युमणौ ।
सङ्क्षिप्य तत्परोक्तीर्विक्षिप्य करोमि तोषणं विदुषाम् ॥

सिद्धान्तपद्धतिश्रद्धानिर्दिधारयिषावशात् ।
स्खलितं दळितं वापि सन्तो गृह्णन्त्वमत्सराः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वासुदेवकथायां हि पौण्ड्रकस्य कथा यथा ।
व्यासाचार्यकथायां तु व्यासरायकथा तथा ॥
इति स्वप्नोपदेशेन देशिकानुग्रहेण च ।
चन्द्रिकोदीरिता दोषा न लग्ना इति साधये ॥
साध्यते ब्रह्मसूत्राणां सङ्गतासङ्गतार्थता ।
राद्धान्तयो(:) स्वपरयोः श्रीनिवासकृपावशात् ॥

इह खलु परमकारुणिको भगवान् बादरायणिः भवभयभग्नजनोद्दिधीर्षया त्रयीं व्याचिख्यासुस्तत्र पूर्वभागार्थनिर्धारणाय निजान्तेवासिनं जैमि[नीयं]निं नियुज्य तदुत्तरभागतत्त्वार्थनिर्दिधारयिषया स्वयमेव शारीरं शास्त्रं निरूपयितुं प्रववृते । तस्य प्रमेयार्थप्रतिज्ञापरमिदमादिमं सूत्रम्—

अथातो ब्रह्मजिज्ञासा ।

अत्रायमथशब्द आनन्तर्ये भवति । अतश्शब्दो वृत्तस्य हेतुभावे इति श्रीमद्भाष्यम् । अस्यायमभिप्रायः—

गोपार्थहरिशब्दानां धेन्वर्जुनविष्णुष्वे(ष्वि)व प्रसिद्धेः प्राचुर्यादथशब्दस्यानन्तर्ये शीघ्रप्रत्ययविषयोऽसत्यपवाद इति तावत्सर्वजनीनम् । स च प्रत्याययन्नर्थमुत्तरार्धादिशब्दवत्सम्बन्धिशब्दत्वात् तत्र प्राकरि(रणि)कं पुरोडाशादिकमिव कञ्चित्सम्बन्धिनं यावदन्तर्भावयितुं प्रयतते तावदुत्तरभागविचारपरब्रह्मजिज्ञासापर(द)समभिव्याहारलब्धसामर्थ्यः पूर्वभागविचाररूपं सम्बन्धिनमथातो धर्मजिज्ञासेत्यादौ वेदाध्ययनमिव . . . . . . . . आदाय विश्रान्तो निवृत्ताकाङ्क्षोऽन्यं नापेक्षते ।

**End:**

एतदेवाभिप्रेत्य सर्वे वेदा यत्रैकं भवन्ति, नामानि सर्वाणि यमाविशन्ति, वेदैश्च सर्वैरहमेव वेद्य इत्यादिकमुच्यते । विस्तरस्तु

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सिद्धान्तचिन्तामणौ, तट्टीकायां, नयद्युमणौ चात्रापि शरीरलक्षणनि-रूपणावसरे विशदमुपपादयिष्यत इति दिक् ॥

दुरुक्तिभिर्दोषगवेषणाशया गुरूक्तिषु भ्रान्तिमुपेयुषा रुषा ।
महाविषाशीविषपेटिकाभिर्दोदूषकान् हन्त विदन्ति मूषकान् ॥

अधिकरणविचारैरस्तवैरप्रचारैरधिगतनिगमार्थैराद्दतादीर्घसूत्रैः ।
त्रिदशविषयगण्यै(ः)श्रीलसद्वेङ्कटेन्द्रप्रतिविधिभिरिवैतल्लक्षणं पूर्णमासीत् ॥

ध्वान्तच्छेदकवादकल्पिततनुस्रग्ध्यात्ममय्यान्वित-
स्सर्वाशासु सहस्रधा प्रसृमरस्तत्त्वार्थबोधक्षमः ।
मोक्षापेक्षिजनाध्वदर्शनपटुर्मोहापहात्मोदयो
मार्ताण्ड(ः)श्रुतिशृङ्गभाग्विजयतां क्षेमाय भूमौ सताम् ॥

**Colophon:**

इति श्रीशैलकुलतिलकसर्वतन्त्रस्वतन्त्रश्रीनिवासतातयार्यनन्दनेन लक्ष्माम्बागर्भविविक्तशुक्तिमुक्तामणिना कौण्डिन्यश्रीनिवासदीक्षितकटाक्ष-वीक्षाशिक्षितमीमांसाद्वन्द्वनिर्द्वन्द्वमतिना निजाग्रजाण्णयदीक्षितानुगृहीत-चतुस्तन्त्रनियन्त्रितमानसेन श्रीनिवासविदुषा विरचिते तत्त्वमार्ताण्डे प्रथ-मस्याध्यायस्य चतुर्थः पादः ॥

समाप्तश्चाध्यायः ॥

---

## No. **4895.** तत्त्वमार्ताण्डः.

## TATTVAMĀRTHĀṆḌAḤ.

Substance, palm-leaf. Size, 21⅛ × 1⅝ inches. Pages, 234. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Śrī-bhāṣyadūṣa-ṇōddhāra 118*a*.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



From the second Pāda of the first Adhyāya to the end of that Adhyāya.

Same work as the above.

---

No. **4896.** तत्त्वमुक्ताकलापः.

TATTVAMUKTĀKALĀPAḤ.

Substance, paper. Size, 13¼ × 8⅜ inches. Pages, 70. Lines, 32 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Sarvārthasiddhi 37*a*.

Complete in five Saras.

A Viśiṣṭādvaita-Vēdānta work in 500 stanzas by Vēṅkaṭanātha, known as Vēdāntācārya, treating about the ultimate philosophic entities recognised by that school of Vēdānta.

**Beginning :**

लक्ष्मीनेत्रोत्पलश्रीसततपरिचयादेष संवर्धमानो
नाभीनाळीकरिङ्खन्मधुकरपटलीदत्तहस्तावलम्बः ।
अस्माकं सम्पदोघानविरळतुळसीदामसञ्जातभूमा
काळिन्दीकान्तिहारी कलयतु वपुषः काळिमा कैटभारेः ॥
नानासिद्धान्तनीतिश्रमविमलधियोऽनन्तसूरेस्तनूजो
वैश्वामित्रस्य पौत्रो विततमखविधेः पुण्डरीकाक्षसूरेः ।
श्रुत्वा रामानुजार्यात्सदसदपि ततस्तत्त्वमुक्ताकलापं
व्यातानीद्वेङ्कटार्यो वरदगुरुकृपालम्भितोद्दामभूमा ॥

* * * *

आवापोद्वापतस्स्युः कति कति कविधीचित्रवत्तत्तदर्थे-
ष्वानन्त्यादस्तिनास्त्योरनवधिकुहनायुक्तिकान्ताः कृतान्ताः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्त्वालोकस्तु लोप्तुं प्रभवति सहसा निस्समस्तान्समस्तान्
पुंस्त्वे तत्त्वेन दृष्टे पुनरपि न खलु प्राणिता स्थाणुतादिः ॥
द्रव्याद्रव्यप्रभेदान्मितमुभयविधं तद्विदस्तत्त्वमाहुः
द्रव्यं द्वेधा विभक्तं जडमजडमिति प्राच्यमव्यक्तकालौ ।
अन्त्यं प्रत्यक् पराक् च प्रथममुभयधा तत्र जीवेशभेदात्
नित्या भूतिर्मतिश्चेत्यपरमपि जडामादिमां केचिदाहुः ॥

**End :**

गाथा ताथागतानां गळति गमनिका कापिली क्वापि लीना
क्षीणा काणादवाणी द्रुहिणहरगिरस्सौरभं नारभन्ते ।
क्षामा कौमारिलोक्तिर्जगति गुरुमतं गौरवाद्दूरवान्तं
का शङ्का शङ्करादेर्भजति यतिपतौ भद्रवेदीं त्रिवेदीम् ॥

**Colophon :**

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु तत्त्वमुक्ताकलापे अद्रव्यसरस्सम्पूर्णः ॥

समाप्तश्चायं तत्त्वमुक्ताकलापः ॥

कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

दृप्यद्दुर्वादिगर्वानलविलयनकृद्देशिकेन्द्रप्रणीतं
शिष्टश्रेष्ठप्रतिष्ठं व्यलिखदिह शके तत्त्वमुक्ताकलापम् ।
श्रीमच्छ्रीशैलवंश्यश्शतमखचतुराम्नायतातार्यकुल्य-
श्शल्योऽकल्यस्य हौणे वहजयविमिते देशिकाचार्यवर्यः ॥

श्रीमद्वेदान्तविद्यागुरुतिलककृपासारसंवर्धितात्मा
तद्धीप्रौढीप्ररूढिप्रचुरतरसरद्युक्तिसच्छुक्तिसूतिः ।
जीयाद्विद्वन्मनीषानिकषकषणतस्तत्त्वमुक्ताकलापः
सन्नश्येद्यद्रतानां बुधसदसि लसत्तत्त्वमुक्ताकलापः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4897. तत्त्वमुक्ताकलापः.
## TATTVAMUKTĀKALĀPAḤ.

Substance, palm-leaf. Size, $20\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 76. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, not new.

Complete.

Same work as the above.

## No. 4898. तत्त्वमुक्ताकलापः.
## TATTVAMUKTĀKALĀPAḤ.

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{1}{8}$ inches. Pages, 169. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are, Tattvasāra 86*a*, Sārārthacatuṣṭaya 102*a*, Draviḍa-bhāṣādhyayanakartavyatā-vicāra 105*a*, Rahasyatrayasārāvali 110*a*.

Complete.

Same work as the above.

## No. 4899. तत्त्वमुक्ताकलापः.
## TATTVAMUKTĀKALĀPAḤ.

Substance, palm-leaf. Size, $18\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 76. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Wants beginning and end.

Same work as the above.

## No. 4900. तत्त्वमुक्ताकलापव्याख्या—सर्वार्थसिद्धिः.
## TATTVAMUKTĀKALĀPAVYĀKHYĀ : SARVĀRTHASIDDHIḤ.

Pages, 399. Lines, 37 on a page.

Begins on fol. 37*a* of the MS. described under No. 4896.

A commentary by Vēdāntadēśika on his Tattvamuktākalāpa.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

श्रीमान् वेङ्कटनाथार्यः . . . . सन्निधत्तां सदा हृदि ॥

जयति सकलविद्यावाहिनीजन्मशैलो
जनिपथपरिवृत्तिश्रान्तविश्रान्तिशाखी ।
निखिलकुमतिमायाशर्वरीबालसूर्यो
निगमजलधिवेलापूर्णचन्द्रो यतीन्द्रः ॥
ताराकल्पे स्फुरति सुधियां तत्त्वमुक्ताकलापे
दूरावृत्त्या दुरधिगमतां पश्यतां सर्वसिद्ध्यै ।
नातिव्यासव्यतिकरवती नातिसङ्कोचखेदा
वृत्तिस्सेयं विशदरुचिरा कल्प्यतेऽस्माभिरेव ॥

प्रारिप्सितस्य प्रबन्धस्याविघ्नपरिसमाप्त्यादिसिद्ध्यै मङ्गलमाचरन् अर्थाद्वक्ष्यमाणद्रव्याद्रव्यविभागं प्रति तन्त्रविशेषांश्च सङ्ग्रहेण सूचयति—लक्ष्मीति । यज्ञविद्येत्यादिना सर्वविद्यानां तादधीन्योक्त्या सा ख्याप्येति लक्ष्मीरादौ सङ्कीर्त्यते । नित्यमुक्तत्वसूचनाय सततपरिचयोक्तिः । नाभीत्यादिना पद्मभुवः कार्यत्वकर्मवश्यत्वसूचनात् ततोऽर्वाचामनीश्वरत्वं कैमुत्यसिद्धम् । . . . . . . . नन्वपवर्गसिद्धौ यदन्तरङ्गं, तदेव विशदं तदर्थिभिरवगन्तव्यम्; तावदेव शिष्यादिभ्योऽपि प्रवर्तितव्यम्; किमन्यैरिह कीर्त्यमानैरित्यत्राह—शिष्टेति । शिष्टा चोदितेत्यर्थः । जीवेशावेव तत्त्वे जीवेशतत्त्वे तयोः प्रमितिरिहागमजन्या ।

**End:**

सर्वमङ्गलसिद्ध्यर्थं प्रबन्धसमाप्तौ सकलाचार्यदेशिकं श्रीमद्रामानुजाचार्यं प्रतिभटसकलसिद्धान्तध्वान्तनिरासकत्वेन प्रस्तौति—गाथेति ॥

**Colophon:**

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु तत्त्वमुक्ताकलापव्याख्यायां सर्वार्थसिद्धिसमाख्यायामद्रव्यसरः पञ्चमः सम्पूर्णः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4901. सर्वार्थसिद्धिव्याख्या–आनन्दवल्लरी.

## SARVĀRTHASIDDHIVYĀKHYĀ : ĀNANDAVALLARĪ.

Substance, paper. Size, $11\frac{1}{8} \times 8\frac{3}{4}$ inches. Pages, 758. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

A commentary on the Sarvārthasiddhi of Vēdāntadēśika by Nṛsiṁhadēva.

**Beginning :**

श्रीमान्वेदान्तवेद्यश्शुभगुणनिलयो निस्समस्सर्वदोष-
प्रत्यर्थीभूतमूर्तिश्चिदमितमहिमानन्दसत्यस्वरूपः ।
सृष्टिस्थित्यन्तलीलस्सकलचिदचितां मोक्षदस्सर्वविद्या
वेद्यो वागीशमूर्तिर्वृषभगिरिपतिर्जायतां श्रेयसे नः ॥

* * * *

आत्रेयवंशदुग्धाब्धिप्रालेयांशुं कलानिधिम् ।
अप्पलाचार्यवर्यं तं भजे विद्यागुरुं मम ॥

श्रीवत्सवंशाम्बुधिमध्यदेशाद्बभूव चन्द्रो नरसिंहनामा ।
तस्यात्मजस्साधुजनैकसेवी स(नृ)सिंहदेवः प्रथितो धरायाम् ॥

तोतारम्बातनयः पौत्रश्श्रीदेवराजस्य ।
दौहित्रः कुशिककुलश्रीभाष्यश्रीनिवासस्य ॥

अप्रसिद्धस्य पक्षस्य विस्तरेण प्रकाशिकाम् ।
सर्वार्थसिद्धिसट्टीकां करोम्यानन्दवल्लरीम् ॥

इह खलु कवितार्किकसिंहः सर्वतन्त्रस्वतन्त्रो वेदान्ताचार्यापरनामा . . . . . शिष्यशिक्षार्थं पद्येन निबध्नाति—जयतीति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



. . . . . . ननु तत्त्वमुक्ताकलापं व्यातानीदिति वदता तत्त्वनिरूपणं विहाय जीवेशज्ञानपूर्वकोपासनाया मुक्तिहेतुत्वप्रतिपादनमनुपपन्नमित्यत्राह—नन्वपवर्गसिद्धाविति । शिष्टेति शासे रूपम्; न तु शि(न)ष्टेरित्याह—चोदितेत्यर्थ इति । तत्त्वप्रमितेर्विनष्टत्वात् तद्युक्तत्वं तज्जन्यत्वं वा न सम्भवतीत्यत आह—प्रमितिजन्यानुमितिपूर्विकेति ।

**End:**

मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि प्रथन्ते पि(वीर)पुरुषाणि भवन्त्यायुष्मत्पुरुषाणि वेति न्यायेन प्रबन्धान्ते प्रथमं गुरुप्रकाशनरूपं मङ्गलं निबध्नातीत्याह—सर्वमङ्गलसिद्ध्यर्थ इति ॥

इत्थं वेङ्कटदेशिकस्य निगमान्ताचार्यचूडामणेः
वाणीं वासवलोकसिन्धुलहरीसन्दोहसन्देहदाम् ।
दुर्वादिव्रजदूषणैकसरणिं सर्वार्थसिद्धिं सुधीः
व्याचख्यावनुकम्पितो नरहरिर्व्यक्तं महादेशिकैः ॥

**Colophon:**

इति वात्स्यनृसिंहगुरुसुतेन महादेशिककटाक्षितेन नृसिंहदेवेन विरचितायां सर्वार्थसिद्धिव्याख्यायामद्रव्यसरः पञ्चमः ॥

---

## No. 4902. तत्त्वसारः.

## TATTVASĀRAḤ.

Pages, 34. Lines, 5 on a page.

Begins on fol. 86*a* of the MS. described under No. 4898.

Complete.

An essay in verse giving the essence of the religious and philosophic teachings to be found in the Upaniṣads.

By Varadācārya *alias* Naḍādūrammāḷ, a disciple of Varadaguru.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

वन्देऽहं वरदार्यं तं वात्स्याभिजनभूषणम् ।
भाष्यामृतप्रदानाद्यस्सञ्जीवयति मामपि ॥

अन्यत्र व्यवहारतो न भवति व्युत्पत्तिरन्यत्र वा
कश्चित्कार्यधियं कथं व्यवहरेदित्थं च निश्चीयते ।
शब्दाः कार्यपरा इति श्रुतिरतस्तत्रैव मानं पुनः
प्रामाण्यं कथमश्नुवीत परिनिष्पन्ने परे ब्रह्मणि ॥

**End :**

शेषत्वं ननु दुःखमीक्षितमतो मुक्तेषु युक्तं न तत्
मैवं माधवदास्यमौपनिषदं जागर्ति भूयः प्रियम् ।
धर्मिग्राहकमान(तः) कृतमतस्तद्दुःखतासाधनं
यद्वा तद्व्यतिरिक्तदास्यमसुखं साध्येत सिद्धं हि तत् ॥

भगवत्कैङ्कर्यस्योत्तमपुरुषार्थत्वम् ।

वरदाह्वयमण्डनो मनीषी यतिबृन्दारकभागिनेयपौत्रः ।
निगमान्तपयोधिकर्णधारो विदधे विश्वहिताय तत्त्वसारम् ॥

सद्ब्रह्मात्मादिशब्दैरभिहितमजडं छागपश्वादिनीत्या
तत्त्वं नारायणाख्यं निरधिकमसमं सेव्यमेकं मुमुक्षोः ।
आरभ्यैको ह वा इत्युपनिषदि महत्यां यतो जायते चे-
त्यन्ता(न्तं) नारायणस्योपनिषदि विधिपूर्वात्मस्रष्टृ(सृष्ट)त्वबोधः ॥

इत्येवं वरदाचार्यै(:) सूत्रवेदान्तपारगैः ।
सर्वोपनिषदामर्थसारस्सन्दर्शितस्त्वयम् ॥

विशेषसामान्यपदान्वयक्रमादनुप्रवेशेन च जीवभेदे ।
यदुक्तमन्यत्र तु कारणत्वं तदेव विष्णो(:) श्रुतिसिद्धम(ा)ह ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ज्योतींषि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च ।
नद्यस्समुद्राश्च स एव सर्वं यदस्ति यन्नास्ति च विष्णुवर्य(रेव) ॥

* * * *

यच्चैतद्भुवनगतं मया तवोक्तं सर्वत्र व्रजतिः(हि) तत्र कर्मवश्यः ।
ज्ञात्वैतद्ध्रुवमचलं सदैकरूपं तत्कुर्याद्व्रजतिः(हि) ए (ये)न वासुदेवम् ॥

---

## No. 4903. तत्त्वसारः.

### TATTVASĀRAḤ.

Substance, palm-leaf. Size, 12½ × 1⅜ inches. Pages, 25. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

Same work as the above

---

## No. 4904. तत्त्वसारः–रत्नसारिणीसहितः.

### TATTVASĀRAḤ WITH RATNASĀRIṆĪ.

Substance, palm-leaf (Śrītāla). Size, 19½ × 2¼ inches. Pages, 36. Lines, 13 on a page. Character, Telugu. Condition, fair. Appearance, old.

Breaks off in the 44th stanza.

Same as the above work, with the addition of a commentary by Vīrarāghavadāsa, son of Nṛsiṁha-guru of Vādhūla-gōtra and pupil of Varada-guru.

**Beginning:**

ओं नमो भक्तिसाराय व्यवसायात्मने हरेः ।
दैत्यान्प्रच्छन्नदैत्यान्वा शस्त्रैश्शास्त्रैर्विधून्वते ॥

(व्या).

भगवान्वरदगुरुश्चिकीर्षितग्रन्थस्याविघ्नेन परिसमाप्त्यर्थं स्मृत्याचारसिद्धं मङ्गळमाचरति—



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(मू).

श्रीविष्णुचित्तपदपङ्कजसङ्गमाय चेतो मम स्पृहयते किमतः परेण ।
नो चेन्ममापि यतिशेखरभारतीनां भावः कथं भवितुमर्हति वाग्विधेयः ॥

मम चेतः । श्रीविष्णुचित्तस्य विष्णुश्चित्ते यस्य स तथोक्तस्तस्यास्मदाचार्यस्य । भट्टनाथसूरिवत् प्रतिपक्षविजयपुरस्सरं परतत्त्वनिर्धारणादिना तद्दास्येन तदभिजनेन च तन्नामवाहिनः । पदपङ्कजयोस्सङ्गमाय पाणिमूर्धोपसङ्ग्रहरूपसमीचीनसम्बन्धनाय । स्पृहयते अभिलषति । स्पृहेरीप्सित इति चतुर्थी ।

* * * *

अत्र सिंहोद्धतं वृत्तम् । अस्मिंश्च ग्रन्थे वृत्तवैचित्र्यमलसपुरुषरञ्जनार्थम् ।

ममापीत्यपिशब्दोक्तामशक्तिं विवृण्वन् स्वस्य यतिवरभारतीभाववाग्विधेय[तयो]तयोपकारातिशयमाह—

(मू).

क पथि विदुषामेषा प्रौढी श्रियः प्रभुणा शपे
मशकशकनं मन्ये मादृक्प्रभावनिदर्शनम् ।
यतिवरवचस्तेजःप्रत्यर्थिवर्गनिरर्गळ-
क्षपणनिपुणं नित्यं जागर्ति (कीर्ति)करं मयि ॥

* * * *

अस्मिन् श्लोके उत्तरश्लोके च हरिणप्लुतं वृत्तम् ॥

* * * *

(मू).

न खलु कवितामानः का नः क्षतिः पथि गौतमे
न च परिचयः काणादे वा कुमारिलदर्शने ।
अपि गुरुमते शास्त्रेष्वन्येष्वपीह तथापि नः
फलति विजयं सर्वत्र श्रीयतीश्वरगीश्श्रमः ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यश्चकार यतिराजभारतीचित्तवृत्तिषु चिरं परिश्रमम् ।
तस्य वैदिकसदस्शिखामणेरग्रतः क्व परवादिसम्भवः ॥

* * * *

एवं स्वग्रन्थस्य बलवन्मूलकत्वं परवादिभिरप्रकम्प्यत्वञ्च उक्तमित्युपोद्घातोऽयं वृत्तः । अथ ग्रन्थमारभते— प्रथमाधिकरण इति । शिष्यावधानार्थमिदम् । अत्र पूर्वोत्तरपक्षावुच्येते इति शेषः ।

अन्यत्र व्यवहारतो न भवति व्युत्पत्तिरन्यत्र वा
कश्चित्कार्यधियः कथं व्यवहरेदित्थश्च निश्चीयते ।
शब्दाः कार्यपरा इति श्रुतिरतस्तत्रैव मानं पुनः
प्रामाण्यं कथमश्नुवीत परिनिष्पन्ने परे ब्रह्मणि ॥

साङ्गसशिरस्कवेदाध्ययनकृतः कृत्स्नवेदार्थविषय आपातप्रत्ययः कृत्स्नवेदार्थविचाराधिकारः । तत्राध्ययनक्रमात्कर्मविचारे पूर्वं कृते तदधीनकर्मास्थिराल्पफलकत्वनिर्णयसहितब्रह्मानन्तास्थिरफलापातप्रत्यय उत्तरभागार्थविचाराधिकारः, आपातप्रत्ययश्च [सं]सम्भावितप्रामाण्यविवक्षित इति सिद्धान्तस्थितिः । तत्र पूर्वपक्षी प्रभाकरः प्रत्यवतिष्ठते ।

See under the next number for the end.

---

## No. 4905. तत्त्वसारः—रत्नसारिणीसहितः.

## TATTVASĀRAḤ WITH RATNASĀRIṆĪ.

Substance, palm-leaf. Size, 18 × 1⅝ inches. Pages, 201. Lines, 9 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Rāmānuja-siddhāntasaṅgraha 102*a*, Dramiḍōpaniṣad-bhāṣya 123*a*.

Complete.

Same work as the above with the same commentary.

See under the previous number for the beginning.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

स्वकृतग्रन्थस्य श्रद्धेयतमत्वसिद्ध्यर्थं स्वस्य भगवद्भाष्यकारसम्प्रदायाभिजातत्वं तत्प्रसादितश्रीभाष्यवचनभद्रपीठाध्यक्षत्वञ्च वदन् स्वस्य प्रयोजनान्तरस्पृहामन्तरेण केवलदीनजनानुजिघृक्षातिशयेन तत्त्वसारग्रन्थकरणमाह—

वरदाह्वयमण्डनो मनीषी यतिबृन्दारकभागिनेयपौत्रः ।
निगमान्तपयोधिकर्णधारो विदधे विश्वहिताय तत्त्वसारम् ।

यतिबृन्दारकस्य यतिराजस्य भगवद्भाष्यकारस्य । बृन्दारकनागकुञ्जरैः पूज्यमानमित्यनेन समासः । भ(ा)गिनेयो भगिनीसुतो वत्साभिजनो वरदगुरुस्तस्य पौत्रः पुत्रस्य पुत्रः भगवतो भाष्यकृतो द्वे सोदर्ये । तत्रैकस्यास्सुतो वाधूलदाशरथिर्यस्य खल्वजहद्भागिनेयत्वं प्रसिद्धम् । तदुक्तम्—

इतरसुलभा किमेषा भाषा वाधूलदाशरथिरेकः ।
न परित्यक्तस्त्यजता बन्धूनिति सदसि लक्ष्मणार्यकृता ॥ इति ।

अन्यस्यास्तु सुतो वात्स्यवरदगुरुः । तदुक्तम्—

भूमिकमलाभिधाने पुण्ये रामानुजार्यसोदर्ये ।
याभ्यामुभावभूतां पुत्रौ दाशरथिवरदनामानौ । इति ।

* * * *

तत्त्वसारं शारीरकप्रतिपाद्यार्थजातेष्वभ्यर्हितार्थजातप्रतिपादकताप्रयुक्ततद्वाचकपदवाच्यताकं ग्रन्थविशेषं विदधे चक्रे । शिष्यहितस्य स्वहितत्वाभिसन्धिना क्रियाफलस्य कर्तृगामित्वपरमात्मनेपदं प्रयुक्तम् । भाष्यामृतनिषेवणसुखपरवशेन स्वेनापि ग्रन्थकरणमप्रतिसंहितमिति सूचनाय परोक्षे लिङुक्तः ।

श्रीभाष्यमेरुकटकोदरलब्धमूर्तिं सौदर्शनोक्तिदृढपञ्जरपाल्यमानम् ।
सत्खण्डमारुतरयं विजयैकहेतुं सारौघमाशयतु वो मणिसारिणीयम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नरसिंहगुरोः पुत्रो वरदार्यकृपाधनः ।
वीरराघवदासोऽहं तत्त्वसारं व्यवीवरम् ॥

**Colophon:**

इति श्रीवाधूलकुलतिलकश्रीनरसिंहगुरुवरतनयेन तच्चरणपरिचरणपरायणेन श्रीमद्वाधूलवेङ्कटार्यसम्भवश्रीवरदगुरुनिर्व्याजदिव्यकरुणासमधिगतनिगमान्तयुगलहृदयेन वीरराघवदासेन विरचिता तत्त्वसारव्याख्या रत्नसारिणीसमाख्या सम्पूर्णा ॥

---

No. **4906.** दुर्वादतूलवातूलः.
DURVĀDATŪLAVĀTŪLAḤ.

Substance, palm-leaf. Size, 17¼ × 1¼ inches. Pages, 41. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Complete.

A controversial treatise on the meaning of Mōkṣa or the salvation of soul-emancipation.

**Beginning:**

श्रीनिवासरघूत्तंसचरणौ शरणं श्रये ।
यत्संश्रयफलज्ञानं वाचस्पतिरपीहते ॥

कतिचिदिह कलिकलुषमुषितविवेकाः प्रमाणसम्प्रदायविरोधे विनिर्मुक्तभया मुक्तिस्वरूपमन्यथयन्ति । तत्कृतमन्दमतिव्यामोहं शमयितुमयमारम्भः । यदाहुः—संसारनिवृत्तित्वं मुक्तिपदशक्यतावच्छेदकमिति तन्न ; संसारबन्धस्थितिमोक्षहेतुरित्यत्र संसारनिवृत्तेरिव "सर्वपापेभ्यो मोक्षयिष्यामि; अविद्यानिवृत्तिरेव मोक्षः, कर्मबन्धं प्रहास्यसि, स चानन्त्याय कल्पते" इत्यादिषु क्वचित्सर्वपापनिवृत्तेः, क्वचिदविद्यानिवृत्तेः, क्वचित्कर्मनिवृत्तेः, क्वचिज्ज्ञानसङ्कोचनिवृत्तेः, प्रत्येकं मुक्तित्वावगमेन एकत्र मुख्यत्वे अन्यत्र लाक्षणिकत्वापत्त्या विनिगमनाविरहेण मुक्तिशब्दस्य नानार्थत्वापत्त्या च प्राप्तिविरोधित्वेन संसारादीननुगमय्य तन्निवृत्तित्वं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथेति वक्तव्यत्वात् । अत एवाविद्यानिवृत्तिरेव मोक्ष इति भाष्ये श्रुतप्रकाशिकायामविद्याशब्दः प्रतिबन्धकपरो व्याख्यातः ।

**End :**

स्वसमानाधिकरणकर्मध्वंसप्रागभावासमानकालीनकर्मध्वंसो मोक्षः । क्वचिल्लेखनदर्शनात् कर्मध्वंसप्रागभावेत्यत्र ध्वंसांशे वादिनामेव प्रमोषः प्रतीयते ; वाद्युक्तानुपूर्व्याः क्वचिदप्यदर्शनात् । किं वा भवतु, कीदृग्वा भवतु, न तत्रास्माकमाग्रहः ; परं तु सम्प्रदायविरुद्धांशे । स तु समूलमुन्मूलित इति अलमन्यवृथापरिश्रमेणेति ॥

श्रीवासरघ्वीश्वरदेशिकात्मा हरिर्हृदि प्रासरतिर्मदीये ।
आम्नायचूडागुरुसम्प्रदायश्रद्धाविशुद्धाशयतां विदध्यात् ॥

---

## No. 4907. नयद्युमणिः.

## NAYADYUMAṆIḤ.

Substance, paper. Size, $13\frac{1}{4} \times 8\frac{1}{4}$ inches. Pages, 528. Lines, 21 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 21*a*. The other work herein is Kūrēśavijaya 1*a*.

This work is a comprehensive exposition of the religion and philosophy of the Vēdānta as held by the school of qualified monism known as Viśiṣṭādvaita : it contains the following Prakaraṇas :—

१. शरीरलक्षणम्.
२. स्वतःप्रामाण्यम्.
३. वाक्यार्थप्रदीपः.
४. अन्विताभिधानम्.
५. शब्दस्थायित्वम्.
६. श्रुतिलिङ्गादिः.
७. यथार्थख्यातितत्त्वम्.
८. उपोद्घातविनिर्णयः.
९. कालनिरूपणम्.
१०. प्रत्यक्षप्रमाणम्.
११. अनुमानप्रमाणम्.
१२. शास्त्रनिरूपणम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१३. उपमानप्रमाणम्.
१४. अर्थापत्तिः.
१५. प्रमेयनिरूपणम्.

**Beginning:**

आस्येऽनुसन्दर्शयता हयाभामाकण्ठमासादितपौरुषेण ॥
वाणी मदन्तः परमेण पुंसा . . . . किमुपातनोतु ॥

सूक्ष्मस्थूलचिदचिच्छरीरं ब्रह्मैव कार्यं कारणश्चेति दर्शनम् । तत्र साङ्ख्या आत्मादेर्ब्रह्मशरीरत्वेऽनुपपत्तिमाविष्कुर्वाणाः प्रत्यवतिष्ठन्ते । तथाहि—आत्मादेर्न शरीरत्वं तल्लक्षणविरहात् ।

**End:**

तस्यासंबन्धव्यवहारस्त्वौपचारिकः मुक्तात्मादिषु भेदज्ञानार्थं विशेषोऽङ्गीकार्य इति जातिगुणादेरेव भेदत्वात् भेदस्य पृथक्त्वादिनापि तदङ्गीकारात् अर्थान्तरकल्पनानवकाशात् । मुक्तादीनां समानगुणत्वेऽपि देशाद्युपाधिलक्षणैः तत्पृथक्त्वस्य सुज्ञानत्वादिति सर्वं सुस्थम् ॥

**Colophon:**

इति मेघनादारिविरचिते नयद्युमणौ प्रमेयप्रकरणं सम्पूर्णम् ॥

---

## No. 4908. नयमयूखमालिका.

## NAYAMAYŪKHAMĀLIKĀ.

Substance, palm-leaf. Size, 17 × 1⅜ inches. Pages, 110. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

An exposition of the Viśiṣṭādvaita view of the Vēdānta as explained by Rāmānujācārya; by Appayadīkṣita.

Incomplete.

**Beginning:**

श्रेयसां निधिमिव श्रियःपतिं प्रेप्सतां प्रियहिताध्वदर्शिनी ।
लक्ष्मणार्यहृदयानुसारिणी रच्यते नयमयूखमालिका ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथातो धर्मजिज्ञासेत्यारभ्यानावृत्तिश्शब्दादितिपर्यन्तं विंशतिलक्षणमेकं शास्त्रम् । तत्र कर्मविचारार्था द्वादशलक्षणी, देवताविचारार्था चतुर्लक्षणी च वृत्ता । ब्रह्मविचारार्था चतुर्लक्षणी आरभ्यते—

तत्रादौ ब्रह्मविषयव्युत्पत्त्यभावप्रतिपत्तिदौस्थ्यमानान्तरसिद्धत्वफलराहित्यरूपतदनारम्भहेतुचतुष्टयनिरसनेन तदारम्भसमर्थनार्थतया शास्त्रोपोद्घातरूपाणि समन्वयाधिकरणपर्यन्तानि चत्वार्यधिकरणानि । तेषु व्युत्पत्त्यभावशङ्कानिरासार्थमिदमाद्याधिकरणम्—

अथातो ब्रह्मजिज्ञासा ।

ब्रह्मविचारात्मकमिदं शास्त्रं न वेति संशयः; तदर्थं ब्रह्मणि वेदान्ताः प्रमाणं न वेति संशयः, तदर्थं च सिद्धरूपे ब्रह्मणि व्युत्पत्तिस्सम्भवति न वेति संशयः ।

**End:**

. . . पनीयेत्यनेनैव गृहीतम् । तस्याध्ययनप(र्य)न्तोपनयनपरत्वात् । पूर्वतन्त्रे हि तस्मात(द्)ग्निचिद्वर्षति न धावेदित्यत्राग्निचिदित्यस्य यदर्थोऽग्न्याश्रयनसंस्कारस्तत्पर्यन्ताग्निच(य)नपरः । ते.

---

## No. 4909. नारायणपदस्वरनिर्वचनम्.

## NĀRĀYAṆAPADASVARANIRVACANAM.

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 2. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 18*a*. The other works herein are Nārāyaṇaśabdanirvacana 1*a*, Nārāyaṇapadanirvacana 12*a*.

Incomplete.

A tract investigating the manner in which the word Nārāyaṇa should be derived and pronounced so as thereby to denote its correct meaning.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

नारायणपदस्य तत्पुरुषबहुव्रीहिनडादिफग्व्युत्पत्त्या स्वरभेदो भवतीति चेन्न ; तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्या इति पूर्वपदप्रकृतिस्वरं(रः)स्यात् । बहुव्रीहौ प्रकृत्या पूर्वपदमिति सूत्रेण स्पष्टम् । नडादिभ्यः फगिति तद्धितवृत्त्या कितस्तद्धितस्येत्यन्तोदात्तत्वम् ।

**End:**

सहस्रनामभाष्ये लोकभावन इत्यत्र पराशरभट्टाचार्यैः, दशमस्कन्धे नारायणस्त्वं न हि सर्वदेहिनामित्यत्र मुनिभावप्रकाशिकाचार्यैः कर्तृलकारेण विवरणात् । चतुर्थ्यलुगुप्त(क्तः) तन्न संभवतीति चेत् यादसांपतिरित्यादावलुगसम्भवेऽपि अमरव्याख्याने भानुजिदीक्षितेन तत्पुरुषे कृति बहुलमिति उक्तम् । नाराय ब्रह्मदेवाय णी(णा)कृपा यस्येति नारायण इति शब्दशब्दार्थमञ्जूषाव्याख्याने मुरारिमिश्रेण व्याख्यातम् । मुनिगार्ग्यैः प्रियं वक्ता शिवायप्रिय इत्यपि इति ऋषिपर्यायलेखने गार्ग्यपर्याये पर्यायरत्नमालाकोशे शिवायप्रिय इति समासेनोक्तम् । अहल्यायै जारेत्यादावपि बहुलग्रहणादेव साधनीयम् । वैयाकरणाख्यायां चतुर्थ्या एवेति नाग्रहः ; उक्तरीत्या सप्तमीतरविभक्तीनामपि अलुको दृष्टत्वात्.

---

No. **4910.** न्यायकुलिशम्.

NYĀYAKULIŚAM.

Substance, paper. Size, 11 × 8¾ inches. Pages, 221. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are, Vādihaṁsāmbuvāhācārya-stōttara 111*b*, Varāhāṣṭaka 112*a*.

An original treatise on Viśiṣṭādvaita-Vēdānta; by Rāmānujācārya *alias* Vādihaṁsāmbuvāhācārya, the uncle and preceptor of Vēdāntācārya.

Complete.

It deals with the following subjects in the form of 12 Vādas or discussions :—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| | |
|---|---|
| १. सिद्धार्थव्युत्पत्त्यादिसमर्थनम्. | ७. सामानाधिकरण्यवादः. |
| २. स्वतः प्रामाण्यनिरूपणम्. | ८. सत्कार्यवादः. |
| ३. ख्यातिनिरूपणम्. | ९. संस्थानसामान्यसमर्थनवादः. |
| ४. स्वयम्प्रकाशवादः. | १०. मुक्तिवादः. |
| ५. ईश्वरानुमानभङ्गवादः. | ११. भावान्तराभाववादः. |
| ६. देहाद्यतिरिक्तात्मयाथार्थ्यवादः. | १२. शरीरवादः. |

**Beginning:**

यस्मादस्माभिरेतद्यतिपतिकथितप्राक्तनप्रक्रियोद्य-
त्कर्मब्रह्मावमर्शप्रभवबहुफलं सार्ध(र्थ)मग्राहि शास्त्रम् ।
तं विष्वग्भेदविद्यास्थितिपदविषयस्थेमभूतं प्रभूतं
वन्देयात्रेयरामानुजमुनिमनघं वादिहंसाम्बुवाहम् ॥
अभेद्यं सर्वेषां हतकुमतिगोत्रप्रसरणं
यतीन्द्रादेशैकप्रवणसुमनस्त्राणनिपुणम् ।
कठोरेष्वात्रेयान्वयतिलकरामानुजकृतं
कथायुद्धेष्वाविष्कुरुत निशितन्यायकुलिशम् ॥
सिद्धे वेदान्तवाक्यानां प्रामाण्यस्य प्रसिद्धये ।
व्युत्पत्तिरपि तत्रास्वि(स्ति)शब्दानामिति वर्ण्यते ॥

अत्र केचिदाहुः—

नै(व)कैश्चन शब्देषु व्युत्पादोऽङ्गुलि . . याः ।
असिद्धे बोधकत्वस्य न चैवं ह्यन्विताभिधा ॥

वृद्धव्यवहारमन्तरेण वाक्यस्य बोधकत्वशक्त्यवधारणानुपपत्तेर्व्यवहारस्य च कार्यबुद्धिसत्त्वं निर्दिश्य व्युत्पाद्यन्त इति युक्तम् ।

**End:**

पृथिव्यादेरेव तं प्रति पारार्थ्यमिति सि . . . यते । विधेयत्वादीनां हि सर्वात्मना स्वार्थे इत्यादिविशेषणे स्वरूपं शोध्यते । अस्यां श्रुतौ हि न तेषामभिव्यक्तं रूपम्.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इत्यत्रिगोत्रप्रदीपश्रीपद्मनाभार्यनन्द(न)स्य वादिहंसनवाम्बुदाभिधानस्य साक्षान्निगमान्तमहा(दे)शिकमातुलाचार्यस्य रहस्यशास्त्रप्रकाशकस्य जगद्गुरोः स्वानुग्रहेण स्ववंशमुत्तारयितुमस्तोकाध्वरिकविविद्वन्माणिकाश्रीघटाम्बुअरशाणिपालाद्यनेकाग्रहारप्रतिष्ठासमुत्थितयशस्कश्रीवेङ्कटाचार्याद्यनेकदासवर्गजननस्य वाचामगोचरबिरुदाङ्कितस्य रामानुजाचार्यस्य कृतिषु न्यायकुलिशे शरीरवादो द्वादशः ॥

---

## No. 4911. न्यायपरिशुद्धिः.

## NYĀYAPARIŚUDDHIḤ.

Substance, paper. Size, 13¼ × 8¼ inches. Pages, 271. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

A critical and argumentative dissertation in support of the Viśiṣṭādvaita-Vēdānta ; by Vēdāntadēśika.

**Beginning :**

पत्युस्संयमिनां प्रणम्य चरणौ तत्पादकोटीरयोः
संबन्धेन समिन्ध(मेध)मानविभवान् धन्यांस्तथान्यान् गुरून् ।
शुद्धिं संश्रितबादरायणतनोर्नारायणस्योक्तिभिः
श्रीमान् वेङ्कटनायकस्स्थितिपदं निर्माति नीतेश्शुभम् ॥
विद्यास्थानेषु धर्म्येषु गण्यते न्यायविस्तरः ।
स च विप्लावितस्तैस्तैस्ततोऽत्र परिशोध्यते ॥

यद्यपि कथञ्चिदाक्षपादं सत्पक्षे निक्षेप्तुं शक्यम् । न च कणभक्षपक्षनिक्षेपवत्क्लेशः, नापि तत्कर्ता गौतमस्तामसेषु परिपठ्यते; नापि च विप्रलम्भकत्वख्यातिः, तथापि ब्रह्मसूत्रकारादिबहिष्कृतत्वान्नातीव वयमाद्रियामहे.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्राज्ञानां प्रथमेनैव गुरुणा हि स्वयं पुरा ।
लोकायतमतं प्रोक्तं लोकविप्लवकारणम् ॥

अथवा पितामह एवात्र प्रमाणम्; य इन्द्रविरोचनयोश्चार्वाकमतमुपदिष्टवान्, तथा गौतमोऽपि संभाव्यते । अथापि—

काणादशाक्यपाषण्डैस्त्रयीधर्मो विलोपितः ।
त्रिदण्डधारिणा पूर्वं विष्णुना रक्षिता त्रयी ॥ इति स्मृतेः ।

**End:**

इह तु प्रमाणचिन्ताया परमप्रयोजनं दर्शयितुं प्रमेयस्य सङ्ग्रहोक्तिः सपरिकरप्रमाणमर्यादाप्रतिपादनपरत्वान्न्यायविस्तरशास्त्रस्येति ।

स्वातन्त्र्येण मितं सुखेतरतया यद्भाति जन्तोरिदं
सर्वं यस्य विभूतिरित्यवसितं स्वादं व्यनक्ति स्वकम् ।
अन्तस्वान्तमनन्तनन्दथुनिर्भेर्मोदो दृशां मादृशा-
माविर्भावयतु स्वयन्तु भगवानात्मानमात्मेश्वरः ॥
यत्रोदासत जैमिनिप्रभृतयः श्रुत्यन्तचिन्तापरा
यस्यां कन्दलयन्ति मन्दमतयः पारिप्लवाचि(द्वि)प्लवान्
विश्वेषामिह वेङ्कटेशविदुषा विश्रान्तये वादिनां
प्राचीनीतिषु पर्यशोधि सरणिः प्रायश्च निष्कण्टका ॥
शुद्धिं बिभ्रतु मादृशां फणितयः चूडान्वये केवलं
प्रान्ते मिश्रमहार्णि(?) नीतिनिपुणैः किन्तेष्वमन्तव्यता ।
युक्तं वर्गयुगे विमृश्य सरघापुष्पक्रमं यौक्तिकै-
रङ्गीकर्तुमशक्यनिह्नवगुणग्रन्थो निबन्धो मम ॥

**Colophon:**

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु न्यायपरिशुद्धौ प्रमेयाध्याये द्वितीयमाह्निकम् ॥

अध्यायश्च समाप्तः ॥
शास्त्रञ्च समाप्तम् ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4912. न्यायपरिशुद्धिव्याख्या—निकषा.

## NYĀYAPARIŚUDDHIVYĀKHYĀ : NIKAṢĀ.

Substance, paper. Size, 13¼ × 8¼ inches. Pages, 218. Lines, 26 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 182*a*. The other work herein is Nyāyapariśuddhivyākhyā (Nyāyasāra) 1*x*.

Contains Śabdādhyāya complete, Smṛtyadhyāya incomplete.

A commentary by a Śrīnivāsa Śaṭhakōpa-Yati on Nyāyapariśuddhi. The commentary is named Nikaṣā.

**Beginning :**

शब्दाध्यायमारभते—

ये त्विति । हेतुहेतुमद्भावं सङ्गतिमाहानुमोदयामिति । तयोर्मध्ये संस्थितमनुमानस्मृत्योर्मध्ये । इह हेतुसमाप्त्यनन्तरप्रकरणे इदानीं हेतुरूपानुमानस्य समाप्तत्वादनन्तरमित्यर्थः । ननु हेतुहेतुमद्भावः कथं शब्दानुमानयोरिति चेदुच्यते ।

* * * *

अध्यायमुपसंहरति—तस्मादिति । उपसंहारश्लोकमाह—शुद्धेति ।

स्मृतेः प्रामाण्योक्तिस्तदितरमितीराण्णि(नां नि)रसनेऽ-
नुमानान्तर्भावोऽप्युपमितिमतेस्संभवधियः ।
तथा चार्थापत्तेः पुनरनुपलब्धेरपसृति-
स्तथा शब्देतिह्यं यदवतथातिथिःभीमभः(दधीयीमहि महः) ॥

**Colophon :**

इति कवितार्किकमतङ्गजकेसरिणः सर्वतन्त्रस्वतन्त्रस्य श्रीपराङ्कुशयतिपादसरोरुहभ्रमरस्य श्रीमदहोबिलाचार्यकृपापात्रस्य श्रीनिवासशठकोपयतेः कृतौ न्यायपरिशुद्धिन्नि(नि)कषायां व्याख्यायां स्मृ(त्य)ध्याये द्वितीयमाह्निकम् ॥

See under the next number for the end.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4913. न्यायपरिशुद्धिव्याख्या–निकषा.

## NYĀYAPARIŚUDDHIVYĀKHYĀ : NIKAṢĀ.

Substance, palm-leaf. Size, $18\frac{3}{4} \times 1\frac{5}{8}$ inches. Pages, 149. Lines, 10 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains the first Āhnika of the Śabdādhyāya to the first Āhnika of Pramēyādhyāya and breaks off in the second Āhnika thereof.

Same work as the above.

See under the previous number for the beginning

**End:**

तदशक्तौ विद्यावतः कर्मानुष्ठानेऽपि फलावधित्वं सप्रमाणं प्रतिपादयति—अन्येति । कर्ममात्रेण ज्ञानोत्पत्तिं प्रतिपादयति—गुणवतेति । सात्त्विकगुणवता तस्यैव तत्साधनत्वोक्तेरिति भावः ।

कर्मणे(णै)व हि संसिद्धिमास्थिता जनकादय इति प्रमा(णतो) न भवदुक्तकैवल्यमुक्तिप्रसङ्गः । अत एव ज्ञानिनः कैवल्यार्थिनश्चापुनरावृत्तिमैश्वर्यार्थिनः पुनरावृत्तिन्त्वाहेत्युत्तरत्रोक्तम् । अस्तु तस्याप्यर्चिरादिका गति(रिति)चेन्न ; [अप्रतिकालं] अप्रतीकालम्बनानीति विशेषितत्वात् । इदमप्यप्रतीकालम्बनमिति चेन्न ; मन . . . स. लम्बनस्याप्यप्रति ?

---

## No. 4914. न्यायपरिशुद्धिव्याख्या–न्यायसारः.

## NYĀYAPARIŚUDDHIVYĀKHYĀ : NYĀYASĀRAḤ.

Pages, 362. Lines, 20 on a page.

Begins on fol. 1*a* of the MS. described under No. 4912.

Complete.

Adhyāyas—Pratyakṣa and Anumāna only—complete.

A commentary on the Nyāyapariśuddhi of Vēdāntācārya ; by Śrīnivāsadāsa, son of Dēvarājācārya of Bhāradvāja-gōtra.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

गुरुपङ्क्तिहारयष्टिं गुणरमणीयां सतां सदा हृद्याम् ।
श्रीमद्वेङ्कटनायकभूषितभागद्वयामयामि तमाम् ॥
द्रमिडोपनिषद्देशिकमाधववंश्येन नीतिपरिशुद्धेः ।
व्याख्या विशदार्थपदा विरच्यते श्रीनिवासदासेन ॥

निरवधिकभावभरितं निगमान्तगुरोर्निबन्धनं को वा ।
विवृणोत्यहं तु दूरे विवृणोमि (च) तत्र भक्त्यैव ॥

तत्रभ[ग]वान् परमकारुणिको भगवत्प्रसादलब्धवेदान्ताचार्यापरगुणसमाख्यः श्रीमान् वेङ्कटनाथो गुरुः स्वचिकीर्षितस्य न्यायपरिशुद्ध्याख्यग्रन्थस्य अविघ्नपरिसमाप्तये प्रचयगमनाय च—

"मङ्गळाचारयुक्तानां नित्यं च प्रयतात्मनाम् ।
जपतां जुह्वतां चैव विनिपातो न विद्यते ॥"

इति शास्त्रोपोद्बलितशिष्टाचारपरम्पराप्राप्तं गुरुपरम्परावन्दनरूपं मङ्गळमाचरन् विषयप्रयोजने निर्दिशति—पत्युस्संयमिनामिति ।

संयमिनां पत्युर्यतिपतेर्भगवतो भाष्यकारस्य । चरणौ प्रणम्य ।

**End :**

यस्मिन् भगवति पुरुषं पश्यति सति तस्य तत्त्वनिर्णयः कथासु विजयश्च भवतः.

जायमानं हि पुरुषं यं पश्येन्मधुसूदनः ।
सात्त्विकस्स तु वि[ज्ञे]यस्सर्वैर्मोक्षार्थचिन्तकः ॥

इति हि स्मर्यत इति भावः । यस्य भगवतः क्रुधा कोपेन पुंसः अत्याहितं महाभीतिर्भवति ।

तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुर(री)ष्वेव योनिषु ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति हि गीयत इति भावः । नित्यैश्वर्यमहोदधिः निरवधिकविभूतियुक्तः स भगवान् षाड्गु(ड्गु)ण्यपरिपूर्णः नः अस्माकं निश्श्रेयसाय मोक्षायास्तु, परमपुरुषार्थहेतुर्भवात्वित्यर्थः ॥

**Colophon :**

इति श्रीमद्वेदान्ताचार्यचरणारविन्दानुसन्धानविशदप्रबोधेन भारद्वाजकुलजलधिकौस्तुभश्रीदेवराजाचार्यसूनुना श्रीनिवासदासेन विरचितायां न्यायपरिशुद्धिव्याख्यायामनुमानाध्याये चतुर्थं प्रमाणाभासाह्निकम् ॥

यदुक्तेरुल्लासः कविकथकदर्पप्रशमनो
यदीयाङ्के(ङ्घ्रि)श्रद्धा प्रगुणयति तत्त्वाध्यवसिति(म्) ।
प्रतिष्ठा तर्काणां भवति च यदूरीकरणत-
स्स वेदान्ताचार्यश्शमयतु ममाघं बहुमुखम् ॥

प्रवृद्धा भक्तिश्चेद्भवति परमाचार्यपदयो
र्वयं तद्भक्तत्वादभिमतं(त)पदं वो यदि मताः ।
तदा दोषादर्शिप्रणयरससारेण मनसा
परिग्राह्येयं स्यात्कृतिरनघभावात्सुमनसः ॥

---

## No. 4915. न्यायपरिशुद्धिव्याख्या—न्यायसारः.

## NYĀYAPARIŚUDDHIVYĀKHYĀ : NYĀYASĀRAḤ.

Substance, palm-leaf. Size, 16⅝ × 1⅜ inches. Pages, 287. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Pratyakṣa and Anumāna only, complete.

Same work as the above.

---

## No. 4916. न्यायरत्नावलिः.

## NYĀYARATNĀVALIḤ.

Substance, palm-leaf. Size, 18⅛ × 1½ inches. Pages, 14. Lines, 8 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Folios 8 to 13 contain a fragment of some work dealing with Mīmāṁsā.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Incomplete.

This tract criticises the view of the Dvaita-Vēdāntins that there are different degrees of heavenly bliss even in the state of the soul's final salvation.

**Beginning:**

स्वामी समस्तजगतामपि यः पुरासौ दूतो बभूव विनत(प्लवगेन्द्रके)तोः ।
स्वां दर्शयन्प्रण(त)किङ्करतां स देवः श्रेयांसि मे (दिशतु)वृष्णिकुलाधिराजः ॥

यद्भक्तिरेव निखिलानि फलानि सूते
यत्पादपङ्कजयुगं धनमस्मदीयम् ।
यद्व(न्दि)नो (नि)गममौलिगणास्समस्ता
देवः प्रसीदतु स मे करिशैलसङ्गिः(ङ्गी) ॥

श्रीमदादिवराहार्यान्वेङ्कटेशगुरोस्सुतान् ।
वन्दे येषां प्रसादेन वस्तुभावं गतोऽस्म्यहम् ॥

वेङ्कटेशगुरुं भक्त्या प्रपद्येऽस्मत्पितामहम् ।
अनवद्यगुणैर्यस्य छात्रैः पृथ्वी परिष्कृता ॥

अस्मद्गुरोर्गुणगणान् हृदि भावयामः श्रीवेङ्कटेशचरणौ शरणं भजामः ।
वेदान्तदेशिकपदाम्बुजमाश्रयामः श्रीमद्यतीन्द्रचरणौ मनसोद्वहामः ॥

लक्ष्मीसहायपदपङ्कजभक्तिभाजो निर्धूतसंसृतिभयाः कृपया मु(रा)रेः ।
साम्यं व्रजन्ति परमं गतजन्मशङ्का इत्यङ्ग(त्याग)मैकशरणाः प्रवदन्ति [सन्तः ॥

न्यायाभासैर्मुषितमतयो मध्वसिद्धान्तनिष्ठा
मुक्तानन्दान् कतिचन जगुस्तारतम्योपबन्धान् ।
तेषां दर्पं विबुधपरिषत्प्रीतये प्राक्षिपामः
पश्यन्त्वार्या विमलमनसः प्रेमपूर्वं कृतिं नः ॥

न्यायरत्नावळी सेयं कुमतध्वान्तसन्ततिम् ।
विलोपयति धीराणां मण्डनाय च कल्प्य(ल्प)ते ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र केचित्तु—

यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति ॥

न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम् । सर्वं ह पश्यं पश्यति सर्वमाप्नोति । सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता इत्यादिका मण्डू(मुण्ड)कच्छान्दोग्यतैत्ति(री)यकाः श्रुतीरुल्लङ्घ्य ब्रह्ममुक्तयोर्ज्ञान . . . . . . तारतम्यवन्ताविति वदन्ति कल्पयन्ति च जीवस्वरूपाणां मुक्तानन्दानां च परस्परतारतम्यम् ।

**End:**

न च मुक्तसामान्यानन्दस्य परिमाणं प्रतिपन्नमिति तदुपदेशस्यानपेक्षितत्वेऽपि मुक्तमनुष्यानन्दपरिमाणस्य प्रतिपन्नतया तदुपदेशोपे.

---

## No. 4917. न्यायसिद्धाञ्जनम्.

## NYĀYASIDDHĀÑJANAM.

Substance, palm-leaf. Size, 15 × 1⅜ inches. Pages, 216. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

A dissertation on Viśiṣṭādvaita-Vēdānta; by Vēdāntadēśika. It is divided into six Paricchēdas as given below :—

(१) त्रिगुणद्रव्यपरिच्छेदः.
(२) जीवपरिच्छेदः.
(३) ईश्वरपरिच्छेदः.
(४) नित्यविभूतिपरिच्छेदः.
(५) बुद्धिपरिच्छेदः.
(६) अद्रव्यपरिच्छेदः.

**Beginning:**

जयति सकलविद्यावाहिनीजन्मशैलो जनिपथपरिवृत्तिश्रान्तविश्रान्तिशाखी ।
निखिलकुमतिमायाशर्वरीबालसूर्यो निगमजलधिवेलापूर्णचन्द्रो यतीन्द्रः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमान्वेङ्कटनायकश्श्रुतिशिरस्तात्पर्यपर्याप्तधी-
केळ्यार्थो वरदार्यपादरसिकाद्रामानुजाचार्यतः ।
बालानामतिवेलमोहपटलावष्टम्भसीदद्दृशां
सम्यक्तत्त्वनिरूपणाय तनुते सत्तर्कसिद्धाञ्जनम् ॥
सदसद्भूमिकाभेदैस्तत्तत्सिद्धान्तनाटकैः ।
उपप्लुतस्य तत्त्वस्य शुद्ध्यर्थोऽयमुपक्रमः ॥
यन्न्यायपरिशुद्ध्यन्ते सङ्ग्रहेण प्रदर्शितम् ।
पुनस्तद्विस्तरेणात्र प्रमेयमभिदध्महे ॥

अशेषचिदचित्प्रकारं ब्रह्मैकमेव तत्त्वम् । तत्र प्रकारप्रकारिणोः प्रकाराणां च मिथो भेदेऽपि विशिष्टैक्यादिविवक्षया एकत्वव्यपदेशस्तदितरनिषेधश्च ; अन्यथा समस्तप्रमाणसङ्क्षोभप्रसङ्गात् । इदमेव चेत्थंभूतं सामान्यतः प्रमाणविषयतया विशेषतः प्रकर्षेण मेयम् । तथाच प्रमेयमुक्तन्तदन्तर्गतं सर्वं द्रव्याद्रव्यात्मना विभक्तम् ।

**End:**

तदुक्तम्—

भगवद्यामुनमुनिभिरागमप्रामाण्ये ततश्च सन्ततिस्मृत्यनुगृहीतेन चक्षुषा विज्ञायमानं ब्राह्मण्यं प्रत्यक्षत्वं न मुञ्चति । तथा च दृश्यते—नाना सहकारिव्यपेक्षया चक्षुषो जातिविज्ञानजनकत्वं यथोदितमित्यादि ॥

आगमान्तार्यसंभूतन्यायसिद्धाञ्जनं शिवम् ।
श्रोतॄणामखिलार्थानां प्राप्त्यै सर्वत्र भासते ॥

---

No. **4918.** न्यायसिद्धाञ्जनम्.
NYĀYASIDDHĀÑJANAM.

Substance, palm-leaf. Size, 18 × 1⅜ inches. Pages, 222. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

Same work as the above.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4919. न्यायसिद्धाञ्जनम्.
## NYĀYASIDDHĀÑJANAM.

Substance, palm-leaf. Size, $20\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 209. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Complete.

Same work as the above.

---

## No 4920. न्यायसिद्धाञ्जनम्.
## NYĀYASIDDHĀÑJANAM.

Substance, palm-leaf. Size, $18\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 104. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 83*a*. The other work herein is Nyāyasiddhāñjanavyākhyā 1*a*.

Three Paricchēdas complete.

Same work as the above.

---

## No. 4921. न्यायसिद्धाञ्जनव्याख्या.
## NYĀYASIDDHĀÑJANAVYĀKHYĀ.

Substance, palm-leaf. Size, $14\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 432. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Incomplete.

A commentary on the Nyāyasiddhāñjana of Vēdāntadēśika; by Raṅgarāmānujamuni.

**Beginning:**

अतसीगुच्छसच्छायमाञ्चितोरस्स्थलं श्रिया ।
अञ्जनाचलशृङ्गार(मञ्जलिर्मम गाहताम्) ॥
(श्रीमत्ता)तार्यपादाब्जं हृदये भावये शुभम् ।
आत्मानं लभते जन्तुर्ययोस्त्वात्मसमर्पणात् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मम शारीरकस्वान्तविज्ञानं यत्कृपाफलम् ।
तं तातयार्यप्रवणं वात्स्यानन्तगुरुं श्रये ॥
श्रीरामानुजभाष्याध्वा येन निष्कण्टकीकृतः ।
जयन्तु कृतयस्तस्य निगमान्तगुरोश्शुभाः ॥
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

चिकीर्षितस्य ग्रन्थस्याविघ्नपरिसमाप्त्यर्थंशिष्टाचारप्राप्तं गुरुपरम्परास्मरणरूपं मङ्गळमाचरन् प्रेक्षावत्प्रवृत्त्यर्थं विषयप्रयोजनाधिकारिणश्च निर्दिशन् सिद्धाञ्जननामकरणे प्रवृत्तिनिमित्तरूपं तत्सादृश्यं च व्यञ्जयन् वेदान्ततात्पर्यपरिज्ञानकुशलसम्प्रदायाभिज्ञकर्तृकत्वेन ग्रन्थान्तरवैलक्षण्यं च दर्शयति—श्रीमद्वेङ्कटनायक इति । सिद्धाञ्जनपक्षे हि अत्यर्थमोहजनकपटलसंसर्गदूषितनयनानां यथावस्थितपदार्थनिरीक्षणोपयोगित्वम् । प्रकृते च मोहसमूहव्यापनदूषितबुद्धीनां तत्त्वनिरीक्षणोपयोगित्वमिति द्रष्टव्यम् । तत्त्वस्य पूर्वाचार्यप्रदर्शितस्य निरीक्षणे भवद्ग्रन्थस्य कथमुपयोग इत्याशङ्क्याह—सदसद्भूमिकेति ।

See under the next number for the end.

---

## No. 4922. न्यायसिद्धाञ्जनव्याख्यानम्.

## NYĀYASIDDHĀÑJANAVYĀKHYĀNAM.

Substance, palm-leaf. Size, 18⅝ × 1½ inches. Pages, 279. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Contains Paricchēdas 1 to 5 complete.

Same work as the above.

See under the previous number for the beginning.

**Colophon :**

इति न्यायसिद्धाञ्जनव्याख्याने बुद्धिपरिच्छेदः पञ्चमः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End :**

तथा च दृश्यत इति । जातिरिति शेषः । चक्षुषा दृश्यत इति योजना । जातिविज्ञानजनकत्वमिति । यथोदितं जातिविजातिविज्ञानजनकत्वं चक्षुषो युज्यत इति भावः ॥

न क्वाप्यतः परमदृश्यत कोशशेषः तच्छेषपूरणकृतिः परिहासहेतुः ।
ज्ञातव्यमन्यदपि तैर्निरणायि सम्यग्ग्रन्थान्तरेष्विति न किंचिदिहास्ति चि-
[न्त्यम् ॥

श्रीरामानुजभाष्याध्वा येन निष्कण्टकीकृतः ।
जयन्तु कृतयस्तस्य निगमान्तगुरोश्शुभाः ॥

---

No. 4923. न्यायसिद्धाञ्जनव्याख्या.

NYĀYASIDDHĀÑJANAVYĀKHYĀ.

Pages, 164. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 4920.

Triguṇadravyaparicchēda and Jīvaparicchēda only complete.

Same work as the above.

---

No. 4924. पञ्चकोशविचारः.

PAÑCAKŌŚAVICĀRAḤ.

Pages, 18. Lines, 8 on a page.

Begins on fol. 231*a* of the MS. described under No. 1859.

An investigation into the nature of the five sheaths of the soul according to Viśiṣṭādvaita-Vēdānta.

Incomplete.

**Beginning :**

कामव्यसनपीडिताः स्त्रीपुरुषा अन्योन्यं योनिमेढ्रसंस्पर्शं कुर्व[ा]ते । ततश्च कालकर्मसम्बन्धनिबन्धनमृतुकाले पुरुषशरीरगतशुक्लं मेढ्रद्वारा विनिस्सृतं सत् योनिद्वारा स्त्रीगर्भाशये प्रविश्य शोणितेन सह मिलितं प्रथमेऽहनि कललाकारं द्वितीयेऽहनि बुद्बुदाकारोन्मुखं तृतीयेऽहनि बुद्बु-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्रूपं च सत् वारपक्षमासक्रमेण करचरणाद्यवयवसन्निवेशविशिष्टं शरीरं भूत्वा नवमे वा दशमे वा मासि जायते । ततश्च क्षीरादिसेवया प्रत्यहं वृद्धिमुपगतं जरारोगमरणादिदोषविदूषितं मांसास्थिमयमिदं स्तम्भवत्परि-दृश्यमानं स्थूलशरीरमेवान्नमयकोशः । तदेतच्छरीरं शुक्लशोणितपरिणा-मरूपं मलमूत्रगर्तमत्यन्तापवित्रममङ्गलमनित्यं प्रतिक्षणमपायसहस्रसङ्कुलितं शास्त्राचार्योपदेशरहितानां यथाजातजनानां पशुसमानानां पुनःपुनश्शरी-रानुवृत्त्यनुकूलकर्मकलापनिरतानां श्वसूकरादीनां मलमिव प्रेमालम्बनमपि । शास्त्रसद्गुरुशिक्षितानां पुरुषधौरेयाणां सर्वतो निर्विण्णानामेवञ्जातीयशरी-रानुवृत्तिनिवृत्तिकामानां क्रिमिकुलशतसङ्कुलव्रणविदूषितमार्जालाद्दूरादेव सो-द्वारं विसर्जनीयम्; न त्वादरणीयमिति सर्वेषां प्रत्यक्षमेवैतत् ॥

**End:**

नात्मा वपुः पार्थिवमिन्द्रियाणि देही ह्यसुर्वायुजलं हुताशः ।
मनोऽन्नमात्रं धिषणा च सत्त्वमहङ्कृतिः खं क्षितिरर्थसाम्या ॥

इत्यादयः ॥

इति पञ्चकोशविचारे पञ्चमं प्रकरणम् ॥

अथ भावाभेदान् विचारयामः—

* * * *

यदा तु ज्ञानाभ्यासिनो मुमुक्षोस्तव अस्मदुपदिष्टप्रकारेण प्राज्ञा-दित्रयस्य.

---

## No. 4925. परतत्त्वनिर्णयः.

## PARATATTVANIRṆAYAḤ.

Pages, 49. Lines, 6 on a page.

Begins on fol. 21*a* of the MS. described under No. 4889.

Incomplete.

A Viśiṣṭādvaita treatise which establishes that Nārāyaṇa is the Supreme Brahman of the Vēdānta.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

श्रीमद्रामानुजमुनिवरैर्यामुनाद्यैर्मुनीन्द्रै-
रप्याचार्यैर्बहुभिरपरैर्विस्तरेणाभ्यधायि ।
विष्णुस्तत्त्वं परमिति परन्यायमन्वादिवाक्यै-
र्व्यक्तार्थाभिः श्रुतिविततिभिस्तद्वयं सङ्क्षिपामः ॥

अत्रैवं साध्यते—नारायणः परं ब्रह्मेति । अत्र पूर्वपक्षी मन्यते—रुद्र एव सर्वस्मात्परं तत्त्वमिति । तथा हि—यतो वा इमानीत्यादिना जगत्कारणमेव परं तत्त्वमित्यवगम्यते । तच्च कारणं किमित्यपेक्षायां छान्दोग्ये सदेव सौम्येदमग्र आसीदित्यादिना वाक्येन जगत्कारणं सच्छब्दवाच्यमिति प्रतीयते ।

**End :**

नन्वणोरणीयानित्यनुवाके यो देवानां प्रथमं पुरस्ताद्विश्वाधिको रुद्रो महर्षि(ः ।) हिरण्यगर्भं पश्यत जायमानं स नो देवश्शुभया स्मृत्या संयु(न)क्त्विति हिरण्यगर्भोत्पत्तेः प्रागवस्थितत्वश्रवणेन रुद्रस्य सर्वकारणत्वं प्रतीयते.

---

No. **4926.** **परमुखचपेटिका.**

PARAMUKHACAPEṬIKĀ.

**Pages, 24.** Lines, 7 on a page.

Begins on fol. 7*a* of the MS. described under No. 4887.

Complete.

A tract the name whereof means 'a blow on the face of opponents': deals with the interpretation of the word Nārāyaṇa, and points out that it cannot mean Śiva but can only mean Viṣṇu.

By Śrīśaila Kṛṣṇa.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

सेवे सुरभितभुवनं संयमिवरचरणचन्दनद्वन्द्वम् ।
छायां श्रयन् यदीयां स्थाणुमपर्णाश्रयं तिरस्कुरुते ॥
भगवद्द्वेषदग्धेन केनचिद्बुधमानिना ।
उक्तार्थेषु स्फुटान्दोषान्विदुषामुपदर्शये ॥

यदुक्तं नारायणशब्दश्शिवपरः शिववृत्तिधर्मावच्छिन्नप्रतिपादकत्वात्, यथा—शिवशब्द इति । तदयुक्तम्—घटो द्रव्यमितिवाक्यघटकद्रव्यपदे व्यभिचारात् द्रव्यत्वेन घटपरे शिववृत्तिद्रव्यत्वावाच्छिन्नप्रतिपादकतया हेतुमति शिवविषयकेश्वरतात्पर्यात्मकशिवपरत्वरूपसाध्यविरहात् । शिवमात्रवृत्तिधर्मावाच्छिन्नप्रतिपादकत्वस्य हेतूकरणे स्वरूपासिद्धिः ।

**End :**

भगवदाराधनसम्पादिनेषड्भिभवतया प्रसिद्धः भगवद्विभूतिभूतिष्वनन्तकोटिब्रह्माण्डमण्डलेष्वेकतमब्रह्माण्ड उदुम्बरफलान्तर्गतः कश्चिन्मशकः भगवते चक्रं प्र(।)दादिति बाह्यानां निर्लज्जः प्रलापो निरूपकैः परिहसनीयः ॥ इति ॥

श्रीशैलकृष्णदासं द्वारं विरचय्य देशिकैः कलिता ।
प्रीत्यै भागवतानां भूयात् परमुखचपेटिका लघ्वी ॥

---

No. **4927.** परिकरविजयः.
PARIKAKAVIJAYAḤ.

Substance, palm-leaf. Size, 15⅛ × 1½ inches. Pages, 136. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

A Viśiṣṭādvaita-Vēdānta work which determines and describes the characteristics of those faithful Śrī-Vaiṣṇavas who are devoted to the worship of Viṣṇu.

By Doddayācārya who is also called Rāmānujadāsa and Mahācārya.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

अथ क एते सन्तः ?

"धृतोर्ध्वपुण्ड्रः कृतचक्रधारी विष्णुं परं ध्यायति यो महात्मा ।
स्वरेण मन्त्रेण सदा हृदि स्थितं परात्परं यन्महतो महान्तम् ॥"

इति श्रुतिप्रतिपन्नभगवच्चिह्नलक्षिता इति ब्रूमः । एतच्च भगवल्ला ञ्छनधारणं श्रुतिस्मृतीतिहासपुराणपाञ्चरात्राचारेषु प्रसिद्धम् । तथा हि शतपथे—

अथ कात्या(य)नेति होवाच परं ब्रह्मेत्येको देवो विश्वतश्चक्षुरिति विश्वात्मा विश्वतोबाहुस्स एष पुरुषोऽन्तर्यामी विश्वतोमुखः । सर्वात्मा विश्वतस्स्यादिति ।

**End:**

श्रीभागवते—

"निन्दन्ति ये भगवतश्चरणारविन्दचिन्ताविधूतसकलाशुभकल्मषौघान् ।
तेषां यशोधनसुखायुरपत्यबन्धुक्षेत्रादय(:) स्थिरतरा अपि यान्ति नाशम् ॥"

इत्यादि ।

पाञ्चरात्रे—

"वासुदेवरतं नित्यं ये निन्दन्ति द्विजाधमाः ।
विवासयन् खरारोहं कृत्वा भूपस्स सारभाक् ॥"

इत्यादि बहु द्रष्टव्यम् ॥

**Colophon:**

इति श्रीरामानुजपदपङ्कज(भृङ्गायमाण)श्रीमद्वेदान्तगुरुसिद्धान्तनिर्वाहकश्रीदोड्डयाचार्यकृतौ परिकरविजयस्सम्पूर्णः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4928. पाराशर्यविजयः.

## PĀRĀŚARYAVIJAYAḤ.

Substance, paper. Size, 13¼ × 8¼ inches. Pages, 875. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

The first Adhyāya complete.

An exposition of the Brahmasūtras so as to be in support of the Viśiṣṭādvaita-Vēdānta: by Mahācārya, a pupil of Śrīnivāsa of Vādhūlagōtra.

**Beginning:**

पाराशर्यो दयालुर्जयति बहुविधान्वेदमार्गप्रदीपान्
सम्यक्तर्काख्यशास्त्रै(:) प्रति(भटकुहनाकूल)सर्वङ्कषैस्तैः ।
ब्रह्मण्यैश्वर्यभूतिर्गु(ती गु)णगणविततिं हर्तुकामान्कुतर्कै-
स्तैस्तैर्दुर्लङ्घ्यमायावितितिविरचितैर्न्यायमार्गप्रवीणैः ॥

वेदापहारिणं दैत्यं मीनरूपी निराकरोत् ।
तदर्थहारिणस्सर्वान्व्यासरूपी महेश्वरः ॥

पाराशर्यजयोऽस्माभि(:) ख्याप्यते च सतां मुदे ।
वाधूलश्रीनिवासार्यगुरूणामनुकम्पया ॥

श्रियःपतिरवाप्तसमस्तकल्याणगुणगणभूषितो भगवानात्मतनूजाय ब्रह्मणे वितीर्णे ब्रह्मशेवधिं वेदब्रह्म दैत्येनापहृतं मीनरूपेणावतीर्य दैत्यं संहृत्य सितब्रह्मणे प्रदाय तदर्थं कुदृष्टिभिरपहृतं पुनर्व्यासरूपेणावतीर्य कुदृशो निर्जित्य विबुधेभ्यः प्रददौ ।

अत्र तावदिदं विचार्यते । किं मीमांसाशास्त्रं द्वैतविषयम्? उताद्वैतविषयमिति? केचिच्छुद्धाद्वैतविषयमिति । परे विशिष्टाद्वैतविषयमिति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End :**

एतेन सर्वे (व्याख्याता) व्याख्याताः ।

एतेन प(ा)दचतुष्टयोक्तन्यायकलापेन । सर्व(र्वे) वेदान्तेषु जगत्कारणप्रतिपादनपरास्सर्वे वाक्यविशेषाश्चेतनाचेतनविलक्षण . . . . . व्याख्याता इति पदाभ्यासोऽध्यायपरिसमाप्तिद्योतनार्थः ॥

**Colophon :**

इति श्रीवाधूलकुलतिलकश्रीनिवासार्यपदसेवासमधिगतपरापरतत्त्वयाथात्म्येन तदेकदेवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचिते पाराशर्यविजये प्रथमस्याध्यायस्य चतुर्थः पादः ॥

समाप्तश्चाध्यायः ॥

---

## No. 4929. पुच्छब्रह्मवादनिरासः.

## PUCCHABRAHMAVĀDANIRĀSAḤ.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 29. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 22*a*. The other works herein are Brahmapada, śaktivāda 1*a*, Ṣaṣṭhyarthanirṇaya 37*a*.

Complete.

An unfavourable criticism of the view of **Advaitins that what is denoted** by the word Puccha in a well-known context in the Taittirīyōpaniṣad is the Supreme Brahman.

**Beginning :**

यद्ध्यानात्परमानन्दस्सिध्येद्वाचामगोचरः ।
कारणं जगतामीशं तमानन्दमयं श्रये ॥

इह तावत्पुच्छब्रह्मवादिनः पूर्वपक्षिणः । आनन्दमयब्रह्मवादिनश्च सिद्धान्तिनः । वादकथा प्रस्तूयते । पुच्छब्रह्मवादिनस्तावदाहुः—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उपक्रमे ब्रह्मविदाप्नोति परमिति उपायभूतज्ञानविषयो ब्रह्मशब्दः प्रयुज्यते । तदर्थसुखप्रतिपत्तये चान्नमयादिकोशावतारः । ब्रह्मशब्दो यत्रोपसंह्रियते तदेवोपास्यं ब्रह्मेत्युपगन्तव्यम् । ब्रह्मशब्दश्च ब्रह्म पुच्छं प्रतिष्ठेति पुच्छ एवोपसंह्रियते नानन्दमये । अतो नानन्दमयो ब्रह्म; अपि तु पुच्छमेवेति ।

**End:**

यतो वा इमानि भूतानीत्यादिना पुनरनूदितं ब्रह्मणो मूर्धाभिषिक्तं जगत्कारणत्वरूपं लक्षणम् । आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त इत्यादिना आनन्दात्मकानन्दमयनिष्ठतया उपसंह्रियमाणमानन्दमयस्य ब्रह्मत्वे निरपवादं कारणमिति कथं तद्विरोधिनी पुच्छस्य ब्रह्मताकल्पनेति यत्किञ्चिदेतत् ॥

**Colophon:**

इति पुच्छब्रह्मवाद(निरास)स्सम्पूर्णः ॥

---

## No. 4930. पूर्वोत्तरमीमांसैककण्ठ्यम्.

## PŪRVŌTTARAMĪMĀṀSAIKAKAṆṬHYAM.

Substance, palm-leaf. Size, $19\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 62. Lines, 9 on a page. Character, Grantha. Condition, much injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is **Pūrvōttaramīmāṁsaikakaṇṭhya** 32*a*.

Incomplete.

On the oneness in aim of the **Pūrvamīmāṁsā** and the **Uttaramīmāṁsā.**

**Beginning:**

प्रांशुं काञ्चन . . . तममुं राकेन्दुबिम्बोज्ज्वलं
वन्दे यत्पदपङ्कजं प्रणमतां मू . . . . . . . |

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



. . . . . . . कलं सन्ध्यानटीधूर्जटि-
श्रीमन्मौलिपरिभ्रमत्सुरनदीपूरप्रियम्भावुकः ॥

आश्रीधरं देशिकरत्नपङ्क्तिमा चास्मदाचार्यवरान् नतोऽ(स्मि) ।
. . . . . . . . . . . . ज्वालाप्रलीढान् सहसा धिनोति ॥

मरन्दानादाय श्रुतिगणवनात् क्षौद्रपटले
व्यधात्सूत्रव्याजेऽनितरसुलभं यो मुनिवरः ।
. . . . . . . . . . . . . . . . णया
तदर्थाख्यां माध्वीं य इह कलये तौ मुनिवरौ ॥

* * * *

आवश्यको हि सर्वेषां तदुक्तार्थस्य निर्णयः ।
यन्मूलः पूर्वपरयोः शास्त्रयोरैक्यनिश्चयः ॥

इह खलु परमकारुणि . . . . . . . . . . . . . . . ामः व्यासरूपेणावतीर्य त्रयीं व्याचिख्यासुः तत्र पूर्वभागतत्त्वार्थनिर्धारणाय निजान्तेवासिनं जैमिनिं नियुज्य तदुक्त . . . . . . . . . . . . . . . . . . . रकं शास्त्रं निरूपयितुं प्रववृते । तस्य प्रमेयार्थप्रतिज्ञा-परमिदमादिमं सूत्रम्—

ओमथातो ब्रह्मजिज्ञासा ।

अत्रायमथ . . . . . . . . . . . . . . . . . . . . इति श्रीमद्भाष्यम् । अथ कर्मविचारानन्तरम् । अतः कर्मविचारस्य वृत्तत्वात् ब्रह्मणः जिज्ञासा विचाररूपा कर्तव्या इति सूत्रार्थः ।

**End:**

अत्र यदाग्नेयोऽष्टाकपाल इत्युदाहरन्ति तद्व्याख्यायां तूलिकाख्या-यामपि वचनानि स्वपूर्वत्वादित्यत्र यदाग्नेयोऽष्टाकपाल इत्यादीनि किं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विधिरुतानुवाद इति विशये यच्छब्दानुबन्धादनुवाद इति पूर्वपक्षं कृत्वा अन्यतः प्राप्तस्यैवानुवादसम्भवादष्टाकपालादीना.

---

## No. 4931. पूर्वोत्तरमीमांसैककण्ठ्यम्.

## PŪRVŌTTARAMĪMĀṀSAIKAKAṆṬHYAM.

Pages, 9. Lines, 9 on a page.

Begins on fol. 32*a* of the MS. described under No. 4930.

Incomplete.

Similar to the above.

**Beginning:**

विहितमनयमर्थं यः पुमर्थैश्चतुर्भिः
सफलयति वदान्यः स्वप्रसादेन देवः ।
निखिलनिगमवेद्ये सिध्यतु श्रीसखेऽस्मिन्
भगवति निरवद्ये भक्तिरात्यन्तिकी नः ॥
स जयति जैमिनिरादौ जयति पुनः काशकृत्स्नोऽपि ।
नारायणावतारो जयति परं बादरायणः श्रीमान् ॥
निर्मत्सरा निशमयन्त्विदमादरेण कर्माधिकारनयसूत्रगतिं समीचीम् ।
शारीरकेण घटयत्ययमस्मदुक्त्या देवस्तुरङ्गवदनो जगदन्तरात्मा ॥

अथातो धर्मजिज्ञासेत्यारभ्यानावृत्तिश्शब्दादनावृत्तिश्शब्दादित्येवमन्तं विंशतिलक्षणमेकं शास्त्रम् । वा(सा)हि मीमांसा वेदवाक्यार्थविचारात्मिका.

**End:**

श्रावयितृवच्च तस्याप्यवसरसंभवात् । न हि ब्रह्मचारिणः श्रावकत्वं तस्य श्रोतृदशार्थत्वात् । अस्य तु यदि श्रवणावसरः कस्तस्य श्रवणे विरोधः? वृत्त्यर्थं तस्याध्ययनादिकं विहितामिति चेत् श्रोतुर्यदृच्छालब्धेः कुलमागतेर्वा.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4932. प्रणवदर्पणः.

## PRAṆAVADARPAṆAḤ.

Substance, paper. Size, 13¼ × 8½ inches. Pages, 52. Lines, 28 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 40*a*. The other works herein are Lalitābhāṣya 1*a*, Tarkacandrikā 66*a*.

Complete in 2 Paricchēdas.

Herein the author comes to the conclusion that the syllable Ōṁ does not form part of the aphorisms in Bādarāyaṇa's Brahmasūtras: by Śrīnivāsācārya, son of Śrīśaila-Tātayācārya and Lakṣmī, and pupil of Śrīnivāsādhvarin of Kauṇḍinyagōtra.

**Beginning:**

अथ स्यान्न ब्रूमो वयमसंहितानिर्देशोऽनुषङ्गे प्रमाणमिति; तर्हु- दाहृतश्रुतिबलादथातश्शब्दतुल्यतया प्रथमसूत्रादावुच्चारणीयतयावगत ओ- ङ्कारे तद्वदेवावयवत्वात्संहिताया निर्देष्टव्येऽपि स्रवत्यनोङ्कृतं पूर्वं पर[ ]- स्ताच्च विशीर्यत इति श्रुतिबलात्प्रथमसूत्रोपक्रमगत एवोङ्कारस्तदुपसंहारे जन्मादिसूत्राद्यन्तयोश्च क्रमादनुष्ठातव्यमित्यमुमर्थं संसूचयितुं सूत्रकारेणा- संहितानिर्देशः कृत इति ब्रूम इति । मैवम्—

असंहितावादस्यैवानुपलब्धिबाधे तत्त्वस्योक्तत्वात् स्मृतिप्राप्तोपजीव- नेन श्रुतेरनुषङ्गपरत्वकथनस्योपहास्यत्वाच्च ।

**End:**

पदगतावयवत्वस्यैवेदं लक्षणमिति मानान्तरप्रयोज्यं मन्त्रान्तिमत्र- तादौ तदवयवत्वेऽपि न दोषः । विस्तरस्त्वन्यत्रेति सर्वमवदातम् ॥

सूत्रावयवतामाद्ये प्रणवे व्याहरन्ति ये ।
प्रणवे विस्तरं न्यायं सम्यगेतेऽभिजानते ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सूर्यानुगुण्यगुण्येषु सूत्रेष्वकृतबुद्धयः ।
तारावतारमिथ(च्छन्त)स्सत्यं ध्वान्तानुवर्तिनः ॥

उदक्षरतया व्याख्यामुदासीयां वदन्ति ये ।
उदक्षरत्वमेतेषां वदन्ति सुधियो बुधाः ॥

सूत्रोत्सादोऽन्यथापाठस्तद्भेदश्च तदेकता ।
अपार्थत्वमसाङ्गत्यं व्युत्क्रमश्च विरोधिता ॥

पौनरुक्त्यं द्वयोरैक्यमेकं द्वैधं नयेष्विति ।
व्यक्तं सर्वमिदं सम्यक् तत्त्वमूतार्ण्य(ण्व)दर्शिनाम् ॥

अदूष्यं श्रीभाष्यं विमतिवशता(तो)दूष्यमिति ये
वदन्त्येतान्मान्यानपि न बहुमन्ते(न्ये)मतिमतः ।
अपार्थेष्वत्यर्थं निहितहृदयांस्तान् सहृदयं
(यतो)विष्णुः कृष्णः स्व(सु)मतिमिह पुष्णात्यनुपदम् ॥

त्र्यन्तसन्ततिपदे बहुधा प्रवृत्तां ध्वान्तानुवृत्तिमपहृत्य गुरुप्रसादात् ।
भास्वद्यतीन्द्रकृपया च कथं यदेतत् सन्तो निरीक्ष्य दयया मुदमा-
[श्रयन्तु ॥

तन्त्रस्वातन्त्र्यपूर्णा(र्णा)ण्णयगुरुतनयात्तातयार्यात्प्रसूतः
कौण्डिन्यश्रीनिवासाध्वरिवरकरुणावासभाष्यार्थवित्तः ।
लक्ष्म्यम्बागर्भजन्यस्स्वसहजकृपया न्यस्तशास्त्रप्रशस्तिः
श्रीशैलश्रीनिवासोऽतनुत कृतिमिमां प्रीतये विश्वमूर्तेः ॥

**Colophon** :

इति श्रीशैलश्रीनिवासार्यविरचिते प्रणवदर्पणे द्वितीयः परिच्छेदः ॥

प्रणवदर्पणं समाप्तम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4933. प्रणवदर्पणः.

## PRAṆAVADARPAṆAḤ.

Substance, palm-leaf. Size, 17½ × 1⅜ inches. Pages, 68. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, new.

Complete.

Same work as the above.

The transcription of this manuscript was completed by Rāmānujadāsa, son of Māḍapūsi Veṅkaṭācārya on the 13th day of the bright half of the Mithuna month in the year Piṅgala.

---

## No. 4934. प्रतिज्ञावादार्थः.

## PRATIJÑĀVĀDĀRTHAḤ.

Pages, 29. Lines, 6 on a page.

Begins on fol. 19*a* of the MS. described under No. 3121.

Complete.

A discussion of the import of certain aphorisms referring to an 'initial enunciation' in the Vēdānta-Sūtras, according to Viśiṣṭādvaita-Vēdānta; by Anantācārya.

**Beginning:**

आराध्य वारिधिसुतादयिताङ्घ्रियुग्ममानम्य लक्ष्मणयतीश्वरमादरेण ।
तोषाय सर्वविदुषां कुतुकात् प्रतिज्ञावादं सयुक्तिकमनन्तसुधीर्विधत्ते ॥

इह खलु प्रतिज्ञाविरोधात्प्रतिज्ञाहानिरव्यतिरेकादित्यादिषु प्रतिपादितायां एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाया विवेचनाय सद्विद्याघटकः कश्चिदंशो व्याख्यायते । पिता तावदुद्दालकस्समस्तवेदवेदाङ्गपारीणं कर्ममीमांसोपचितमनसं श्वेतकेतुं प्रति पुत्रस्नेहेन ब्रह्मोप[प]दि(दि)क्षुस्तस्य ब्रह्मजिज्ञासामुत्पादयितुमाह—स्तब्धोऽस्युत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति । स्तब्धोऽसि निर्व्यापारोऽसी-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्यर्थः । यद्यपि व्यापारसामान्याभावरूपं निर्व्यापारत्वं श्वेतकेतौ बाधितं, तथाप्यलौकिकपुरुषार्थप्रयोजकव्यापारशून्यत्वमबाधितमिति न दोषः ।

**End:**

न च विशेषणेऽपि तदन्वयात्तल्लाभ इति वाच्यम्; विशेष्यबाधस्थल एव तथात्वात् सविशेषणे हीति न्यायस्य बाधघटितत्वात् । एवं स्वभेदनिषेधस्य स्वस्मिन् सिद्धतया वैयर्थ्याच्च । तस्मादद्वैतमतमसङ्गतमिति दिक् ॥

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

**Colophon:**

इति प्रतिज्ञावादार्थः ॥

---

## No. 4935. प्रतिज्ञावादार्थः.

## PRATIJÑĀVĀDĀRTHAḤ.

Pages, 23. Lines, 18 on a page.

Begins on fol. 11*a* of the MS. described under No. 4885.

Complete.

Same work as the above.

---

## No. 4936. बिम्बतत्त्वप्रकाशिका.

## BIMBATATTVAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 14 × $1\frac{3}{8}$ inches. Pages, 156. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Complete.

A treatise criticising unfavourably the view of the Advaitins that the individual soul is nothing other than the reflection of the Supreme Brahman in Māyā.

By Dēvarāja.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

नमस्ते भव्यरूपाय कल्याणगुणशालिने ।
मम सर्वस्वभूताय विनताभाग्यराशये ॥
कर्मब्रह्मात्मकं शास्त्रं ये . . . . . . ।
. . . . . र्थान् प्रणमामि पुनः पुनः ॥
श्री(मतो मे)गुरोर्लब्धवेदान्तद्वयसम्पदा ।
रच्यते देवराजेन बिम्बतत्त्वप्रकाशिका ॥
बिम्बैक्य(क्ये)प्रतिबिम्बस्य वादिविप्रतिपत्तितः ।
संशये तन्निरासोऽत्र सन्नियोगाद्विधीयते ॥

* * * *

दर्पणे मम मुखं भातीत्यादिप्रतीत्यनुरोधेन ग्रीवास्थमुखस्यैव दर्पणाद्युपाधिना भानोपपत्तौ ग्रीवास्थमुखातिरेकेण दर्पणे मुखाभानोत्पत्तिकल्पनायोगात् बिम्बप्रतिबिम्बयोस्स्वरूपैक्यमेव युक्तमिति ।

**End :**

एतेन जीवादन्य एव ईश्वरप्रतिबिम्बो वेदान्तेषूपास्यतया विधीयते; न त्वीश्वर इति त्वन्मतरहस्यमपि निरस्तम् । उक्तदूषणगणग्राहा(हग्रा)सात् ।

तत्र दूषणा . . . . . . . . . . एतद्ग्रन्थोक्तन्यायपरामर्शात्स्वयमेवोह्यानीति सर्वं समञ्जसम् ॥

---

No. **4937.** ब्रह्मपदशक्तिवादः.

BRAHMAPADAŚAKTIVĀDAḤ.

**Pages,** 42. **Lines,** 7 **on a page.**

Begins on fol. 1*a* of the MS. described under No. 4929.

Complete.

An investigation into the significatory power of the word Brahman; by Anantārya.

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

मुरहरचरणाब्जध्यानधारां विधाय प्रथितयतिपतिश्रीपादपद्मं प्रणम्य ।
विशदतममनन्ताचार्यवर्यः प्रसिद्धां प्रकटयति विविक्तं ब्रह्मशब्दस्य श-
[क्तिम् ॥

इह तावद्ब्रह्मशब्दप्रवृत्तिनिमित्तं विचार्यते—स्वावच्छिन्नाश्रयत्वस्वावच्छिन्नाश्रयाश्रयत्वस्वावाच्छिन्नप्रयोजकसङ्कल्पवत्त्वैतत्त्रितयसम्बन्धेन परममहत्परिमाण[त्व]वत्त्वरूपं बृहत्त्वमेव ब्रह्मपदप्रवृत्तिनिमित्तम् । ब्रह्मणश्च विभुत्वेन परममहत्परिमाणाश्रयत्वात् ।

**End:**

प्रकृते अर्थसामान्यपदेन ब्रह्मविशेष्यकाचेतनत्वाद्यवच्छिन्नभेदकूटविधेयकानुमितिजनकतावच्छेदकप्रकारताश्रयत्वस्यैव विवक्षणेन जगत्कारणत्वे तदभावेन व्यभिचाराभावात् । तादृशजन्माद्यधिकरणटीकावाक्यं च सोपपत्तिकं व्याख्यातं लक्षण इत्यलमि(म)तिविस्तरेण ॥

इति ब्रह्मशक्तिवादः ॥

**Colophon:**

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

---

## No. 4938. ब्रह्मलक्ष्मनिरूपणम्.

BRAHMALAKṢMANIRŪPAṆAM.

Pages, 24. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 4171.

Complete.

A discussion determining the characteristics of the Supreme Brahman.

By Anantācārya.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

भुवनजननस्थेमध्वंसादिलीलमनाकुलं
यदुगिरितटाधारं नत्वा श्रियःपतिमञ्जसा ।
यतिपतिपदाम्भोजे बद्धान्तरङ्गमचञ्चलं
कलयति मुदानन्तार्यो ब्रह्मलक्ष्मनिरूपणम् ॥

जगज्जन्मादिकारणत्वं ब्रह्मणो लक्षणमिति वेदान्तोदन्तः । तथा च सूत्रम् "जन्माद्यस्य यतः" इति । ननु सत्यं ज्ञानमित्यादिलक्षणस्यापि श्रुतिसिद्धत्वात् तदेव कथं न सूत्रितमिति चेदत्र श्रुतप्रकाशिकानुसारिणः—यद्धर्मावच्छिन्नविषयतान्तःपातिविषयता मोक्षजनकतावच्छेदकविषयताव्यापिका तादृशधर्मावच्छिन्नमेव सूत्रकृता विवक्षितम् ॥

**End :**

तद्विषयिताव्यापकविषयितानिरूपकत्वस्यैव तद्घटकतारूपत्वात् जन्मादिसमुदायनिरूपितकारणतात्वमित्याकारकज्ञाने जन्मादिनिरूपितकारणतात्वविषयिताविरहादिति सङ्क्षेपः ॥

---

No. **4939.** ब्रह्मलक्षणवाक्यार्थः.

BRAHMALAKṢAṆAVĀKYĀRTHAḤ.

Substance, palm-leaf. Size, 15⅞ × 1⅜ inches. Pages, 76. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Brahmajñānanirāsa 39*a*.

Complete.

An explanatory treatise on the meaning of the scriptural passages describing the characteristics of the Brahman.

By Śaṭhakōpa-muni, a disciple of Śaṭhāri-sūri.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

अव्याद्योऽयमदृष्टपूर्वकरटप्रेक्षाक्षणाकम्पित-
स्वेदार्द्रीकृतकुङ्कुमारुणरुचामुद्वीक्ष्य संरम्भतः ।
मत्वा ध्वाङ्क्षविदारितां प्रणयिनीमस्त्रेण तार्णेन यो
विव्याधारिदृशं प्रियाहसितसप्रज्ञोऽपि सत्यव्रतः ॥
प्रणम्य श्रीहयग्रीवचरणाम्भोरुहद्वयम् ।
ब्रह्मलक्षणवाक्यार्थः सङ्ग्रहेण प्रकाश्यते ॥

परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् । तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत इति प्रत्यक्षादिवेद्यानामैहिकक्रियाफलानामिव कृतकत्वाविशेषेण श्रुतिवेद्यानां पारत्रिकक्रियाफलानामपि अनित्यत्वस्य श्रुत्यैव निश्चिततत्वात् वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णन्तमसस्तु पारे । तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते । . . . . . .

वेदनं ब्रह्मस्वरूपनिरूपकलक्षणवाक्यार्थविचारेण विना न सम्भवतीति लक्षणवाक्यार्थविचार एवात्र क्रियते ।

**End:**

तस्मात्सत्यं ज्ञानमनन्तं ब्रह्मेति लक्षणवाक्येन परस्य ब्रह्मणो नारायणस्य सत्यत्वैकरूपत्वस्वयंप्रकाशत्वसर्वव्यापकत्वलक्षाणा गुणा एव स्वरूपनिरूपकाः प्रतिपाद्यन्त इति ॥

**Colophon:**

इति श्रीसर्वतन्त्रस्वतन्त्रभगवद्रामानुजाचार्यसिद्धान्तधुरन्धरश्रीशठारिसूरिचरणारविन्दसेवासमधिगतवेदान्तसुधारसस्य श्रीशठकोपमुनेः कृतिषु वाक्यार्थसङ्ग्रहः समाप्तः ॥

श्रियः पुरुषकारत्वमुपायत्वं तु तत्पतेः ।
तथाधिकारिनिष्ठां[नां] च सोपायान्तरदूषणम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमद्भागवतानां तु वैलक्षण्ययुजां सताम् ।
गौरवं सत्प्रपन्नानां दिनचर्यानुवर्तनम् ॥
सद्गाचार्यस्वरूपेण सह तच्छिष्यलक्षणम् ।
निर्हेतुककृपापूर्ववैभवं परमं पदम् ॥
इमानर्थविशेषान् यो वाक्यालङ्कृतिगोचरान् ।
अकरोत्तत्पदद्वन्द्वं सदा चित्ते करोम्यहम् ॥

---

## No. 4940. ब्रह्मविद्याविजयः.
## BRAHMAVIDYĀVIJAYAḤ.

Substance, paper. Size, 11¼ × 8¾ inches. Pages, 221. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

A polemical treatise on the identification of the Supreme Being of the Vēdānta with Viṣṇu; by Rāmānujadāsa *alias* Mahācārya of Vādhūlagōtra, pupil of Śrīnivāsācārya.

**Beginning:**

पुरुषे ब्रह्मविद्यानां मुण्डकेन स्वयम्परः ।
ख्यापितं ख्यापयन्त्येताः स्वं भावं पुरुषे स्वयम् ॥

परविद्या तावद्भगवन्निष्ठा पुरुषश्रुत्यभ्यासात् । अक्षरपुरुषशब्दे सामानाधिकरण्यादमृतशब्दादेकर्षिशब्दात्प्रत्यभिज्ञानाल्लिङ्गादुपबृंहणाच्च ।

**End:**

अत्रोदाहृतानामनुदाहृतानाञ्चोपनिषदां स्वारसिकपदयोजनानुगुणं तात्पर्यरहस्यं मदीयोपनिषन्मङ्गलदीपिकायां द्रष्टव्यम् ॥

**Colophon:**

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरापरतत्त्वयाथात्म्येन तदेकदेवतेन तच्चरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचिते वेदान्तविजये ब्रह्मविद्याविजयो द्वितीयः ॥

ब्रह्मविद्याविजयस्समाप्तः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गाधिजर्षिकुलोत्पन्नवेङ्कटार्यतनूभवः ।
राघवार्याभिधो विद्वान् महागुरुजनप्रियः ॥
वेदान्तविजये ब्रह्मविद्याविजयमद्भुतम् ।
द्वैतीयिकं समालोच्य व्यलिखद्बहुलादरात् ॥
इति ब्रह्मविद्याविजयः ॥

---

## No. 4941. ब्रह्मविद्याविजयः.

## BRAHMAVIDYĀVIJAYAḤ.

Substance, paper. Size, 11 × 8¾ inches. Pages, 118. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Incomplete.

Same work as the above.

---

## No. 4942. ब्रह्मसागुण्यनिरूपणम्.

## BRAHMASĀGUṆYANIRŪPAṆAM.

Pages, 11. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 3979.

Incomplete.

A tract to show that the Brahman is characterised by transcendental qualities.

**Beginning:**

शङ्खचक्रमहामुद्रापुस्तकाढ्यचतुर्भुजम् ।
सम्पूर्णचन्द्रसङ्काशं हयग्रीवमुपास्महे ॥
ब्रह्मसागुण्यवैगुण्यघटनैस्त्रिविधां त्रयीम् ।
एकधा वदतोऽणिष्ठान्त्रयीनिष्ठान्न मन्महे ॥

इह तावत् अचिन्त्यविविधविचित्ररचनास्पदास्थिरद्रव्यभेदभिदुरनिखिलजगज्जननसंरक्षणक्षपणलीलादक्षिणं परं ब्रह्म प्रतिपादयन्त्यो---यतो

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व, तद्ब्रह्मेत्याद्याः श्रुतयस्तदुपयुक्तशक्तिसार्वज्ञ्यसत्यसङ्कल्पादीन् कल्याणगुणानाक्षिपन्ति, प्रतिक्षिपन्ति च तद्विरोधिनो हेयगुणानिति निरस्तसमस्तहेयसम्बन्धगन्धमनवधिकसुगुणरत्नाकरं ब्रह्म सम्यगुपासीनास्तरन्ति दुस्तरं संसारमिति सर्वजनीनमेतत् ।

**End:**

इह ब्रह्मणि नाना अन्योन्यविलक्षणत्वेन प्रमाणान्तरावगतं किञ्चन किमपि वस्तु नास्तीति ब्रह्मगतत्वेन सर्वं निषिध्यते; गुणाश्च सर्वान्तर्गता इति; तेऽपि तदैव निषिद्धास्स्युरिति । ननु न स्वरूपेण ब्रह्मणि सर्वं निषेद्धुं शक्यम्; नानाशब्दार्थविरोधात् । नहीदं सर्ववस्तुगतवास्तववैलक्षण्यपरम्.

---

## No. 4943. ब्रह्मसूत्रभाष्यम्.

## BRAHMASŪTRABHĀṢYAM.

Substance, palm-leaf. Size, 19⅝ × 1⅝ inches. Pages, 446. Lines, 10 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

A commentary on the Brahmasūtras of Vyāsa; by Rāmānujācārya, the famous propounder of the Viśiṣṭādvaita view of the Vēdānta.

**Beginning:**

अखिलभुवनजन्मस्थेमभङ्गादिलीले विनतविविधभूतव्रातरक्षैकदीक्षे ।
श्रुतिशिरसि विदीप्ते ब्रह्मणि श्रीनिवासे भवतु मम परस्मिञ्छेमुषी भक्तिरूपा ॥

पाराशर्यवचस्सुधामुपनिषद्दुग्धाब्धिमध्योद्धृतां
संसाराग्निविदीपनव्यपगतप्राणात्मसञ्जीवनीम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पूर्वाचार्यसुरक्षितां बहुमतिव्याघातदूरस्थिता-
मानीतां तु निजाक्षरैस्सुमनसो भौमाः पिबन्त्वन्वहम् ॥

भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्यास्संचिक्षिपुः । तन्मतानुसारेण सूत्राक्षराणि व्याख्यास्यन्ते—

अथातो ब्रह्मजिज्ञासा ।

अत्रायमथशब्द आनन्तर्ये भवति । अतश्शब्दो वृत्तस्य हेतुभावे । अधीतसाङ्गसशिरस्कवेदस्याधिगताल्पास्थिरफलकेवलकर्मज्ञानतया सञ्जात-मोक्षाभिलाषस्यानन्तस्थिरफलब्रह्मजिज्ञासा ह्यनन्तरभाविनी । ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा । ब्रह्मण इति कर्मणि षष्ठी । कर्तृकर्मणोः कृतीति विशेषविधानात् ।

End:

यदि परमपुरुषायत्तं मुक्तैश्वर्यम् ; तर्हि तस्य स्वतन्त्रत्वेन तत्सङ्कल्पा-न्मुक्तस्य पुनरावृत्तिसम्भवाशङ्केत्यत्राह—

अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् ।

यथा निखिलहेयप्रत्यनीककल्याणैकतानो जगज्जन्मादिकारणं समस्त-वस्तुविलक्षणस्सर्वज्ञस्सत्यसङ्कल्प आश्रितवात्सल्यैकजलधिः परमकारुणिको निरस्तसमाभ्यधिकसम्भावनः परब्रह्माभिधानः परमपुरुषोऽस्तीति शब्दाद-वगम्यते ; एवमहरहरनुष्ठीयमानवर्णाश्रमधर्म(ानुगृहीततदु)पासनरूपतत्स-माराधनप्रीत उपासीनाननादिकालप्रवृत्तानन्तदुस्तरकर्मसञ्चयरूपाविद्यां वि-निवर्त्य स्वयाथात्म्यानुभवरूपानवधिकातिशयानन्दं प्रापय्य पुनर्नावर्तय-तीत्य(पि शब्दादेवा)वगम्यते । शब्दश्च स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्तत इत्यादि(कः) । तथा च भगवता स्वयमेवोक्तम् —

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



"मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानस्संसिद्धिं परमां गताः ॥
आ ब्रह्मभवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥"

इति । न चोच्छिन्नकर्मबन्धस्यासङ्कुचितज्ञानस्य परब्रह्मैकानुभवस्वभावस्य तदेकप्रियस्यानवधिकातिशयानन्दं ब्रह्मानुभवतोऽन्यापेक्षा । तदर्थारम्भाद्यसम्भवात् पुनरावृत्तिशङ्का । न च परमपुरुषस्सत्यसङ्कल्पोऽत्यर्थप्रियं ज्ञानिनं लब्ध्वा कदाचिदावर्तयिष्यति । य एवमाह—

"प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ।
उदारास्सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ॥
आस्थितस्स हि युक्तात्मा मामेवानुत्तमां गतिम् ।
बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ॥
वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः ।"

इति ॥ सूत्राभ्यासश्शास्त्रपरिसमाप्तिं द्योतयतीति सर्वं समञ्जसम् ॥

**Colophon:**

इति श्रीभगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

समाप्तश्च चतुर्थोऽध्यायः ॥

समाप्तं शास्त्रम् ॥

रामानुजकृतं भाष्यं पूर्णाय महते मुदा ।
लिखितं देवराजेन शब्दारम्वधजन्मना ॥
सर्वदेशदशाकालेष्वव्याहतपराक्रमा ।
रामानुजार्यदिव्याज्ञा वर्धतामभिवर्धताम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4944. ब्रह्मसूत्रभाष्यम्.

## BRAHMASŪTRABHĀṢYAM.

Substance, palm-leaf. (Śrītāla) Size, 19½ × 2½ inches. Pages, 48. Lines, 15 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Śrīprapatti 25*a*.

Contains the commentary on the first 4 Sūtras.

Same work as the above.

---

## No. 4945. ब्रह्मसूत्रभाष्यम्.

## BRAHMASŪTRABHĀṢYAM.

Substance, palm-leaf. Size, 17¾ × 1⅝ inches. Pages, 284. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins with the commentary on the 2nd Adhyāya and breaks off in the commentary of the last Sūtra on the 4th Pāda of the 4th Adhyāya.

Same work as the above.

---

## No. 4946. ब्रह्मसूत्रभाष्यम्.

## BRAHMASŪTRABHĀṢYAM.

Pages, 410. Lines, 11 on a page.

Begins on fol. 1*a* of the MS. described under No. 1859.

Wants 9 leaves in the beginning. Breaks off in the course of the commentary on the 4th Pāda of the 4th Adhyāya.

Same work as the above.

---

## No. 4947. ब्रह्मसूत्रभाष्यम्.

## BRAHMASŪTRABHĀṢYM.

Substance, palm-leaf. Size, 17 × 1⅝ inches. Pages, 120. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, new.

Incomplete.

Contains also 3 pages of the Sūtras.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4948. ब्रह्मसूत्रभाष्यम्.

## BRAHMASŪTRABHĀṢYAM.

Substance, palm-leaf. Size, $14\frac{5}{8} \times 1\frac{5}{8}$ inches. Pages, 334. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Commentary on the Prakṛtyadhikaraṇa only.

Same work as the above.

---

## No. 4949. ब्रह्मसूत्रभाष्यम्.

## BRAHMASŪTRABHĀṢYAM.

Pages, 150. Lines, 12 on a page.

Begins on fol. 8*a* of the MS. described under No. 1873.

Contains the commentary on the first four Sūtras of the first Pāda of the first Adhyāya.

Same work as the above.

---

## No. 4950. ब्रह्मसूत्रभाष्यम्.

## BRAHMASŪTRABHĀṢYAM.

Substance, palm-leaf. Size, $19\frac{3}{4} \times 1\frac{5}{8}$ inches. Pages, 254. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, not new.

Contains commentaries on the following portions—

The first Pāda of the first Adhyāya, 3 Sūtras in the second Pāda, 26 Sūtras in the first Pāda of the second Adhyāya.

Same work as the above.

---

## No. 4951. ब्रह्मसूत्रभाष्यम्.

## BRAHMASŪTRABHĀṢYAM

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{5}{8}$ inches. Pages, 330. Lines, 8 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Incomplete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4952. ब्रह्मसूत्रभाष्यम्.

## BRAHMASŪTRABHĀṢYAM.

Substance, palm-leaf. Size, 17⅞ × 1½ inches. Pages, 460. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, old.

The commentary is from the beginning of the second Pāda of the second Adhyāya to the third Pāda of the third Adhyāya.

Same work as the above.

---

## No. 4953. ब्रह्मसूत्रभाष्यदूषणोद्धारः.

## BRAHMASŪTRABHĀṢYADŪṢAṆŌDDHĀRAḤ.

Pages, 137. Lines, 9 on a page.

Begins on fol. 118*a* of the MS. described under No. 4895.

Īkṣatyadhikaraṇa incomplete.

A treatise which explains away certain apparent difficulties and defects pointed out by Advaitins in the Śrībhāṣya.

**Beginning:**

निर्व्याजकृपया श्रीमद्रामानुजमुनीश्वरः ।
मदारम्भं कलयतादञ्जसा सप्रयोजनम् ॥

जगज्जन्मस्थेमाप्ययनियमनामेयमहिमा
नतत्राताभीतिप्रदमृदुलकारुण्यपटिमा ।
त्रयीशृङ्गाभङ्गप्रगुणगुणसर्वस्वगारेमा
रमानेता चेतःपदमिदमुपैतु प्रतिपदम् ॥

त्रयीमयीं दुग्धमदुग्ध यो मुनिः पयस्विनीं सूत्रमिषादशेषतः ।
विपच्य चातच्य विमथ्य यो ददौ तदर्थगव्यं प्रणमामि तावुभौ ॥

* * * *



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अग्रजचरणानुग्रहजाग्रदशेषप्रशस्तशास्त्रगतिः ।
श्रुत्यन्तभाष्यदूषणकृत्यानधुना धुनोमि तानबुधान् ॥
श्रीमद्भाष्यमदूष्यं हरिणा गुरुणाथ सूत्रकर्त्रा वा ।
दूषयतामतिमान्द्यं मतिमान्द्यं कृतिमुखेन कथयामि ॥

* * * *

इह खलु भगवान् बादरायणः भगवन्नयभग्नजनोद्दिधीर्षया त्रयीं व्याचिख्यासुः तत्र पूर्वभागार्थनिर्णयाय निजान्तेवासिनं जैमिनिं नियुज्य तदुत्तरभागार्थनिर्दिधारयिषया स्वयमेव शारीरकं शास्त्रं निरूपयितुं प्रववृते । तस्य प्रमेयार्थप्रतिज्ञापरमिदमादिमं सूत्रम्—अथातो ब्रह्मजिज्ञासा । अत्रायमथशब्द आनन्तर्ये भवति; अतश्शब्दो वृत्तस्य हेतुभाव इति श्रीमद्भाष्यम् । अस्यायमभिप्रायः ।

**End:**

न नान्तज्योतिरित्यादेराद्यपादासङ्गतिर्दोषः; कारणत्वस्य उपचितपुण्यविशेषेषु कारणत्वाव्यावृत्तनिरतिशयदीप्त्युपास्यत्वादियुक्तेषु जीवेष्वेव सम्भावितस्य वैलक्षण्यसाधकत्वमिति शङ्कानिरासायान्तज्योतिरित्यादेरपि नामधेयं स्यादिति पादशेषस्योक्तम्.

---

## No. 4954. ब्रह्मसूत्रभाष्यव्याख्या-तत्त्वटीका.

## BRAHMASŪTRABHĀṢYAVYĀKHYĀ : TATTVAṬĪKĀ.

Pages, 462. Lines, 20 on a page.

Begins on fol. 85*a* of the MS. described under No. 4867.

Incomplete.

A commentary on the Śrībhāṣya of Rāmānuja, by Vēdāntadēśika.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

स जयति यतिराजमुनिः करुणाजलधिः क्षमापरिष्कारः ।
करिशैलकृष्णमेघः काङ्क्षितवर्षी यदर्पितैस्तोयैः ॥

* * * *

प्रणम्य वरदाचार्यवादिहंसाम्बुदावपि ।
त्रय्यन्तसूत्रभाष्यार्थतत्त्वटीका विधीयते ॥
असावनतिसङ्क्षेपादतिविस्तारवर्जनात् ।
सर्वान्वयानुकूलत्वाद्गृह्यतां सारवेदिभिः ॥
शातिनश्शतदूषण्यां शङ्करादिमुदा(धा)ग्रहः ।
शारीरकशरीरं तु व्यक्तमत्र प्रदर्श्यते ॥
विश्वामित्रकुलीनेन वेदा(न्ता)चार्यसूरिणा ।
शश्वाद्विधीयते विश्ववैतण्डिकविधूननम् ॥
निखिलनिगमश्रेणीचूडापरिष्कृतिरूपिणी
निपुणमनसामाशासौधस्थलीषु निबध्यते ।
यतिपतिभुवो भाष्यस्यासौ यथाश्रुतचिन्तित-
प्रवचनविधावष्टाविंशे जयध्वजपङ्क्तिका ॥

तत्र तावत्

अखिलेत्यादिभाष्यस्य दशार्थानभिदध्महे ।
विषयादित्रिकस्योक्तिः प्रथमं प्रतिपाद्यते ॥
तस्यार्थस्य च सौत्रत्वात्तद्विस्तारात्मकं पुनः ।
अनवद्यमिदं पद्यं भाष्यलक्षणलक्षितम् ॥

यद्यपि अथातो ब्रह्मजिज्ञासेति सूत्रं ब्रह्मजिज्ञासोस्तद्विचारस्य कर्तव्यत्वे प्रवृत्तम्; तथापि शारीरकविषयादिष्वपि अर्थतो वर्तते ।

**End :**

अत्र किं प्रतिज्ञावाक्यम्? कानि तदुपपादकवाक्यानि? कथञ्च तेषाम् एवमेव तात्पर्यमित्यत्राह—प्रपञ्चित इति । ननु बुद्धिशब्दान्तरा-



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिकं रज्जुसर्पादिष्वध्यासाददत्या(दृष्ट्या)दिषु द्रव्यान्तरयोगाच्च दृष्टम् ; मृत्पिण्डघटादिष्वपि तथा भा . . भावे कथं द्रव्यैक्योपपादनमित्यत्राह—अत्रापीति । निपुणतरं परोक्षप्रतीतिबलानुसारेणाहिकुण्डलवदास्ते । त . . . धीत इत्यादिवच्च कार्यस्य सत्यत्वे.

---

## No. 4955. ब्रह्मसूत्रभाष्यव्याख्या—तत्त्वटीका.

### BRAHMASŪTRABHĀṢYAVYĀKHYĀ : TATTVAṬĪKĀ.

Substance, palm-leaf. Size, 19⅜ × 1½ inches. Pages, 360. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Incomplete.

Same work as the above.

---

## No. 4956. ब्रह्मसूत्रभाष्यव्याख्या—तत्त्वटीका.

### BRAHMASŪTRABHĀṢYAVYĀKHYĀ : TATTVAṬĪKĀ.

Substance, palm-leaf. Size, 12¾ × 1¼ inches. Pages, 82. Lines, 7 on a page. Character, Grantha. Condition, fair. Appearance, new.

Incomplete.

Same work as the above.

---

## No. 4957. ब्रह्मसूत्रभाष्यव्याख्या—तत्त्वटीका.

### BRAHMASŪTRABHĀṢYAVYĀKHYĀ : TATTVAṬĪKĀ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 88*a* of the MS. described under No. 2765.

Incomplete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4958. ब्रह्मसूत्रभाष्यव्याख्या—नयप्रकाशिका.

## BRAHMASŪTRABHĀṢYAVYĀKHYĀ : NAYAPRAKĀŚIKĀ.

Substance, paper. Size, 13⅛ × 8¼ inches. Pages, 1213. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Adhyāyas 1 and 4 complete.

A commentary on the Śrībhāṣya; by Mēghanādāri, son of Nātha (Nāthamuni) and Adhvaranāyikā of Ātrēyagōtra. The names of his brothers are Hastyadrinātha, Varadarāṭ and Rāmamiśra.

**Beginning:**

श्रीमदात्रेयनाथार्यान् गुरून् नः परमान् गुरून् ।
श्रीरामप्रमुखान् सर्वान् श्रीमद्रामानुजं मुनिम् ॥

* * * *

प्रणम्य लक्ष्मणार्यस्य भाष्ये त्रय्यन्तगोचरे ।
गम्भीरेऽतिनिगूढानां नयानां तु प्रकाशने ॥
प्रयत्नः क्रियते बुद्ध्या तत्प्रसादसमुत्थया ।
यथाश्रुतं यथाशक्ति मेघनादारिणा मया ॥
आचार्याणां निबन्धेषु प्राचां प्रौढेषु सत्स्वपि ।
विवृतौ भाष्यशब्दानां यतस्तेषामुपक्षयः ॥
भाष्यस्यापि च सूत्राणां पाठगत्यनुधावनात् ।
शङ्कोत्तरत्वात्तेषां च पूर्वराद्धान्तपक्षयोः ॥
व्यामिश्रत्वादुपन्यासो मन्दधीभिर्न शक्यते ।
तेषां चाप्य(ति)सङ्कोचाद्दीपग्रन्थेऽपि कृत्स्नशः ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्यन्तगहनं भाष्यमुपादायापि शब्दतः ।
अन्यत्रापि यथायोग्यं तद्व्याख्या क्रियते स्फुटम् ॥
कर्ममीमांसानभिज्ञज्ञापनाय यथोचितम् ।
तत्र तत्र प्रदृश्य(दर्श्य)न्ते न्यायास्तत्रोदिता अपि ॥
अन्या अपि च वैचिन्त्यो निरीक्ष्या ग्रन्थ एव तु ।
प्रणम्य याचे भूयोऽपि प्राज्ञानस्य निरीक्षणम् ॥
प्रणिपातप्रसन्ना हि साधवोऽभीष्टदायिनः ।

ग्रन्थस्योपक्रमे निर्विघ्नपरिसमाप्त्यर्थं प्रचयगमनार्थं च स्वाभीष्टपरदेवतानुस्मृतिरूपां भक्तिं शब्दात्प्रार्थयमाना भाष्यकृत(:) श्रोतृशिष्यबुद्धिसमाधानाय चार्थाच्छास्त्रप्रतिपाद्यार्थं सङ्गृह्णन्त्याखिलेतिश्लोकेन । प्राचामाचार्याणां ग्रन्थारम्भे स्वेष्टदेवताविषयनमस्काराद्यन्यतमाचारात् तदनुष्ठेयता सिद्धा ।

* * * *

एवं जगतस्तदधीनत्वतत्कार्यत्वादिप्रतिपादनमुखेनातादधीन्यातत्कार्यत्वव्युदासाद्ब्रह्मैककार्यत्वं स्थिरीकृतं चतुर्थपादेनेति । अयं च विभागस्सम्प्रदायसिद्धत्वादुपपन्नत्वाच्चानुसन्धेयः ॥

**Colophon:**

इति प्रथमाध्यायस्य चतुर्थः पादः ।

. . . . . . . द्वारभेदात्कार्यपरान्वितस्वार्थाभिधाने अन्येषाम्; लिङादे(दि)स्तु कार्याभिधाने व्युत्पद्यत इति चेत् निष्कृष्याभिधानप्रदर्शनपरत्वात्तद्ग्रन्थस्य.

**End:**

तदैश्वर्यस्य परमात्मगुणानुभवमात्रविषयत्वमित्येतत्सर्वं निरवद्यत्वेन सर्वत्र प्रसिद्धम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीलक्ष्मणार्यो जयताद्यतीन्द्रः खिलीकृतं यः खलु युक्तिगुल्मैः ।
दात्रैस्समीचीननयाभिधानैराम्नायमार्गं सुगमं चकार ॥

यत् . . . सिद्धेति सूत्रभाष्ये कृता कृतिः ।
परप्रेरणयैवाद्या सर्वत्रासौ प्रसिध्यति ॥

यस्यातिप्रथितः पितात्रिकुलजो नाथाह्वयो भूतले
विख्यातोऽध्वरनायिकी(के)ति जननी हस्त्यद्रिनाथाह्वयः ।
ज्येष्ठ(ः) श्रेष्ठगुणोऽनुजो वरदराट् श्रीराममिश्रानुजः
तेनाकारि नयप्रकाशकमिदं नाम्नेन्द्रजिद्वैरिणा ॥

**Colophon :**

इति श्रीमदात्रेयनाथसूरिसूनुना मेघनादारिना(णा) विरचितायां नयप्रकाशिकायां चतुर्थाध्यायस्य चतुर्थः पादः समाप्तः ॥

---

No. **4959.** **ब्रह्मसूत्रभाष्यव्याख्या—मूलभावप्रकाशिका.**

BRAHMASŪTRABHĀṢYAVYĀKHYĀ : MŪLABHĀVAPRAKĀŚIKĀ.

Substance, (Śrītāla) palm-leaf. Size, $19\frac{7}{8} \times 2\frac{1}{4}$ inches. **Pages, 58.** Lines, 15 on a page. Character, Telugu. Condition, good. Appearance, old.

Jijñāsādhikarṇa incomplete.

This commentary on the Śrībhāṣya is called Mūlabhāvaprakāśikā.

By Raṅgarāmānuja.

**Beginning :**

अतसीगुच्छसच्छायमञ्चितोरस्स्थलं श्रिया ।
अञ्जना(च)लश्रृङ्गारमञ्जलिं(लि)र्मम गाहताम् ॥

वरदं द्विरदाद्रीशं श्रीनिधिं करुणानिधिम् ।
शरण्यं शरणं यामि प्रणतार्तिहरं हरिम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बहिरन्तस्तमश्छेदि ज्योतिर्वन्दे सुदर्शनम् ।
येनाव्याहतसङ्कल्पं वस्तु लक्ष्मीधरं विदुः ॥

सम्यङ्न्यायकलापेन महता भारतेन च ।
उपबृंहितवेदाय नमो व्यासाय विष्णवे ॥

तस्मै रामानुजार्याय नमः परमयोगिने ।
यः श्रुतिस्मृतिसूत्राणामन्तर्ज्वरमशीशमत् ॥

प्रपद्ये प्रणवाकारं भाष्यं रङ्गमिवापरम् ।
परस्य ब्रह्मणो यत्र शेषित्वं स्फुटमिष्यते ॥

अविस्मृतास्सुगम्भीरा रामानुजमुनेर्गिरः ।
दर्शयन्तु प्रभावेण स्वभावमखिलं दृढम् ॥

इह खलु भगवान् भाष्यकारः कुमतिकलुषितं शारीरकं शास्त्रं लोकानुजिघृक्षया पूर्वाचार्यमतानुसारेण व्याचिख्यासुर्भाष्यनिर्णयभ(यौ)पयिकशारीरकार्थतत्त्वज्ञानस्य—

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

भक्त्या त्वनन्यया शक्यः अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परं तपः ॥

इत्यादिप्रमाणैर्भगवद्भक्तिसाध्यत्वं मन्वानः प्रारिप्सितग्रन्थस्याविघ्नपरिसमाप्तिप्रचयगमनाय शिष्टाचारप्राप्तं भगवद्भक्त्याशीरूपं मङ्गलमाचरति—अखिलेत्यादिना ।

* * * *

भगवद्बोधायनवृत्तिसङ्ग्रहात्मकटङ्कद्रमिडादिपूर्वाचार्यग्रन्थमूलकत्वेन स्वभाष(ष्य)स्य अतथाभूतशङ्करभाष्यादिभ्यो वैलक्षण्यप्रदर्शनमुखेन स्वकृ-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तिसाफल्यं प्रदर्शयन् चिकीर्षितं प्रतिजानीते—भगवद्बोधायनेति । विस्तीर्णामित्यनेन बोधायनवृत्तेराधुनिकजनानुपयुक्तत्वं सूचितम् ।

**End:**

यदि च ज्ञातृज्ञेयरूपसम्बन्धिव्यङ्ग्यमात्रेण ज्ञानस्य भेदस्सम्बन्धिभेदकृत इत्यौपाधिकस्स्यात्; संयोगादेरपि सम्बन्धिव्यङ्ग्यमात्रेण घटकरकावच्छिन्नाकाशवदेकत्वं प्रसज्येत । सम्बन्धि(न्धः) द्विधा—सत्ताहेतुर्व्यक्तिहेतुश्चेति । यस्य संयोगादेस्सम्बन्धिव्यतिरेकेण स्वरूपे प्रमाणं नास्ति, तस्य सम्बन्धि(न्धः)सत्ताहेतुः । यस्य त्वाकाशादेरस्ति, तस्य तदुपाधितो भेदा.

---

## No. 4960. ब्रह्मसूत्रभाष्यव्याख्या—मूलभावप्रकाशिका.

### BRAHMASŪTRABHĀṢYAVYĀKHYĀ : MŪLABHĀVAPRAKĀŚIKĀ.

Substance, paper. Size, 11 × 8⅞ inches. Pages, 111. Lines, 20 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Incomplete.

Same work as the above.

---

## No. 4961. ब्रह्मसूत्रभाष्यव्याख्या—श्रुतप्रदीपिका.

### BRAHMASŪTRABHĀṢYAVYĀKHYĀ : ŚRUTAPRADĪPIKĀ.

Substance, paper. Size, 13 × 8 inches. Pages, 372. Lines, 22 on a page. Character, Grantha. Condition, good. Appearance, new.

Incomplete.

A commentary on the Śrībhāṣya; by Sudarśanasūris, on of Viśvajayī of Harita family and disciple of Varadācārya.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning :**

वरदं द्विरदाद्रिशेखरं कमलाया दयितं दयानिधिम् ।
सकलार्थिजनार्थितप्रदं प्रणमामि प्रणतार्तिहारिणम् ॥

आरिप्सितग्रन्थस्याविघ्नपरिसमाप्तिप्रचयगमनार्थमिष्टदेवतोपासनरूपं मङ्गळं श्रुत्या कुर्वन्नार्थं प्रतिपाद्यं सङ्क्षेपतश्श्रोतृबुद्धिसमाधित्सया दर्शयति—अखिलेति । प्रथमेन पादेन प्रथमह्निकार्थसङ्क्षेपः । भवतीति भुवनं कार्यजातम् ; कतिपयकारणचतुर्मुखादिव्यावृत्त्यर्थमखिलशब्दः । प्रायिकत्वनिवृत्त्यर्थं सकलेत्यनुक्तिः ।

* * * *

अन्वहं भोग्यातिशयात् गभीरत्वाच्च पूर्वाचार्यग्रन्थाः प्रवर्तन्तां किं ग्रन्थान्तरनिर्माणतत्प्रवर्तनयत्नगौरवेणेत्यत्राह — भगवदिति । पूर्वाचार्यशब्दो विवृतः । शङ्करादिभ्योऽपि ज्ञानाधिक्यपरो भगवच्छब्दः । द्रमिडाचार्यादिग्रन्थोऽतिसङ्क्षिप्तः । तन्मतानुसारेण न तु स्वोत्प्रेक्षया । सूत्राक्षराणि यथाकथञ्चिद्योजयितव्यानीति भावः । व्याङ्भ्यां विवक्षितविस्तरानपेक्षितसङ्कोचौ विवक्षितौ । व्याख्येयमुपादत्ते —अथेति । पूर्वप्रवृत्ताप्रतिपत्तिरूपापवादेन प्रसिद्धिप्रकर्षस्याकिञ्चित्करतया संशयविपर्ययौ स्त इति तद्व्युदासायाथशब्दं व्याचष्टे—अत्रेति । अथशब्द आनन्तर्य इति । प्रतिज्ञा भवतीति स्वारस्यं सूचितम् ।

See under the next number for the end.

---

No. **4962.** ब्रह्मसूत्रभाष्यव्याख्या—श्रुतप्रदीपिका.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ : ŚRUTAPRADĪPIKĀ.

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 354. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Commentary on the 4th Adhyāya incomplete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Same work as the above.

See under the previous number for the beginning.

* * * *

**Colophon:**

इति हरितकुल(तिल)कविश्वजयिसूनुना श्रीर(ङ्ग)राजदिव्याज्ञालब्ध-वेदव्यासापरनामधेयेन श्रीमद्वरदाचार्यपादसेवासमधिगतभगवद्रामानुज-विरचितशारीरिकममिांसाभाष्यहृदयेन श्रीसुदर्शनसूरिणा विलिखितायां श्रुत-प्रदीपिकायां प्रथमस्याध्यायस्य प्रथमः पादः ॥

* * * *

इति श्रुतप्रदीपिकायाश्चतुर्थस्य तृतीयः पादः ॥

**End:**

अविभागेन दृष्टत्वात् । सङ्गतिः स्पष्टा ।

साम्यसाधर्म्यशब्दौ वचनस्थत्वादुपात्तौ नार्थभेदात् । सर्वश्रुत्या साम्यसाधर्म्यो(प)चारम.

---

No. **4963.** ब्रह्मसूत्रभाष्यव्याख्या—श्रुतप्रकाशिका.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ: ŚRUTAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, $16\frac{1}{2} \times 2\frac{3}{8}$ inches. Pages, 94. Lines, 16 on a page. Character, Grantha. Condition, good. Appearance, new.

Incomplete.

An exhaustive commentary on the Śrī-bhāṣya of Rāmānuja called Śrutaprakāśikā; by Sudarśanasūri, the author also of the Śrutapradīpikā.

**Beginning:**

वरदं द्विरदाद्रीशं श्रीनिधिं करुणानिधिम् ।

शरण्यं शरणं यामि प्रणतार्तिहरं हरिम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बहिरन्तस्तमश्छेदि ज्योतिर्वन्दे सुदर्शनम् ।
येनाव्याहतसङ्कल्पं वस्तु लक्ष्मीधरं विदुः ॥

* * * *

श्रीरङ्गेशाज्ञया लब्धव्याससंज्ञं सुदर्शनम् ।
वाचा विजयिनः पुत्रं भाष्यभक्तिरचूचुदत् ॥
गुरुभ्योऽर्थश्श्रुतश्शब्दैस्तत्प्रयुक्तैश्च योजितः ।
सौकर्याय बुभुत्सूनां सङ्कलय्य प्रकाश्यते ॥

* * * *

सर्वेषां पुरुषाणां प्रमाणाधीनप्रमेयानिश्चयानामुपादित्सिताजिहासितेष्टानिष्टसाधनानामलौकिकपुरुषार्थे तत्साधने च वस्तुनि . . . . . . . . . . सदसद्विवेचनचतुरपूर्वाचार्यपरिचितं प्राचीनमेव समीचीनमध्वानं निष्कण्टकीकृत्य परमपुरुषार्थाभ्यर्थिजनसार्थं कृतार्थयितुं भवभयाभितप्तजनभागधेयवैभवभाविताव तरणेन परमकारुणिकेन भगवता भाष्यकारेण शारीरकं शास्त्रं व्याचिख्यासितम् ।

See under the next number for the end.

---

No. **4964.** ब्रह्मसूत्रभाष्यव्याख्या–श्रुतप्रकाशिका.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ :
ŚRUTAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 19½ × 1¾ inches. Pages, 688. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Same work as the above.

See under the previous number for the beginning.

**End :**

सर्वशब्देन अनुदाहृतश्रुतिस्मृतीतिहासपुराणवचांसि, तदनुग्राहकतर्कजातं च विवक्षितम् । तेषामाम्नायादीनां सामञ्जस्यं द्रष्टव्यम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उक्तार्थबाधकत्वेन ये प्रमाणतर्का(:) परैः प्रयुक्ताः, तेषां सर्वेषां परिहारोऽत्रास्त्येव । एतदनन्तर्भूतोऽर्थो नास्ति ; तस्मादुक्तप्रकारेण बाधकप्रमाणतर्कपरिहारश्चानुसन्धेय इत्यभिप्रायेण इति सर्वं समञ्जसम् इत्युक्तम् ॥

**Colophon:**

इति हारीतकुलतिलकवाग्विजयिसूनुना श्रीरङ्गराजदिव्याज्ञालब्धवेदव्यासापरनामधेयेन श्रीमद्वरदराजार्यपादसेवासमधिगतभगवद्रामानुजविरचितशारीरकमीमांसाभाष्यहृदयेन श्रीसुदर्शनसूरिणा विरचितायां श्रुतप्रकाशिकायां चतुर्थस्याध्यायस्य चतुर्थः पादः । अध्यायश्च समाप्तः ॥

---

## No. 4965. ब्रह्मसूत्रभाष्यव्याख्या—श्रुतप्रकाशिका.

### BRAHMASŪTRABHĀṢYAVYĀKHYĀ: ŚRUTAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 324. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, new.

Same work as the above.

Contains commentaries on the second Sūtra of the first Pāda and 24 Sūtras of the second Pāda of the first Adhyāya.

---

## No. 4966. ब्रह्मसूत्रभाष्यव्याख्या—श्रुतप्रकाशिका.

### BRAHMASŪTRABHĀṢYAVYĀKHYĀ: ŚRUTAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, 18⅜ × 1½ inches. Pages, 579. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Commentary on the first Sūtra complete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4967. ब्रह्मसूत्रभाष्यव्याख्या—श्रुतप्रकाशिका.

### BRAHMASŪTRABHĀṢYAVYĀKHYĀ : ŚRUTAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, $16\frac{7}{8} \times 1\frac{1}{8}$ inches. Pages, 65. Lines, 8 on a page. Character, Telugu. Condition, injured. Appearance, old.

Commentary on the portion from the Mithyātvānumānabhaṅga to the Suṣuptāvahamarthasphuraṇa in the Jijñāsādhikaraṇa.

Same work as the above.

---

## No. 4968. ब्रह्मसूत्रभाष्यव्याख्या—श्रुतप्रकाशिका.

### BRAHMASŪTRABHĀṢYAVYĀKHYĀ : ŚRUTAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 316. Lines, 7 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

The commentary on Pādas 1 to 3 in the 2nd Adhyāya complete, commentary on the 4th Pāda incomplete.

Same work as the above.

---

## No. 4969. श्रुतप्रकाशिकाव्याख्या—भावप्रकाशिका.

### ŚRUTAPRAKĀŚIKĀVYĀKHYĀ : BHĀVAPRAKĀŚIKĀ.

Substance, palm-leaf. Size, $18\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 241. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Commentary on the portion beginning with the second Pāda of the first Adhyāya and ending with the fourth Pāda of that Adhyāya.

A gloss explanatory of Sudarśana's commentary on the Śrībhāṣya (Śrutaprakāśikā) : it is called Bhāvaprakāśikā.

The author is Varadaviṣṇusūri.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



The transcription of this manuscript was finished by Dēśikadāsa on the 24th day of Vṛśeika in the year Virōdhikṛt.

**Beginning:**

सर्वत्र प्रसिद्धोपदेशात् ।

पादानुयायिनोऽर्थस्येति । चिदचिद्विलक्षणकारणास्तित्वस्येत्यर्थः । नन्वर्थभेदादेव पादक्रमोपपत्तौ सङ्गतिः कुतस्सूत्रकाराभिमतेत्याशङ्क्याह— पादभेदो ह्यर्थभेदादिति । न तु क्रमविशेष इति भावः ।

**End:**

अनुदाहृतवाक्यानामतत्परत्वमिति । अनुदाहृतवाक्यानां परमाण्वादिपरत्वाभाव इत्यर्थः । इन्द्रियाणामपि तच्छरीरत्वमुक्तमिति । स्थानादिव्यपदेशाच्चेति सूत्र इति भावः ॥

**Colophon:**

इति श्रीमत्तातार्यचरणारविन्दचञ्चरीकस्य श्रीमद्वरदविष्णुसूरेः कृतौ श्रुतप्रकाशिकाव्याख्यायां भावप्रकाशिकायां प्रथमस्याध्यायस्य चतुर्थः पादः ॥

समाप्तश्चाध्यायः ॥

---

No. **4970.** श्रुतप्रकाशिकाव्याख्या–गुरुभावप्रकाशिका.
ŚRUTAPRAKĀŚIKĀVYĀKHYĀ :
GURUBHĀVAPRAKĀŚIKĀ.

Substance, paper. Size, 9 × 7 inches. Pages, 864. Lines, 16 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Incomplete.

A commentary on the Śrutaprakāśika of Sudarśanasūri; by Śuddhasattva-Lakṣmaṇārya.

**Beginning:**

भगवान् भाष्यकारो भगवता बादरायणेन प्रणीतानां ब्रह्मसूत्राणामर्थं भाष्यमुखेन व्यवृणुत ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अयमत्राक्षेपप्रकारः—

प्रबन्धमारभमाणैः प्रबन्धारम्भे हेतुप्रयोजने प्रतिपादनीये । हेतुप्रयोजनविरहे प्राज्ञानां प्रबलयत्नसाध्यप्रबन्धप्रणयनानुपपत्तेः । तच्चोभयमत्र न सम्भवति । तथा हि—प्रयोजनं द्विविधम्—स्वप्रयोजनं परप्रयोजनं च ।

* * * *

श्रीमान् रामानुजाचार्यो जगज्जीवातुरेधताम् ।
श्रीयादवाद्रिमाहात्म्ये साक्षाच्छेष इति श्रुतः ॥
तस्य मातृष्वसुः पुत्रो विख्यातनिजवासभूः ।
तदाज्ञाफलिताचार्यसिंहासनधुरन्धरः ॥
ज्ञानभक्तिविरक्त्युक्तिवृत्तिशुद्धमनश्चणैः ।
अस्मदाचार्यपर्यन्तैरष्टादशभिरद्भुतैः ।
औरसैरेव तनयैरेधमाननिजान्वयः ॥
मूलं जीयात्कौशिकानां बालधन्विगुरुत्रयः ।
तदादिगुरुरत्नानामुत्तमो वेङ्कटाह्वयः ॥
श्रीमद्द्राविडवेदान्तदेशिकत्वाधिराज्यभाक् ।
श्रीसौम्यवरयोगीन्द्रप्रसादादन्यदुर्लभाम् ॥
रजस्तमोविहीनात्मगुणज्ञगुरुगुम्भिताम् ।
शुद्धसत्त्वाभिधां भव्यां भजन् विजयते गुरुः ॥

* * * *

शुद्धसत्त्वाचार्यनामा तत्पुत्रो मे महागुरुः ।
अयत्नसिद्धसद्वृत्त्या ख्यातो विजयते तराम् ॥
श्रीवैष्णवं पुरस्कुर्वन् पूजां प्राप्नोति यस्सदा ।
न तिरस्कुरुते क्वापि प्रमादादपि वैष्णवम् ॥
वेदान्तद्वयसारार्थान् विशदीकुरुते च यः ।
स्वाचार्यपादाब्जयुगं ध्यायन् प्रतिपदं मुदा ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महर्षेः कीर्तनात्तस्येत्युक्त्वा(क्त्या) म(य)न्नाम्नि कीर्तिते ।
नमस्कुर्वन्ति सत्त्वस्था विमतस्थाश्च विन्दते ॥
तस्य श्रीपादयोर्न्यस्य स्वस्य बुद्धिं तदात्मजः ।
कुरुते लक्ष्मणो हृद्यां गुरुभावप्रकाशिकाम् ॥
चम्पकेशार्यकलितां गुरुतत्त्वप्रकाशिकाम् ।
सद्भिराज्ञापिता शश्वत्समारब्धा बुधैर्मुहुः ॥
श्रुतप्रकाशिकाव्याख्या तत्प्रसादात्समाप्यताम् ।
यत्रास्ते तूलिकासूक्तिर्व्याकुर्वे तत्र तन्मुखात् ॥

* * * *

अथ व्याख्यानभूततूलिकासूक्तिर्व्याख्यायते ।

अत्र तावद्धरदमित्यादिप्रथमश्लोकावतारिका महागुरुभिरित्थमनुगृहीता— वाग्विजयिसूनुस्सुदर्शनापरनामा भट्टार्यवर्यः श्रीमच्छारीरकं भाष्यं व्याचिख्यासुः प्रारिप्सितस्य ग्रन्थस्य अविघ्नपरिसमाप्तिप्रचयगमनार्थमिष्टदेवतोपासनात्मकं मङ्गलमाचरतीति ।

**End:**

ज्ञानी त्वात्मैव मे मतमित्यत्र मतशब्दे नपुंसकलिङ्गस्यार्षत्वेन निर्वाहसम्भवादितिशब्दाध्याहारो न युक्त इत्याशङ्क्याध्याहारं समर्थयिष्यन् तन्मूलभूतानुपपत्तिप्रदर्शनमुखेन परकीयनिर्वाहं तावन्निरस्यति—— मतमिति नपुंसकत्वादिति । अप्रसिद्ध इति । सर्वजनीनगीतोपनिषदध्येतृसंप्रदायविरुद्ध इत्यर्थः । किं च मत इति पाठकल्पने छान्द.

---

## No. 4971. ब्रह्मसूत्रभाष्यव्याख्या.
## BRAHMASŪTRABHĀṢYAVYĀKHYĀ.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 333. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

To the end of Jyōtiradhikaraṇa in the first Adhyāya.

A commentary on the Śrībhāṣya of Rāmānujācārya; by Sundararājadēśika.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

अखिलभुवनहेतौ मोक्षदे संतत्रदा(नता)नां
निखिलनिगमवेद्ये(ब्रह्म)शब्दाभिधेये ।
भवतु विहितलोकत्राणया नित्यरक्षा-
व्रतजुषि मम मात्रा पद्मया सन्नतिर्मे ॥

तैस्तैर्गोमुखदुमु(र्मु)गैर्विमतिभिर्मुष्टां बहु . . . .
(पा)राशर्यवचस्सुधां यतिपतेः श्रीभाष्यवेदात्मनः ।
श्रीमत्सुन्दरराजदेशिकवचोगुम्भप्रसन्नात्मना
प्रत्यानीय समर्पितास्सुमनसो भ(मा:)पिबन्त्वन्वहम् ॥

श्रुतप्रकाशिकातत्त्वटीकादिषु तु विस्तरः ।
निपुणास्तत्र कुर्वन्ति परपक्षापनोदनम् ॥
पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना ।
अन्येषां सुखबोधार्थं क्रियतेऽत्र यथामति ॥
तेषु सम्भावितो दोषः क्षन्तव्यस्समबुद्धिभिः ।
पित्रादिभिर्यथापत्यजल्पितेषु दयाधनैः ॥

इह खलु परमकारुणिकः पाराशर्यः कृष्णद्वैपायनः संसारसागरान्तर्निमग्नानां भविनामुद्दिधीर्षया सर्वाणि शास्त्राण्यालोड्य अशिथिलगतिभिर्युक्तिवर्गैर्विचार्य मोक्षोपायभगवद्भक्तिप्रपत्तिसाधनीभूतार्थपञ्चकप्रतीतिसिद्ध्यर्थं शारीरकचतुरध्यायीं निरमिमीत । टङ्कद्रमिडकुहदेवबोधायनादयः पूर्वाचार्यास्सङ्ग्रहविस्ताररूपेण व्याचख्युः । अर्वाचीनास्तद्विपती(री)ततया व्याचख्युः । तन्निराकरणपूर्वकं तैर्व्याख्यातमेवार्थं नातिसङ्ग्रहविस्ताररूपेण व्याचिख्यासुर्भगवान् भाष्यकारो निर्विघ्नसमाप्तये कृतं मङ्गळं शिष्यशिक्षायै ग्रन्थतो निबध्नाति—अखिलेत्यादिना । अखिलानि समस्तानि । भुवनानि भवन्तीति व्युत्पत्त्या कार्यजातानि । तेषां जन्म उत्पत्तिः, क्षेम(!) स्थितिः, भङ्गः लयः ; ते आदयः येषां ते । आदिशब्देन अन्तःप्रविश्यनियमनादिकं गृह्यते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याख्येयं सूत्रमुपादत्ते—अथातो ब्रह्मजिज्ञासा । अथशब्दस्यानेकार्थत्वं व्याचष्टे—अत्रेति । सामान्यत्वादतश्शब्दं व्याचष्टे—अत इति ।

**End:**

अत एव(स) प्रमाणः । विषयवाक्यमाह—इदमाम्नायत इति । प्रस्तोतः इति सम्बुद्धिः । . . . . . . . . . . पूर्ववदेव प्रश्नप्रतिवचनरूपेण साध्यहेत्वोर्निर्देशः । कृतकत्वशङ्कां परिहर्तुं प्रसिद्धवन्निर्देशेति । अदर्शनादिति । पूर्वाधिकरणविषयवाक्ययोरिव परमात्मव्याप्तलिङ्गाभावात्.

---

## No 4972. ब्रह्मसूत्रभाष्यसङ्ग्रहविवरणम्.

## BRAHMASŪTRABHĀṢYASAṄGRAHAVIVARAṆAM.

Substance, paper. Size, 13¼ × 8¼ inches. Pages, 306. Lines, 28 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

A short exposition of the Śrī-bhāṣya. The author is not known.

**Beginning:**

अखिलेति । आदिपदेन अन्तःप्रवेशनियमनादिकं गृह्यते । विनतेति भूतविशेषणम् । रक्षायां प्रधानदीक्षे । दीक्षा व्रतम् । शेमुषी मोक्षोपयोगिज्ञानम् । सुधेव वच इत्युपमितसमासः । . . . -

सूत्रस्य पदार्थं व्याख्याय वाक्यार्थमाह—मीमांसेति । ज्ञातव्यं विचारयोग्यम् । बोधायनवृत्तिग्रन्थेन तन्मतानुसारं संवादयति—तदाहेति । कर्माधिगमस्यैव पूर्ववृत्तत्वं न केवलं कण्ठोक्तम् ।

**End:**

एतदनन्तर्भूतार्थो नास्ति । तस्मादुक्तप्रकारेण बाधकप्रमाणतर्कपरिहारश्चानुसन्धेय इत्यभिप्रायेण इति सर्वं समञ्जसमित्युक्तम् ॥

332-A

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति श्रीभाष्यसङ्ग्रहविवरणे चतुर्थाध्याये चतुर्थः पादः ॥ चतुर्थाध्यायस्समाप्तः ॥

समाप्तं श्रीभाष्यसङ्ग्रहविवरणम् ॥

---

## No. 4973. ब्रह्मसूत्रभाष्यसङ्ग्रहविवरणम्.

## BRAHMASŪTRABHĀṢYASAṄGRAHAVIVARAṆAM.

Substance, palm-leaf. Size, $14\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 118. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Brahmasūtrabhāṣyōpanyāsa 60*a*.

Incomplete.

Same work as the above.

---

## No. 4974. ब्रह्मसूत्रभाष्यस्थपूर्वपक्षसङ्ग्रहकारिका.

## BRAHMASŪTRABHĀṢYASTHAPŪRVAPAKṢA-SAṄGRAHAKĀRIKĀ.

Substance, palm-leaf. Size, $15\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 4. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 5*a*. The other works herein are—Bhūgōḷanirṇaya 1*a*, Vāditrayakhaṇḍana 7*a*, Naracakra 15*a*, Saṁvidēkatvānumānanirāsavādārtha 16*a*.

Complete.

A summary in verse giving the various points in the objections held to be raised by opponents in the Śrī-bhāṣya; by Vēṅkaṭārya.

**Beginning:**

चिन्मात्रं ब्रह्म सत्यं तदितरदखिलं दोषतस्तत्र कॢप्तं
मिथ्याभूतं स्वरूपावरणबहुविधाश्चर्यविक्षेपहेतुः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दोषश्चानाद्यविद्याखिलसदसदनिर्वाच्यरूपाथ तस्याः
ब्रह्मात्मैकत्वबुद्ध्या निरसनमिति चाशेषवेदान्तसिद्धम् ॥

**End:**

चिन्मात्रात्मन्यसत्यो यदयकमहमर्थोऽत एवास्य मुक्तिः
स्वापादौ नानुवृत्तिस्स पुनरनुभवात्मैव तत्रावभाति ।
एवम्भूतैव संविद्भ्रमति घटपटाद्यात्मनेत्यस्य मुक्त्यै
ब्रह्मात्मैकत्वविद्याप्रतिपदविषये सर्ववेदान्तसिद्धिः ॥

**Colophon:**

इति पूर्वपक्षः ॥

श्रीभाष्यादिमसूत्रोक्तपूर्वपक्षस्य सङ्ग्रहः ।
सुग्रहत्वाय सङ्गृह्य वेङ्कटार्येण निर्मितः ॥

---

No. **4975.** ब्रह्मसूत्रभाष्यारम्भप्रयोजनसमर्थनम्.

BRAHMASŪTRABHĀṢYĀRAMBHA-
PRAYŌJANASAMARTHANAM.

**Pages**, 6. Lines, 8 on a page.

Begins on fol. 171*a* of the MS. described under **No.** 3978.

Complete.

This deals with the need for the study of the Brahmasūtra-bhāṣya and the benefit to be derived therefrom.

**Beginning:**

भगवद्भाष्यकारो भगवता बादरायणेन प्रणीतानां ब्रह्मसूत्राणामर्थं भाष्यमुखेन व्यवृणुत । तत्र प्रबन्धारम्भाक्षेपशङ्कापरिहारप्रकारस्सर्वेषां पुरुषाणामित्यादिना शारीरकं शास्त्रं व्याचिख्यासितमित्यन्तेन श्रुतप्रकाशिकायाः प्रथमग्रन्थेनाभिप्रेतः । स तावत्प्रदश्य(दर्श्य)ते—अयमत्राक्षेपप्रकारः—प्रबन्धमारभमाणैः प्रबन्धारम्भे हेतुप्रयोजने प्रतिपादनीये ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रयोजनविरहे प्राज्ञानां प्रबन्धकृयत्नसाध्यप्रबन्धप्रणयनानुपपत्तेः । तच्चोभयमत्र न संभवति; तथा हि—

प्रयोजनं हि द्विविधम्—स्वप्रयोजनं परप्रयोजनञ्चेति । पुनस्तत् द्विविधम्—दृष्टमदृष्टञ्चेति । दृष्टं तावत् ख्यातिलाभपूजादिकं भाष्यकारस्य न प्रयोजनीभवितुमर्हति । तस्य वीतरागैर्मुमुक्षुभिरुपेक्षणीयत्वात् ।

**End:**

नापि सप्तमः भाष्यान्तराणामार्षव्याख्यानातिलङ्घित्वस्य तेषु तेषु प्रदेशेषु सुस्पष्टत्वेन असाम्प्रदायिकार्थप्रतिपादकत्वेन अनादरणीयत्वात् । अतस्तत्त्वज्ञानोत्पादनमुखेन परोज्जीवनमेव प्रबन्धप्रणयनप्रयोजनम् । तदुज्जिजीवयिषैव हेतुः । अतो हेतुप्रयोजनसद्भावात् भाष्यारम्भ उपपन्न इति परैरपरिशीलितः पन्थाः ॥

---

## No. 4976. ब्रह्मसूत्रभाष्योपन्यासः.

## BRAHMASŪTRABHĀṢYŌPANYĀSAḤ.

Pages, 68. Lines, 8 on a page.

Begins on fol. 60*a* of the MS. described under No. 4973.

A dissertation on the Śrī-bhāṣya of Rāmānuja; by Mahācārya of Vādhūlagōtra. Wanting in the beginning and breaks off in the 4th Pāda of the 4th Adhyāya.

**Beginning:**

पुरुषार्थत्वाद्ब्रह्मणश्शास्त्रप्रमाणकत्वं सम्भवतीत्युक्तम् । एवं चतुस्सूत्र्या वेदान्तवाक्यानां ब्रह्मप्रामाण्यरूपपरीक्ष्यतापरिकरस्थापनमुक्तम् । अथाप्रमेयविशेषणपरीक्षा क्रियते । तत्रेक्षत्यधिकरेण(रणेन) सदेव सोम्येदमग्र आसीदित्यत्र सच्छब्दवाच्यस्येदंशब्दवाच्यमचेतनं प्रति कारणत्वात् कार्यसाजात्यावश्यम्भावाच्चाचेतनं प्रधानमेव सच्छब्दप्रतिपाद्यं कारण-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मित्याशङ्क्यचेक्षणश्रवणात् चिदाचिच्छरीरकस्य परस्य सर्वसालक्षण्यसम्भवाच्च सच्छब्दवाच्यः परमात्मेति सिद्धान्तः ॥

**Colophon:**

इति वाधूलश्रीमहाचार्यविरचिते श्रीभाष्योपन्यासे तृतीयस्याध्यायस्य चतुर्थः पादः ॥

समाप्तश्चाध्यायः ॥

**End:**

सङ्कल्पादेव तच्छ्रुतेरित्यत्र सत्यसङ्कल्पत्वेन वर्ण्यमानानां राज्ञां कार्यनिष्पत्तादन्ने(ष्पादने)प्रयत्नसापेक्षत्वदर्शनान्मुक्तस्य सत्यसङ्कल्पस्यापि पितृलोकादि सृष्टं(ष्टिः) प्रयत्नसापेक्षेत्याशङ्क्य सङ्कल्पादेव पितरस्समुत्तिष्ठन्तीत्यवधारणात्.

---

## No. 4977. ब्रह्मसूत्राधिकरणसूत्रकारिका.

## BRAHMASŪTRĀDHIKARAṆAKĀRIKĀ

Pages, 8. Lines, 6 on a page.

Begins on fol. 11*a* of the MS. described under No. 4656.

Complete.

This work gives in verse the topical division and arrangement of the aphorisms in the Brahmasūtra as adopted by the followers of Rāmānuja's Viśiṣṭādvaita-Vēdānta.

**Beginning:**

प्रपद्ये प्रणवाकारं भाष्यं रङ्गमिवापरम् ।
परस्य ब्रह्मणो यत्र शेषित्वं स्फुटमीक्ष्यते ॥

शारीरकाधिकरणसूत्रसङ्ख्या प्रकीर्त्यते ।
रामानुजार्यभाष्योक्तरीत्या पादेष्वनुक्रमात् ॥

अथातो ब्रह्मजन्मादिशास्त्रतत्तुसमन्वये ।
चतुष्केऽधिकृतीनां स्यात्सूत्रमेकैकमीरितम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ईक्षत्यधिकृतावष्टौ तथानन्दमयेऽपि च ।
अन्तरादित्यधिकृतौ सूत्रद्वयमुदाहृतम् ॥

**End:**

ब्राह्मेण जैमिनौ त्रीणि सङ्कल्पादौ द्विसूत्रकम् ।
सत्ताभावं बादरौ तु जगद्व्यापारवर्जके ॥
षट्सूत्रमन्तिमे पादे तुरीयाध्याय उच्यते ।
रससङ्ख्याधिकरणो रेफसङ्ख्याकसूत्रकः ॥

अध्यायचतुष्टयस्य सूत्राणि षट्चत्वारिंशदुत्तरशतानि, अधिकरणानि षट्पञ्चाशदुत्तरशतम्, पादाः षोडश . . . . . . . . . . चतुर्थस्य तृतीयपादस्य सूत्राणि १५, अधिकरणानि ५, चतुर्थपादस्य सूत्राणि २२, अधिकरणानि ६, चतुर्थाध्यायसूत्राणि ७६, अधिकरणानि ३३ ॥

---

## No. 4978. ब्रह्माज्ञाननिरासः.

## BRAHMĀJÑĀNANIRĀSAḤ.

Pages, 14. Lines, 7 on a page.

Begins on fol. 39*a* of the MS. described under No. 4939.

Complete.

A criticism of the view of the Advaita school that the universe comes into existence by the association of Avidyā or nescience with the Brahman.

By Śrīnivāsasudhī.

**Beginning:**

श्रीमत्कृष्णमहीमहेन्द्रसदसि श्रीदेशिकानुग्रहात्
भट्टत्र्यम्बकपण्डितेन महता वादे समुज्जृम्भिते ।
ब्रह्माज्ञानमतव्युदासनिपुणाः स्वप्रोक्ततर्कच्छटाः
सङ्गृह्णाति मुदे समस्तविदुषां श्रीश्रीनिवासः सुधीः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



बहिरन्तस्तमस्स्तोमविध्वंसिनखरांशुभिः ।
द्योतमानौ श्रीमदार्यचरणौ शरणं भजे ॥

आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव देवता ।
पूर्वसिद्धतमसोऽपि पश्चिमो नाश्रयो भवति नापि गोचरः ॥

इति शुद्धचिद्रूपं ब्रह्मैव प्रपञ्चमूलभूतस्याज्ञानस्याश्रयो विषयश्चेति मृषावादिवेदान्तिनः सङ्गिरन्ते । तत्र—

ज्ञानरूपं परं ब्रह्म तन्निवर्त्यं मृषात्मकम् ।
अज्ञानं चेत्तिरस्कुर्यात् कः क्षमस्तन्निवर्तने ॥

इत्यादिभगवन्नाथमुनिप्रोक्तकारिकोदाहरणमुखेन भगवद्भाष्यकारैरुपपादिता एव दोषा ग्रन्थान्तरेष्वपि प्रपञ्चिताः ।

**End:**

तस्मात् ब्रह्मण एवाज्ञानाश्रयत्वाभ्युपगमेऽज्ञं ब्रह्मेति वाक्यप्रामाण्यं दुर्वारमिति ।

एवमेकादशे तत्र पर्यायेऽस्माभिरीरिते ।
कथाया विश्रमस्तावत् कृतः प्रभुनिदेशतः ॥

इत्थं श्रीमच्छतदूषण्यां सत्त्वाश्रयः किं ब्रह्मस्वरूपम्? उत तदेवोपहितम्? अथवा स्वतन्त्रोऽन्यः? न प्रथमः—

नित्यशुद्धिविरोधात् इति भगवन्निगमान्तदेशिकानुगृहीतदोषेणैव ब्रह्माश्रिताज्ञानवादो निरस्तो न त्वस्माकं तत्र निर्भरः ॥

**Colophon:**

श्रीश्रीनिवाससुधिया त्र्यम्बकनैयायिकस्य सति वादे ।
ब्रह्माज्ञाननिरासः कृत इह सन्तः प्रसीदन्तु ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4979. भर्गशब्दार्थविचारः.

## BHARGAŚABDĀRTHAVICĀRAḤ.

Substance, palm-leaf. Size, $15\frac{1}{2} \times 1\frac{5}{8}$ inches. Pages, 11. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 25*a*. The other works herein are Kūrēśavijaya-vyākhyā 1*a*, Kūrēśavijaya 30*a*.

Incomplete.

An investigation into the meaning of the word Bharga occurring in the Gāyatrī-mantra.

**Beginning:**

श्रीमन्नारायणस्यैव गायत्रीप्रतिपाद्यताम् ।
तं नत्वा स्थापयिष्यामि भर्गशब्दस्य वाच्यताम् ॥

तथाहि—

तत्स . . . दयादित्यत्र नः धियः देवः श्रीमान्नारायणः प्रचोदयात् प्रेरयेत् च्यु(चुद) प्रेरण इति धातोः प्रेरणमर्थः । तस्य देवस्य सवितुः वरेण्यं तत् भर्गः तेजः धीमहि ध्यायामः ध्यै चिन्तायाम् । ब्रह्मणो वा एतत्तेज उपास्महे इति यावत् । तस्य देवस्येत्यत्र यत्तदोर्नित्यसंबन्धात् ।

**End:**

अत्र व्यासः—

प्रसूते सकलांश्चेष्टान् प्रसूते सकलं जगत् ।
तरतेर्गतिसान्तत्वाद्मतेर्दानकर्मणः(?) ॥
गीतो ह्यवति सर्वत्र षड्भिः क्रान्तो गुणैस्सह ।
भोगापवर्गदाता च सवितेति निरुच्यते ॥

इत्थञ्च सवितृशब्दवाच्यः श्रीमन्नारायणः स एव “सविता प्रपितामहः सविता रविलोचनः” इति भारते सहस्रनामपाठात् तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहीत्यत्र यो देवः श्रीमन्नारायण इत्यध्याहर आवश्यकः । गायत्रीप्रतिपाद्यत्वं तस्य विष्णोरदुष्टमिति सिद्धान्तार्थः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4980. भेददर्पणः.

## BHEDADARPAṆAḤ.

Substance, paper. Size, $11\frac{1}{8} \times 8\frac{7}{8}$ inches. Pages, 132. Lines, 19 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. An other copy of this work is found commencing on fol. 67*a*.

Complete.

A treatise maintaining the distinction between the individual soul and the Supreme Brahman to be essential.

By Śrīśaila Śrīnivāsācārya.

**Beginning :**

चिदचिद्विसजातीयमद्वितीयं गुणार्णवम् ।
अशेषशेषिणं शेषशायिनं तमुपास्महे ॥
भेदाभेदश्रुतिव्रातजातसन्देहसन्तताः ।
भेददर्पणमादाय निश्चिन्वन्तु विपश्चितः ॥

शब्दैकसमधिगम्ये वस्तुनि यच्छब्द आह, तदेव तत्त्वमिति प्रामाणिकानां पन्थाः । अलौकिके ब्रह्मणि शास्त्रमेव प्रमाणयन् सूत्रकारोऽपि शास्त्रयोनित्वादित्याह । शास्त्रं च नाम अनादिनिधनाविच्छिन्नपाठसम्प्रदायनाघ्रातप्रमादादिदोषगन्धवेदाख्याक्षरराशिः । तद्योनित्वं च ब्रह्मणः ज्ञप्तिद्वारकमिति शास्त्रप्रमाणकत्वं तदर्थः पर्यवस्यति । अवधारणगर्भं चैतदब्भक्षादिवत् ।

**End :**

भेदस्तु प्रत्यक्षादिबहुप्रमाणसिद्धश्रुतिस्मृतिशतावगतस्सूत्रपादैरापादचूडमवगतो मुक्तिहेतुज्ञानविषयतया परमार्थ एवेति सर्वमवदातम् ॥

विशिष्टाभेदस्था श्रुतिरगाणि तत्त्वम्पदयुता
विमुक्त्यर्थाभेदप्रमितिरुपगीता श्रुतिशतैः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वरूपाभेदोक्तिं तदिदमुपरुन्धेऽखिलतनुः
परस्वात्मा मुक्त्यै सुमतिभिरुपास्यश्शुभगुणः ॥
भेदं निरूप्य कतिचित्कतिचित्त्वभेदं
तत्सिद्धयेऽखिलशरीरशरीरिभावम् ।
तादात्म्यमस्य च फलं कतिचिद्वदन्ती-
त्येवं त्रयी भवति सार्थपदा समर्था ॥

**Colophon :**

इति श्रीशैलश्रीनिवासाचार्यविरचितं भेददर्पणं नाम प्रकरणं समाप्तम् ॥

श्रीमत्रय्यन्तसीमायुगळविभजनाखण्डपाण्डित्यभूमा
षट्तन्त्रोदन्तदन्तावळदळनसृणीबोभुवत्सूक्तिदामा ।
श्रीशैलाख्यान्वयेन्दुस्सुगुणगणनिधिस्सर्वतन्त्रस्वतन्त्रः
कारुण्यात्सन्निधत्तां मम हृदि सततं श्रीनिवासार्यवर्यः ॥
जयति श्रीनिवासार्य(ः) श्रीशैलकुलदीपकः ।
कुहनासिद्धसिद्धान्तदुस्तरप्रस्तराशनिः ॥

---

No. **4981.** भेददर्पणः.

BHĒDADARPAṆAḤ.

Pages, 32. Lines, 18 on a page.

Begins on fol. 67*a* of the MS. described under No. 4980

Incomplete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4982. महाभारततात्पर्यरक्षा.

## MAHĀBHĀRATATĀTPARYARAKṢĀ.

Substance, palm-leaf. Size, 17⅜ × 1½ inches. Pages, 153. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Bālarāmāyaṇa 78*a*.

Seems to be complete: consists of three chapters.

An interpretation of the Mahābhārata so as to bring out the superiority of Viṣṇu as the Supreme Being of the Vēdānta; by a Vēdāntācārya, disciple of Ādivarāhārya.

**Beginning:**

आम्नायशिखरश्लाघ्यषाड्गुण्यपरिपूरितः ।
देवकीपुण्यसङ्घातः पातु नः पार्थसारथिः ॥

संरक्षणाय जगतामितिहासरत्नं यो दर्शयन्निरमिमीत परं मुकुन्दम् ।
द्वैपायनस्स भगवानमलां मनीषां तन्वीत नो मधुरिपोरपरावतारः ॥

प्रपद्ये पञ्चमाम्नायदुग्धाम्बुधिमिवापरम् ।
यत्र भाति त्रयीमौलिभूषणं रत्नमद्भुतम् ॥

उपाकृत(त)मोऽस्माकं शठकोपदिवाकरः ।
निर्धूतास्तगति(:) श्रीमान्नित्यविष्णुपदाश्रयः ॥

श्रीमल्लक्ष्मणमिश्रेभ्यो नमोवाकमधीमहि(हे) ।
यत्सूक्तिनावमाश्रित्य तरन्ति भवसागरम् ॥

यन्नामश्रवणात्सद्यः कवितार्किकवारणाः ।
भग्नगर्वाः प्रधावन्ति तं देशिकमुपास्महे ॥

यमाहुर्निगमान्तार्यमवतीर्णं मुहुर्भुवि ।
तं मङ्गळगुणोपेतं परवस्तुगुरुं भजे ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमदादिवराहार्यान् परवस्तुगुरोस्सुतान् ।
वन्दे येषां पदाम्भोजं शरणं मम निस्समम् ॥

लीलादूतप्रसादाय विदुषां हृदयङ्गमा ।
महा(भा)रततात्पर्यरक्षास्माभिर्विधीयते ॥

ननु पिष्टपेषणवदयमारम्भो निष्फलः भगवतो महाभारततात्पर्यविषयत्वस्याचार्यवाक्यशतासिद्धत्वात्; तथा हि महाभारतोपक्रमे—

निर्विघ्नप्रारिप्सितपरिसमाप्त्यादिसिद्ध्यै

आद्यं पुरुषमीशानं पुरुहूतं पुरुष्टुतम् ।
ऋतमेकाक्षरं ब्रह्म व्यक्ताव्यक्तं सनातनम् ॥

असच्च सच्चैव यद्विश्वं सदसतं(तः)परम् ।
परावराणां स्रष्टारं पुराणं परमव्ययम् ॥

मङ्गळ्यं मङ्गळं विष्णुं वरेण्यमनघं शुचिम् ।
नमस्कृत्य हृषीकेशं चराचरगुरुं हर(रि)म् ॥

(मह)र्षेस्सर्वलोकेषु पूजितस्य महात्मनः ।
प्रवक्ष्यामि मतं कृत्स्नं व्यासस्यामिततेजसः ॥

इति इष्टदेवतानमस्काररूपमङ्गळं कृत्वाचार्येणैवोपक्रान्तग्रन्थस्य विषये . . . भगवानिति दर्शितम् ।

**End:**

नारायणो महातेजा इत्यादिना भोक्ता महेश्वरो देव इत्यत्र महेश्वरशब्दो भगवत्परः । एवमुपरितनो महादेवशब्दोऽपि भगवत्परः । तथा च न विरोधः । एवं च न रुद्रस्य भगवता भेदः प्रामाणिक इति कृतं प्रसक्तानुप्रसक्त्या । गीतोपनिषत्तु भगवत्पारम्यपरेत्येतदनवद्यमतशिवपारम्याभ्युपगमे तद्विरोधो दुष्परिहरः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा च पञ्चमाम्नायस्सकलो भगवत्परः ।
स एवातः परोऽस्माकमिति सर्वं समञ्जसम् ॥

---

No. **4983.** मोक्षकारणतावादः.

MŌKṢAKĀRAṆATĀVĀDAḤ.

Pages, 35. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 3121.

Complete.

By Anantācārya.

A discussion relating to what constitutes the chief means leading to the final salvation of the soul.

**Beginning :**

मुक्तिप्रदं मुररिपुं मुनिबृन्दवन्द्यं मोहच्छिदं यतिपतिं च मुदाभिवन्द्य[म्] ।
श्रीमाननन्तगुरुरुज्ज्वलयुक्तियुक्तं मोक्षैकहेतुविषयं तनुते विचारम् ॥

इह तावन्मोक्षस्य मुख्यसाधनं विचार्यते । मोक्षो नाम—

स्वसामानाधिकरण्यस्वसमानकालीनत्वोभयसम्बन्धेन कर्मप्रागभावविशिष्टान्यो यः कर्मध्वंसः स्वसामानाधिकरण्यस्वोत्तरत्वोभयसम्बन्धेन तद्विशिष्टानन्दः । केवलानन्दस्य उक्तसम्बन्धेन कर्मध्वंसविशिष्टानन्दस्य च बद्धदशायामपि सत्त्वात्तदानीं मोक्षव्यवहारवारणाय कर्मप्रागभावविशिष्टान्यत्वं ध्वंसविशेषणम् । उक्तं च—अत्ता चराचरग्रहणात् इत्यधिकरणभाष्ये ।

**End :**

अनवरतभावनावशात् ध्यानव्यक्तिषु लौकिकविषयता सम्भवतीति पूर्वमेवोक्तम् । तथा च विशिष्टविषयकध्यानत्वेन हेतुत्वे न काप्यनुपपत्तिरित्यन्यत्र विस्तरः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon** :

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥
इति मोक्षकारणतावादः ॥

---

## No. 4984. मोक्षकारणतावादः.

## MŌKṢAKĀRAṆATĀVĀDAḤ.

Pages, 20. Lines, 18 on a page.

Begins on fol. 1*a* of the MS. described under No. 4885.

Complete.

Same work as the above.

---

## No. 4985. यतीन्द्रमतदीपिका.

## YATĪNDRAMATADĪPIKĀ.

Substance, palm-leaf. Size, $15\frac{3}{8} \times 1\frac{3}{8}$ inches. Pages, 62. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 172*a*. The other works herein are Tattvadīpa 1*a*, Stōtrabhāṣya 94*a*, Vēdāntavicāra 203*a*.

Complete.

A brief work in 10 chapters embodying the main principles of Viśiṣṭādvaita-Vēdānta as taught by Rāmānuja; by Srīnivāsadāsa, son of Gōvindārya and disciple of Mahācārya.

**Beginning :**

श्रीवेङ्कटेशं करिशैलनाथं श्रीदेवराजं घटिकाद्रिसिंहम् ।
कृष्णेन साकं यतिराजमीडे स्वप्ने च दृष्टान् मम देशिकेन्द्रान् ॥
यतीश्वरमहं वन्दे वेदान्तार्यं महागुरुम् ।
करोमि बालबोधार्थं यतीन्द्रमतदीपिकाम् ॥
श्रीमन्नारायण एव चिदचिद्विशिष्टाद्वैतं तत्त्वम् । भक्तिप्रपत्तिभ्यां

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रसन्नस्स एवोपायः । अप्राकृतदेश(ह)विशिष्टस्स एव प्राप्य इति वेदान्तवाक्यैः प्रतिपादयतां व्यासबोधायनगुहदेवभारुचिब्रह्मानन्दिद्रविडाचार्यश्रीपराङ्कुशनाथयामुनयतीश्वरप्रभृतीनां मतानुसारेण बालबोधनार्थं वेदान्तानुसारिणी यतीन्द्रमतदीपिकाख्या शारीरकपरिभाषा महाचार्यकृपावलम्बिना मया यथामति सङ्ग्रहेण प्रकाश्यते —

सर्वं पदार्थजातं प्रमाणप्रमेयभेदेन द्विधा भिन्नम् । प्रमाणानि त्रीण्येव । प्रमेयं द्विविधम्—द्रव्याद्रव्यभेदात् । द्रव्यं द्विविधम्—जडमजडं चेति । जडं द्विविधम्—प्रकृतिः कालश्चेति । प्रकृतिश्चतुर्विंशात्मिका । कालस्तूपाधिभेदात्त्रिविधः । अजडं च द्विविधम्—पराक् प्रत्यगिति । अजडं परागपि तथा ।

**End:**

अतश्चिदचिद्विशिष्टो ब्रह्मशब्दवाच्यो विष्ण्वाख्यः परवासुदेवो नारायण एवैकं तत्त्वमिति विशिष्टाद्वैतवादिनां दर्शनमिति सिद्धम् ॥

इति विविधविचित्रं मानमेयप्रकाशं
घनगुरुवरदानेनोक्तमादाय शास्त्रात् ।
यतिपतिमतदीपं वेदवेदान्तसारं
न भवति मतिमान्यस्सत्कटाक्षैकलक्ष्यः ॥

**Colophon:**

इति श्रीवाधूलकुलतिलकश्रीमन्महाचार्यस्य प्रथमदासेन श्रीनिवासदासेन श्रीमद्वेङ्कटगिरिनाथपदकमलसेवापरायणस्वामिपुष्करिणीगोविन्दार्यसूनुना विरचितायां यतीन्द्रमतदीपिकायामद्रव्यपरिच्छेदो नाम दशमोऽवतारः ॥

स्वप्ने श्रीवेङ्कटेशस्य सन्निधौ कृपया स्वयम् ।
सश्रीगन्धाभयं हस्तं प्रादान्मम महागुरुः ॥

333

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4986. यतीन्द्रमतदीपिका.

## YATĪNDRAMATADĪPIKĀ.

Substance, palm-leaf. Size, $13\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 122. Lines, 4 on a page. Character, Kanarese. Condition, good. Appearance, new.

Complete.

Same work as the above.

---

## No. 4987. रामानुजसिद्धान्तविजयः.

## RĀMĀNUJASIDDHĀNTAVIJAYAḤ.

Substance, paper. Size, $12 \times 9\frac{3}{4}$ inches. Pages, 349. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Incomplete.

Pādas 3 and 4 of the first Adhyāya.

An interpretation of the Brahmasūtras so as to establish the superiority of the Rāmānuja-siddhānta over other systems of the Vēdānta.

**Beginning:**

यस्मिन् द्यौरित्यादिनोक्तं द्युभ्वाद्यायतनं किं रुद्रादिः उत परमात्मा वेति संशयः । पूर्वपक्षस्तु द्युभ्वाद्यायतनं रुद्रः प्रधानं वायुः जीवो वावलोकाधारः, प्राणानां ग्रन्थिरसि रुद्रः, भूतं च भव्यं च भविष्यच्चेत्याचक्षते, आकाश एव तदोतं च प्रोतं च, वायुना वै गतौतमसूत्रेण(?) अयं च लोकः परश्च लोकः, सर्वाणि च भूतानि सन्द्रब्धादित्यादिसमाख्यानात् जायमानत्वरूपजीवलिङ्गाच्च ॥

**Colophon:**

इति श्रीकाञ्चीवरवरमुनिविलिखितश्रीभगवद्रामानुजसिद्धान्तविजये प्रथमस्याध्यायस्य तृतीयः पादः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End :**

अन्तर्यामिब्राह्मणेषु निखिलचेतनाचेतनानां भगवच्छरीरत्वप्रतिपादनेन देवो जातो मनुष्यो जात इत्यादौ शरीरवाचकशब्दानां शरीरिपर्यन्तत्वस्य च दर्शनेन शरीरभूतचेतनाचेतनवाचिशब्दानां शरीर(रि)भूतपरमात्मपर्यन्तत्वस्य युक्तत्वात् । अत एव प्रतर्दनविद्यादौ इन्द्रप्राणादिशब्दानां तच्छरीरपरमात्मपर्यन्तत्वमङ्गीकृत्य शरीरभूतेन्द्रादिद्वारा तद्धर्मत्वाप्रवधादिरूपलि.

---

No. **4988.** रामानुजसिद्धान्तसङ्ग्रहः.

RĀMĀNUJASIDDHĀNTASAṄGARAHAḤ.

Pages, 41. Lines, 9 on a page.

Begins on fol. 102*a* of the MS. described under No. 4905.

Complete.

A brief statement of the accepted conclusions of the Viśiṣṭādvaita-Vēdānta as explained by Rāmānuja.

**Beginning :**

वाधूलवरदाचार्यवात्स्यश्रीनिधिदेशिकौ ।
संश्रये श्रीवराहं नश्श्रितकल्पकशाखिनम् ॥
रामानुजार्यसिद्धान्तसङ्ग्रहोऽयं प्रकाश्यते ।
तत्त्वबोधाय बालानां गुरूक्तैर्लक्ष्यलक्षणैः ॥

ब्रह्मविदाप्नोति परं, ब्रह्म वेद ब्रह्मैव भवतीत्यादिभिर्ब्रह्मज्ञानान्मोक्ष इति सिद्धम् । तादृशब्रह्मज्ञानं च प्रमाणाधीनमिति आदौ प्रमाणं निरूप्यते—प्रमितिः प्रमाकरणं च प्रमाणम् । तत्र यथावस्थितवस्तुव्यवहारमात्रानुगुणं ज्ञानं प्रमितिः ।

**End :**

ननु कथं प्रमेयत्रैविध्यनिरूपणम्? सामान्यविशेषसमवायानां विद्यमानत्वादिति चेन्न ; संस्थानातिरिक्तजातेर्निराकृतत्वात्, नित्यद्रव्याणामपि स्वसाधारणधर्मेणैव परस्परव्यावृत्त्युपपत्तौ तद्गतविशेषाख्यपदार्थान्तराङ्गीकारे



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रमाणाभावात्, समयस्य निराकृतत्वाच्च त्रिविधमेव प्रमेयमिति निरव-द्यम् ॥

**Colophon :**

इति रामानुजसिद्धान्तसङ्ग्रहे प्रमेयपरिच्छेदः ॥

रामानुजार्यसिद्धान्तसङ्ग्रहोऽयं कृतो मया ।
शोधकाः क्षन्तुमर्हन्ति स्खलितं वीतमत्सराः ॥

---

No. 4989. रामानुजसिद्धान्तसङ्ग्रहः.

RĀMĀNUJASIDDHĀNTASAṄGRAHAḤ.

Substance, palm-leaf. Size, $13\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 154. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Incomplete.

By Caṇḍamārutam Śrīnivāsarāghava of Alaśūr.

Similar to the above.

**Beginning :**

वरदं द्विरदाद्रीशं . . प्रणतार्तिहरं हरिम् ॥

श्रीमानेव शरण्य इत्यनुपदं जोघुष्यतेऽनुश्रव-
स्मृत्याचार्यपरम्परोक्तिभिरथाप्येतद्द्रढिम्ने स्वयम् ।
अङ्के पङ्कजवासिनीं स्वसदृशीं बिभ्रज्जगद्रक्षणा-
लङ्कर्मीणविहारभेदरसिको जीयान्नृकण्ठीरवः ॥

* * * *

यद्वाग्झरीभिर्वादेऽदाच्छ्रीनिवासमहामुनिः ।
चण्डमारुतसंज्ञां हि यस्मै तं पितरं श्रये ॥

श्रीवासराघवेणाद्य क्रियते विदुषां मुदे ।
रामानुजार्यसिद्धान्तसङ्ग्रहस्साधुसम्मतः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्यायसिद्धाञ्जने सर्वमाचार्येण निरूपितम् ।
तत्रापि मन्यमानानां दुर्ग्रहत्वमियं कृतिः ॥
द्रव्याद्रव्यप्रभेदेन तत्त्वयाथात्म्यरूपणम् ।
परपक्षप्रतिक्षेपपूर्वकं क्रियतेऽधुना ॥

नन्वपवर्गसिद्धौ यदपेक्षितं तदेव विशदं तदर्थिभिर्ज्ञातव्यम् ।

See under the next number for the end.

---

No. **4990.** रामानुजसिद्धान्तसङ्ग्रहः.

RĀMĀNUJASIDDHĀNTASAṄGRAHAḤ.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{3}{4}$ inches. Pages, 244. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Incomplete.

Same work as the above.

See under the previous number for the beginning.

**End:**

आक्षेपस्यैवानुत्थितौ परिहारानुत्थानात् । अतो योऽस्ति, स सिद्धान्ता(द)तिरिच्यत इति पूर्वोक्तरीत्यैवार्थस्स्वीकरणीय इति सर्वं रमणीयम् ॥

**Colophon:**

इति श्रीवत्सकुलतिलकश्रीकृष्णसूरिचरणार(वि)न्दसेवासम्पादिताशेषविद्याविलासेन तत्पौत्रेण चण्डमारुतापरनामधेयश्रीवेङ्कटार्यतनूजेन श्रीनिवासराघवदासेन विरचिते श्रीरामानुजसिद्धान्तसङ्ग्रहे अद्रव्यपरिच्छेदस्संपूर्णः ॥

श्रीरामानुजसिद्धान्तसङ्ग्रहस्साधुसंमतः ।
वात्स्यश्रीशैलदासेन समग्रं समलिख्यत ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4991. वादाद्रिकुलिशम्.

## VĀDĀDRIKULIŚAM.

Substance, palm-leaf. Size, $16\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 24. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol. 23*a*. The other work herein is Siddhānta-saṅgraha 1*a*.

Complete.

An unfavourable criticism of Advaita-Vēdānta: by Śrinivasadāsa, a disciple of Vēṅkaṭācārya.

**Beginning:**

कपर्दिमदकर्दमं कपिलकल्पनावागुरां
दुरत्ययमतीत्य यद्द्रुहिणतन्त्रयन्त्रोदरम् ।
कुदृष्टिकुहनामुखे निपततः परब्रह्मणः
करग्रहविचक्षणो जयति लक्ष्मणोऽयं मुनिः ॥
श्रीश्रीनिवासदासेन नत्वा वेङ्कटदेशिकम् ।
केवलाद्वैतशिखरिह्रादिनीयं विरच्यते ॥
ऋते ज्ञानान्न मुक्तिः स्यादित्येवं श्रूयते किल ।
तन्मोक्षसाधनं ज्ञानं कीदृशं तद्विचार्यते ॥
परमा(जीवा)त्मनोर्भेदज्ञानं मोक्षस्य साधनम् ।
ज्ञात्वा तं मृत्युमत्येति नान्यः पन्था विमुक्तये ॥
ब्रह्मविदाप्नोति परं स स्वराड्भवतीति च ।
तमेवं विद्वानमृतः पृथगात्मानमित्यतः ॥
तेनामृतत्वमेतीति चान्तेन ब्रह्मवित्तदा ।
इत्याद्याः श्रुतयो मानं भेदे जीवपरेशयोः ॥

**End:**

आविर्भावगुणस्त्वत्र ब्रह्मानुभवति स्वयम् ।
उत्तरावधिराहित्यज्ञानानन्दोदधिस्स्वराट् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्येवं केवलाद्वैतवादाद्रिकुलिशं कृतम् ।
श्रीश्रीनिवासदासेन लक्ष्मणार्याङ्घ्रिसेविना ॥

**Colophon:**

इति श्रीम(न्ना)रायणचरणनलिनद्विरेफाणां प्रतिवादीभकेसरिणां श्रीमद्वेङ्कटाचार्याणां चरणारविन्दमधुपेन श्रीनिवासदासेन कृतं वादाद्रिकुलिशं समाप्तम् ॥

---

## No. 4992. वादित्रयखण्डनम्.

## VĀDITRAYAKHAṆḌANAM.

Pages, 16. Lines, 7 on a page.

Begins on fol. 7*a* of the MS. described under No. 4974.

Complete.

A work criticising unfavourably the Vēdāntic views of Śaṅkara, Bhāskara and Yādavaprakāśa: by Vēdāntadēśika.

**Beginning:**

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥
प्रदिशतु परिहृतदोषं प्रज्ञानन्दादिगुणगणोपेतम् ।
कमलाभूषितवक्षः कल्याणं वश्चिरन्तनं धाम ॥

परावरतत्त्वयाथात्म्यवेदनपूर्वकस्वाधिकारानुष्ठानपरिकरपरिकर्मिततैलधारावदविच्छिन्नस्मृतिसन्तानरूपो विभूतिद्वयविशेषणावच्छिन्नमनवच्छिन्नानन्दरूपं परमात्मानं प्रापयतीति पराशरपाराशर्यशुकशौनकप्रभृतयो निर्धारयन्ति । अत्र केचित् अन्तिमयुगतत्त्वचिन्तकाश्शङ्करादयस्सर्वमप्यर्थजातमन्यथयन्ति—"निर्विशेषचिन्मात्रं ब्रह्मैव तत्त्वम् । तद्व्यतिरिक्तं सर्वं मिथ्याभूतम्" इति । भास्करमतानुसारिणस्तु स्वस्मात्स्वभावतो विभक्ता विभक्तेनाचिद्रूपेणोपाधिना विभक्तरूपं ब्रह्मैव जीवभावमनुभवतीति देहोपाधिविलये जीवविलयात् स्वाभाविकेन ब्रह्मात्मनावतिष्ठते ।

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यादवप्रकाशीयास्तु चिदचिदीश्वरात्मनावस्थितस्य तत्त्वत्रयस्य चिन्मात्रब्रह्मपरिणामरूपत्वात्सर्वात्मना सर्वमभिन्नं चिदचिदीश्वरात्मना भिद्यते ।

**End:**

ततश्च निखिलजगदेककारणं निरस्तसमस्तविरोधगन्धमनालोचितविशेषाशेषलोकशरण्यमपगळितनिखिलसांसारिकसकलदुःखैर(कसम)धिगम्यचरणारविन्दं निरतिशयानन्दमरविन्दलोचनं परं ब्रह्म वेदान्ताः प्रतिपादयन्तीति वैदिकनाथशिखामणीनां वकुळाभरणनाथमुनियामुनरामानुजाचार्याणामार्यजनसम्मतानां तन्मतानुसारिणां निखिलपाषण्डवैतण्डिकवेतण्डषण्डखण्डनप्रचण्डविक्रमाणां पुरुषसिंहानां सिद्धान्त इति सकलोपनिषद्बृंहितमिदमनुसरन्तो विहरन्तस्सर्वत्र विजयध्वम् ॥

इत्थं त्रय्यन्तसिद्धान्तदुग्धसिन्धुसुधामिमाम् ।
मतिमन्थानमाविध्य ममन्थुर्महितौजसः ॥

**Colophon:**

इति कवितार्किकसिंहस्य कृतिषु वादित्रयखण्डनं समाप्तम् ॥

---

## No. 4993. वादित्रयखण्डनम्.

## VĀDITRAYAKHAṆḌANAM.

Substance, palm-leaf. Size, $16\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 140. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 78*a*. The other works herein are Viṣṇupāramyastōtra 1*a*, Āḷavandārstōtra 2*a*, Stōtrabhāṣya 8*a*.

Complete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4994. विजयीन्द्रपराजयः.

## VIJAYĪNDRAPARĀJAYAḤ.

Substance, paper. Size, 13¼ × 8¼ inches. Pages, 203. Lines, 25 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 171*a*. The other works herein are Siddhānta-ratnāvalī 1*a*, Śrutyarthanirṇaya 73*a*.

An unfavourable criticism of the Dvaita view of the Vēdānta as expounded by Vijayīndra: by Kumbhakōṇa Tātācārya.

The subjects dealt with herein are given below :—

१. द्रव्याद्रव्यभेदवादभङ्गः.
२. गुणगुण्यभेदवादभङ्गः.
३. भेदाभेदवादभङ्गः.
४. मुक्त्यानन्दतारतम्यस्य श्रुत्यादिप्रमाणसमधिगतत्ववादभङ्गः.
५. मुक्त्यानन्दतारतम्यानुमानभङ्गः.
६. जीवस्वरूपतारतम्यकृतानन्दतारतम्यवादभङ्गः.
७. मुक्तानन्दतारतम्यवादभङ्गः.
८. जीवस्वरूपतारतम्यकृतमुक्तानन्दतारतम्यवादभङ्गः.
९. विशेषे प्रत्यक्षप्रमाणभङ्गः.
१०. विशेषसाधनभङ्गः.
११. विशेषश्रौतार्थापत्त्यादिप्रमाणकत्ववादभङ्गः.
१२. विशेषसाधकानुमानवादभङ्गः.
१३. वर्णात्मकशब्दद्रव्यत्ववादभङ्गः.
१४. अव्याकृताकाशरूपषड्द्रव्यातिरिक्तद्रव्यान्तरवादभङ्गः.
१५. अन्धकारस्य द्रव्यान्तरत्ववादभङ्गः.
१६. अखण्डकालानभ्युगमवादभङ्गः.
१७. धर्मज्ञानानभ्युपगमवादभङ्गः.
१८. शुद्धसत्त्वरूपद्रव्यानभ्युपगमवादभङ्गः.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१९. सत्त्वादेर्द्रव्यत्ववादभङ्गः.
२०. उपादेयोपादानभेदवादभङ्गः.
२१. जगद्ब्रह्मणोरुपादेयोपादानभावासहनवादभङ्गः.
२२. प्रपत्तेर्मोक्षसाधनत्वासहनवादभङ्गः.

**Beginning :**

इन्दिरामन्दिरोरस्कमिन्द्रनीलनिभं शुभम् ।
भावये कुमतिध्वान्तं सनिवर्तकभावनम् ॥
जयति विविधविद्वद्दर्वभङ्गप्रचण्डः कविकथकमृगेन्द्रः सर्वतन्त्रस्वतन्त्रः ।
शमितविमतभावग्रन्थसन्दर्भवीर्यः फणितिभिरचलाभिर्मद्गुरुर्देशिकेन्द्रः ॥
तत्त्वे हिते पुमर्थे(च)माध्वा(ध्व)ध्वान्तभेदताम् ।
देवः प्रदर्शयत्यस्मद्भित्या(ः)पश्यन्तु साधवः ॥

इह खलु परमपुरुषार्थार्थिजनानुजिघृक्षुर्बादरायणः अखिलहेयप्रत्यनीककल्याणगुणाकरः कार्यकारणोभयावस्थस्थूलसूक्ष्मचिदचिच्छरीरकः जगतः अभिन्ननिमित्तोपादानभूतः परम्ब्रह्म श्रीमन्नारायण एव तत्त्वम् । तस्यैवावि(च्छि)न्नस्मृतिसन्ततिरूपं विशदतमप्रत्यक्षोपपन्नं निरन्तरध्यानमेवोपायः । तदुपासनया निश्शेषनिवृत्ताखिलकर्मबन्धानां भगवता परमसाम्यं प्राप्तानां जीवात्मनामविशेषेण परिपूर्णनिरतिशयब्रह्मानन्दानुभव एव पुरुषार्थ इति अथातो ब्रह्मजिज्ञासा, जन्माद्यस्य यतः, प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्, पुरुषार्थोऽतश्शब्दादिति बादरायणः, आवृत्तिरसकृदुपदेशात्, तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ, तद्व्यपदेशात्, इतरस्याप्येवमसंश्लेषः, पाते तु जगद्व्यापारवर्जम्, भोगमात्रसाम्यालि(म्यलि)ङ्गाच्च इत्यादिसूत्रैस्तत्त्वहितपुरुषार्थान् सम्यक् प्रति(त्य)पादयत् ।

**Colophon :**

इति कवितार्किककण्ठीरवगुरुवरपदकमलविनिस्सृतमधुकरमानसस्य श्रीशैलपूर्णमू(कु)लजलधिकौस्तुभस्य श्रीमदनन्तगुरुचरणपरिचरणलब्धपरावर-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



याथात्म्यविवेकस्य शैवमायावादिगर्वसर्वस्वहरणधुरीणप्रग्रन्थिनिबर्हणवि-ख्यातप्रज्ञाविलासस्य कुम्भघोणताताचार्यस्य कृतिषु विजयीन्द्रपराजये द्रव्याद्रव्यभेदवादभङ्गः प्रथमः ॥

**End :**

यदि मद्गुरुवरव्याख्यायामतिविश्वसने(सिषि)तर्हि तदा गेद्य अधिकारि-विशेषे स्यास्साक्षान्मोक्षसाधनत्वाभिधानेन लब्धोपदेशस्त्वम् । अद्य तदीय-शिष्यभावमुपेत्य कदाचिदुज्जीवयसि न चेन्मृतिमेव बहुतरनरकप्रवेशो-चितप्राप्यपुनःपुनर्यावदात्मभाविसंसरणभाक् भवसीत्यलमवैदिकासन्मतपुर-स्करणतस्तन्निरसनेन ॥

निरस्तान्यमतध्वान्तप्रौढालोकसुधाकरे ।
विशिष्टाद्वैतसिद्धान्ते मन्मनस्त्वं सुनिर्विश ॥

अत्यन्तहेयमाध्वानां सिद्धान्ते मानबाधिते ।
निर(ा)साय विचारेण विरमस्वा(त्व)थ मन्मनः ॥

यतिना परकालेन विजयीन्द्रः पराजितः ।
रामानुजमतेऽप्येवमसारत्वोक्तिगर्वितः ॥

त्वय्यन्तदेशिककृपाभरितावलोक-
लब्धोभयागमशिरोनिहितार्थतत्त्वम् ।
प्रत्यर्थिवादिमददन्तिघटामृगेन्द्रं
पश्य त्वमत्र परकालममास्म(मुनिं म)दीया(यम्) ॥

जय(ति)विविध(विद्वद्गर्वभङ्ग) प्रचण्डः
कविकथकमृगेन्द्रस्सर्वतन्त्रस्वतन्त्रः ।
शमितविमतभाविग्रन्थसन्दर्भवीर्यैः
फणितिभिरचलाभिर्मद्गुरुर्देशिकेन्द्रः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 4995. विजयीन्द्रपराजयः.

## VIJAYĪNDRAPARĀJAYAḤ.

Substance, paper. Size, $13\frac{1}{4} \times 8\frac{3}{8}$ inches. Pages, 316. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, not new.

Begins on fol. 1*a*. The other work herein is Bhaṭṭōji-Nāganāthōktidhikkāra 161*a*.

Contains only Bhaṅgas 1 to 20.

Incomplete.

Same work as the above.

---

## No. 4996. विरोधनिरोधः—भाष्यपादुका.

## VIRŌDHANIRŌDHAḤ : BHĀṢYAPĀDUKĀ.

Substance, paper. Size, $13 \times 8\frac{3}{8}$ inches. Pages, 365. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Virōdhavarūthinīpramāthini 185*a*.

Complete in 27 Nirōdhas.

An exhaustive treatise in support of the Śrī-bhāṣya of Rāmānuja, criticising and explaining away the various faults pointed out therein by the Advaitins : by Śrīnivāsa of Śrīśaila family, son of Śrīnivāsatātācārya and Lakṣmyambā, and pupil of his own elder brother Aṇṇayācārya.

**Beginning :**

प्रत्यस्तहेयं प्रणतैरुपेयं श्रुत्यन्तगेयं सुरभागधेयम् ।
श्रेयोऽभ्युपेयं चिदचित्स्वकायं ब्रह्माद्वितीयं प्रणतोऽस्मि नित्यम् ॥
तत्तन्मतोद्वर्तनसूत्रधारं गुणैरुदारं कुमनीषिदूरम् ।
त्रय्यन्तपर्यन्तलसद्विलासं व्यासं तमासं प्रणतः प्रसत्त्यै ॥

श्रुत्यन्तभाष्यं सुगुणैकभूष्यं सर्वैरदूष्यं सहसापि(नुभाष्य) ।
शिष्यानूस्त(शिष्यं विशिष्याच्युत)मन्वशाद्यस्तोष्यामि तं भाष्यकृतं कृतार्थः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अधीत्य तन्त्रं सकलस्वतन्त्रादध्यैषि भाष्यं विबुधाप्रधृष्यम् ।
यस्मादकस्मात्कृपया प्रसन्नं तं श्रीनिवासाध्वरिणं नमामि ॥

मदग्रजानुग्रहलब्धबुद्धिः विविच्य रुच्या परिभाष्य भाष्यम् ।
विरोधिनात्रोद्दळितान्विरोधान् धुनोमि तेनाशु धिनोमि साधून् ॥

* * * *

इह खलु भगवान् कारणब्रह्मैकविषयकं प्रदिदर्ष(शे)यिषुर्ब्रह्म जिज्ञास्यं प्रतिज्ञाय तल्लक्षणं च जगत्कारणत्वमुपादिक्षत् ।

अथातो ब्रह्मजिज्ञासा ।

बृहत्त्वब्रह्मत्वयोरुद्देश्यतावच्छेदकविधेयत्व समदीदृशच्च । एवं कारणं तु ध्येय इति श्रुत्यभिहितापवर्गहेतुध्यानविषयः ।

**End :**

तत्र तद्धर्माणां शब्दान्तराणामवस्थाभेदेनान्यथासिद्धत्वात् तेषां भेदतः प्रमाणतापि युक्तेति सर्वमनवद्यम् ॥

**Colophon :**

इति श्रीशैलश्रीनिवासविरचिते विरोधनिरोधे सप्तविंशो निरोधः ॥

दोषगवेषणशीला भाष्ये भाष्ये परैरदूष्ये च ।
आदित्य इव दिवान्धारसद्गुणार्वाद्भिः परं बाहिष्कार्याः ॥

त्रयीवधूहृद्दवधूय(व्य)थाकथाविधूननाबाधसमेधितोक्तिषु ।
विरोधमाधातुमुशान्ति ऐद्द(ये भृ)शं प्रशान्तरेषू(णू)त्कटकण्टकेष्विव ॥

प्रच्छन्नबौद्धजन(जात)विरोधयूथं(थ)दुष्कण्टकौघमुखभङ्गकृते कृतिर्मे ।
श्रीभाष्यरत्नमयचित्रपदत्रया(भा)वमासाद्य सम्प्रति मुदं प्रददातु सद्भ्यः ॥

त्रय्यन्तोदन्तदन्तावळमलघुबलं यो(ये) प्रसह्याधिरुह्य
श्रीमद्भाष्याभिधानं सृणिमणिमितरप्रश्रयं नाश्रयन्ते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इति श्रीशैलकुलतिलकसर्वतन्त्रस्वतन्त्रश्रीनिवासताताचार्यतनूभवेन लक्ष्म्यम्बागर्भशुक्तिमुक्तामणिना कौण्डिन्यश्रीनिवासदीक्षितकृपाकटाक्षवीक्षासमासादितमीमांसादिद्वन्द्वनिर्द्वन्द्विना निजाग्रजाण्णयाचार्यदीक्षितनिरवग्रहानुग्रहलब्धचतुस्तन्त्रीतन्त्रितमानसेन श्रीनिवासविदुषा समर्थिता श्रीभाष्यपादुका समाप्ता ॥

---

## No. 4997. विरोधनिरोधः—भाष्यपादुका.

## VIRŌDHANIRŌDHAḤ : BHĀṢYAPĀDUKĀ.

Substance, palm-leaf. Size, $18\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 141. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, not new.

Begins on fol. 1*a*. The other work herein is Raghuvaṁśa **72*a***.

Complete in 27 Nirōdhas.

Same work as the above.

---

## No. 4998. विरोधवरूथिनीप्रमाथिनी.

## VIRŌDHAVARŪTHINĪPRAMĀTHINĪ.

**Pages, 147. Lines, 20 on a page.**

Begins on fol. 185*a* of the MS. described under No. 4996.

A work in support of the Virōdhanirōdha and the Śrībhāṣya : by Śrīnivāsadīkṣita, son of Śrīnivāsatātārya, son of Aṇṇayācārya and disciple of Ācāryadīkṣita.

**Beginning :**

श्रीशेषक्ष्माभृदीशे स्थिरचररचनास्थापनाक्षेपदक्षे
श्रुत्यन्तात्यन्तदीप्ते भगवति विनतव्रातरक्षैकदीक्षे ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विद्यापद्या(तिहृद्या)नुभवशुभगुणग्रामनिस्सीमभूमन्
वस्तुप्रस्तुत्युदस्तप्रतिहतिरतुला भक्तिरात्यन्तिकी नः ॥

व्यासस्सूत्राणि बोधायनयतिनृपती भाष्यंतद्व्येयेतत्श्रिये(वृत्तिभाष्ये)च(टीकां)
व्यासार्यो वेदचूडागुरुवरदमहादेशिका तन्नि(ये न्य)बन्ध(ध्न)न् ।
श्रीमान् श्रीरङ्गरामावरजमुनिवरो वेङ्कटार्यांण्णयार्यौ
कौण्डिन्यश्रीनिवासाध्वरिगुरुरपि मे सुप्रसन्ना भवन्तु ॥

श्रीशैलबुक्कपट्टणकुलकलशपयोधियामिनीनाथौ ।
नरसिंहताताण्ण(त)यार्यश्रीनिधितातार्यदेशिकौ कलये ॥
दुर्मेधोग्रथिता य(ा)च विरोधानां वरूथिनी ।
तस्याः प्रमाथिनीं कुर्वे सिद्धान्तार्थप्रबोधिनीम् ॥

यक्षानुरूपो बलिरित्यवेक्ष्य पक्षस्य शत्रोः क्षपणाय कांचित् ।
वक्ष्येऽत्र युक्तिं क्षमया निरीक्ष्य रक्षन्तु सन्तो हि नवां कृतिं मे ॥

इह खलु कश्चिदनिश्चितविपश्चिदपश्चिम श्रीमद्रामानुजमुनिप्रणीत-शारीरकमहाभाष्यतात्पर्यैः प्राह—

"एतच्छतं विरोधानां भाष्ये रामानुजेरिते ।
दुरुद्धरं हरेणापि हरिणापि निरूप्यते ॥" इति ।

तद्विरुद्धवचनदुरध्वनिबद्धस्वमतभाष्यवैदुष्यलब्धदौर्भाग्यात् । तदुक्तमाचार्यपादैः—

"कृतिश्रेणीचूडापदबहुमते लक्ष्मणमते
स्वपक्षस्थान्दोषान्वितथमतिरारोपयति यः ।
स्वहस्तेनोत्क्षिप्तैस्सकलनिजगात्रेषु बहुळं
गळद्भिर्जम्बाळैर्गगनतलमालिम्पति जडः ॥" इति ।

**End:**

विस्तरेणासत्कृत . . . . . प्रध्वंसिन्यां कृतमिति तत्रैव द्रष्टव्यम् । एतेन तदेवमित्याद्युपसंहारग्रन्थोऽपि सङ्गच्छत इति सुव्यक्तमेव सर्वेषाम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विरोधो योऽतिबलवान् जगत्कारणताश्रितः ।
दुरुच्छेद्यश्चतुर्वक्त्रवयसेति परेरितः ॥
विनिर्धूतक्षणेनैव मया बालेन साहसात् ।
श्रीमतां चरणाम्भोजद्वन्द्वनिर्द्वन्द्वचेतसाम् ॥
सन्तो भवन्तः पश्यन्तु क्षान्त्या स्खालित्यमस्ति चेत् ।
निरीक्ष्य शिक्षया रक्षां कुर्वन्तु कृपया मयि ॥

* * * *

**Colophon:**

इति श्रीशैलबुक्कपट्टणकुलतिलकश्रीमदण्णयाचार्यगर्भशुक्तिमुक्ताफलस्य श्रीनिवासतातार्यस्य नन्दनेन श्रीमदाचार्यदीक्षितगुरुचरणारविन्दद्वन्द्वसेवासमधिगतश्रीमच्छारीरकभाष्यतात्पर्येण श्रीमद्वेदान्तदेशिककृपाकटाक्षवीक्षालब्धपरावरतत्त्वयाथार्थ्यज्ञानेन श्रीनिवासदीक्षितेन रचितायां विरोधवरूथिनीप्रमाथिन्यां प्रथमविरोधोद्धारः ॥

---

## No. 4999. विशिष्टाद्वैतसिद्धान्तः.

## VIŚIṢṬĀDVAITASIDDHĀNTAḤ.

Pages, 32. Lines, 18 on a page.

Begins on fol. 1*a* of the MS. described under No. 4842.

A short summary of the doctrines of the Viśiṣṭādvaita-Vēdānta as given by Rāmānuja: by Śrīnivāsadāsa, a disciple of Prativādibhayaṅkara-Vēṅkaṭārya.

**Beginning:**

श्रीश्रीनिवासदासेन प्रणम्याचार्यसन्ततिम् ।
विशिष्टाद्वैतसिद्धान्तः सत्प्रमाणैस्समर्थ्यते ॥

अत्रायं वेदविदग्रेसराणां पन्थाः—

सर्वावस्थचिदचिद्वस्तुविलक्षणस्तदात्मभूतस्तच्छरीरकोऽसाधारणपुरुष-नारायणविष्णुवासुदेवनृसिंहभगवदादिशब्दवाच्यो निखिलहेयप्रत्यनीकस्व-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रूपः स्वाभाविकानन्दादिकल्याणगुणाकरः परमात्मैव मुमुक्षुभिर्ध्येयः ; कारणन्तु ध्येय इत्यादिश्रुतेः ।

मुमुक्षवो घोररूपान् हित्वा भूतपतीनथ ।
नारायणकलाश्शान्ता भजन्ति ह्यनुरूपव:(त:) ॥

**End :**

लभ्यो मुमुक्षुणा श्रीमद्यतीन्द्राम्नायतः क्रमः ।
श्रुत्यादिसत्प्रमाणैर्हि देशिकैरुपदिश्यते ॥
विशिष्टाद्वैतराद्धान्तः प्रसिद्धः शिष्टसम्मतः ।
श्रीनिवासाङ्घ्रिदासेन त्वनुभूतः सनातनः ॥

**Colophon :**

इति श्रीमन्नारायणचरणनलिनद्विरेफाणां प्रतिवादीभकेसरिणां श्रीमद्वेङ्कटाचार्याणां चरणारविन्दमधुपेन श्रीनिवासदासानुदासेन सङ्गृहीतो विशिष्टाद्वैतसिद्धान्तः ॥

---

## No. 5000. विषयतावादः.

## VIṢAYATĀVĀDAḤ.

Substance, palm-leaf. Size, 16 × 1¼ inches. Pages, 26. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, not old.

Begins on fol. 31*a*. The other works herein are Samāsavāda 1*a*, Śarīravāda 19*a*, Cakrāṅkanādivaibhavapratipādakapadya (Tamil) 44*a*.

A disquisition on the nature of the objectivity of the Brahman in relation to the Brahman-knowledge forming the means for the final deliverance of the soul from all bondage : by Anantācārya of Śēṣārya family.

**Beginning :**

जननावनलयहेतुं जगत(:) श्रीशं समाराध्य ।
नन्ता गुरुचरणाब्जेऽनन्तार्यो वक्ति विषयतावादम् ॥

334

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इह खलु ब्रह्मविषयज्ञानस्य मोक्षहेतुत्वेन ब्रह्मण इव विषयताया अपि अवच्छेदकत्वादवश्यं ज्ञातव्येति सा विचार्यते—

विषयता नाम ज्ञानविषययोस्सम्बन्धविशेषो ज्ञानविषयो घटः ज्ञातो घट इत्यादिप्रतीतिसाक्षिको दुरपह्नवः । ननु सा किंरूपेति चेत् अत्र ब्रह्मानन्दः—विषयता हि विषयेषु ज्ञानस्य तादात्म्यम् । ज्ञानं च वृत्त्यवच्छिन्नचैतन्यम् । असत्यापादकाज्ञानाविषयत्वप्रयोजकत्वविशिष्टं वा चैतन्यम् ।

**End:**

एतेन सर्वज्ञत्वस्य सर्वविषयकज्ञानवत्त्वरूपत्वे सर्वपदजन्यबोधवति बद्धपुरुषेऽतिप्रसक्तिः । प्रमेयत्वव्याप्यतत्तद्व्यक्तित्वावच्छिन्नविषयिताकज्ञानवत्त्वरूपत्वे प्रमेयत्वव्यापकतत्तद्व्यक्तित्वावच्छिन्नेत्याद्युक्तवाक्यजन्यबोधवत्यतिप्रसक्तिरिति परास्तमिति प्राहुरिति निरवद्यम् ॥

**Colophon:**

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

इति विषयतावादः ॥

---

## No. 5001. विषयवाक्यदीपिका.
## VIṢAYAVĀKYADĪPIKĀ.

Substance, palm-leaf. Size, $18\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 476. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Breaks off in the first Sūtra of the first Pāda of the fourth Adhyāya.

This is a commentary on the various scriptural passages referred to in the Vēdānta aphorisms as explained in the Śrī-bhāṣya of Rāmānuja: by Raṅgarāmānuja-Svāmin.

**Beginning:**

अतसीगुच्छसच्छायमञ्चितोरस्स्थलं श्रिया ।
अञ्जनाचलशृङ्गारमञ्जलिर्मम गाहताम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्यासं लक्ष्मणयोगीन्द्रं प्रणम्यान्यान् गुरूनपि ।
भाष्योदाहृतवेदान्तवाक्यार्थस्सम्प्रकाश्यते ॥
विस्तृतोपनिषद्भाष्यप्रवेशाक्षमचेतसाम् ।
अनुग्रहेण साफल्यं कृतिरेषा प्रपत्स्यते ॥

जन्माद्यस्य यतः ।

भृगुवल्ल्यां श्रूयते—

"यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्म"—इति । जीवन्ति येनात्मभूतेन जीवन्तीत्यर्थः । प्रयन्ति सन्ति । यदभिसंविशन्ति लीयमानानि सन्ति तदभिसंविशन्ति यत्र लीयन्ते । समित्येकीकरणे; एकीकृततया प्रवेशस्संवेशः ॥

See under the next number for the end.

---

## No. 5002. विषयवाक्यदीपिका.

## VIṢAYAVĀKYADĪPIKĀ.

Substance, palm-leaf. Size, $19\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 346. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Same work as the above.

See under the previous number for the beginning.

**End:**

एकत्वादेव विवृद्धा नाभवत् । तच्छ्रेयोरूपमत्यसृजत्क्षत्रम् । क्षत्रियाख्यं श्रेष्ठं शरीरमसृजत् । तदेव प्रपञ्चयति—यान्येतानि क्षत्रियाणि इन्द्रो वरुण इत्यादि । देवत्रा देवेष्वित्यर्थः । देवमनुष्येत्यादिना सप्तम्यास्त्राप्रत्ययावि(यः । शि)ष्टं स्पष्टम् ॥

क्षेमाय यः करुणया क्षितिनिर्जराणां भूमावजृम्भयत भाष्यसुधामुदारः ।
वामागमाध्वगवदावदतूलवातो रामानुजस्स मुनिराद्रियतां मदन्ते ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति श्रीरामानुजमुने(:) भाष्योपयुक्तोपनिषद्वाक्यविवरणं समाप्तः-(म्) ॥

---

## No. 5003. विषयवाक्यदीपिका.

## VIṢAYAVĀKYADĪPIKĀ.

Substance, palm-leaf. Size, 16¼ × 1½ inches. Pages, 200. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 144*a*. The other works herein are Vēdārthasaṅgraha 1*a*, Vēdāntadīpa 50*a*.

Contains the commentary up to 40 Sūtras in the 3rd Pāda of the 1st Adhyāya.

Same work as the above.

---

## No. 5004. वेदान्तकण्टकोद्धारः.

## VĒDĀNTAKAṆṬAKŌDDHĀRAḤ.

Substance, paper. Size, 11⅛ × 9 inches. Pages, 170. Lines, 21 on a page. Character, Telugu. Condition, good. Appearance, new.

Incomplete.

By Campakēśācārya.

Herein the author explains away the various defects and difficulties pointed out in the Viśiṣṭādvaita-Vēdānta by opponents.

**Beginning:**

आनन्दसिन्धुमवधीरितदोषगन्धमापन्नबन्धुमनुरूपदयानुबन्धम् ।
आपादचूडमनुभूय तुरङ्गवक्त्रम् आकल्पवेलममृताप्लुतमस्तु चेतः ॥

* * * *

वरदगुरुमुखानां देशिकानां प्रसादात् करबदरसमानं प्राप्य वेदान्तसारम् ।
कलयति निगमान्ते मन्दशङ्कानिरासं विबुधजनमुदे श्रीचम्पकेशो विप-
[श्चित् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रामानुजार्यराद्धान्तपरिष्कारहृदम्बुजाः ।
वेदान्तकण्टकोद्धारमनुगृह्णन्तु सज्जनाः ॥

अधीतसाङ्गशिरस्कस्वाध्यायापातप्रतीतानन्तास्थिरफलक[मे]ब्रह्मावबोध: कर्ममीमांसासमधिगतकर्मफलं(ल)फल्गुभावसमासादितनिर्वेदः कश्चिद्विप-श्चित् [कर्म]ब्रह्ममीमांसायामधिकरोतीति महानयं घण्टापथः ।

**End:**

परस्परविरोधे किं केन बाध्यताम्? सर्वज्ञप्रणीतत्वावगमस्य वेदा-(बौद्धा)र्हततन्त्राणामविशेषात् । तदेवम्—

वेदार्हवे सत्यतया समौ मतौ प्रमाणभावोऽपि तथा समोऽनयोः ।
प्रणीतबुद्धी च समे तयोरतस्स तान्त्रिकस्याजनि बुद्धसङ्करः ॥

अस्माकं पुनराम्नायस्यापौरुषेयतया बोधकत्वाविरोधिदोषशून्यस्य संवादानपेक्ष्यस्य बाधकाभावात् सिद्धं निर्विशेषवस्तुनि तात्त्विकं प्रामाण्य-मिति प्रत्यक्षादिविरोधोऽकिञ्चित्कर इति अत्रेयं कण्टकोद्धारसरणिः.

कवितार्किकसिंहं देशिकदासेन लिखिता ॥

---

## No. 5005. वेदान्तकारिकावली.

## VĒDĀNTAKĀRIKĀVALĪ.

Substance, palm-leaf. Size, 17⅜ × 1½ inches. Pages, 15. Lines, 11 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 63*a*. The other work herein is Siddhāntasiddhāñjana 1*a*.

Complete.

A summary in verse enumerating the various categories and conclusions in accordance with the Viśiṣṭādvita-Vēdānta of Rāmānuja: by Bucci Vēṅkaṭācārya, third son of Aṇṇayācārya.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



The subject treated herein are given below :—

| | | | |
|---|---|---|---|
| १. | प्रत्यक्षप्रमाणनिरूपणम्. | ६. | नित्यविभूतिनिरूपणम्. |
| २. | अनुमाननिरूपणम्. | ७. | बुद्धिनिरूपणम्. |
| ३. | शब्दप्रमाणनिरूपणम्. | ८. | जीवस्वरूपनिरूपणम्. |
| ४. | प्रकृतिनिरूपणम् | ९. | ईश्वरनिरूपणम्. |
| ५. | कालनिरूपणम्. | १०. | गुणनिरूपणम्. |

**Beginning:**

श्रीमद्रमाधवोपज्ञं नत्वाचार्यपरम्पराम् ।
कुर्वे लक्ष्मणसिद्धान्तकारिकां कारिकावलीम् ॥
मानमेयविभेदेन पदार्थो द्विविधो मतः ।
मानं प्रत्यक्षानुमानशब्दभेदात्रिधा मतम् ॥
प्रमेयं द्विविधं प्रोक्तं द्रव्याद्रव्यप्रभेदतः ।
जडाजडत्वभिन्नेऽत्र द्रव्ये तद्द्विविधं जडम् ॥
प्रकृतिः काल इत्याद्या चतुर्विंशतिधा मता ।
कालस्तूपाधिभेदेन त्रिविधः परिकीर्तितः ॥

**End:**

कर्मणामपि शक्तित्वं केचिदाहुर्मनीषिणः ।
पदार्थान्तरतामन्ये प्राहुर्वेदान्तवेदिनः ॥
प्राचीनग्रन्थपदवीमनुसृत्य यथामति ।
विशिष्टाद्वैतसिद्धान्तफक्किकेत्थं निदर्शिता ॥
अण्णयार्याध्वरीन्द्रस्य तार्तीयीकतनूभुवा ।
श्रीमद्वेङ्कटदासेन निर्मिता कारिकावली ॥
निरमायि रमायत्तपरमाद्भुततेजसा ।
मुदमादातुकामेन मयेयं कारिकावली ॥
भक्तिप्रपत्त्योरधिदेवताभ्यामिवाब्जनाभस्य पदाम्बुजाभ्याम् ।
समर्पयेऽस्मन्मतकारिकावळीं तदङ्गुळीसङ्ख्यनिरूपणाढ्याम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यश्श्रीमच्छठमर्षणान्वयपयस्सिन्धोरिवेन्दुर्महा-
नण्णार्यस्समभूदभूषि च चतुस्तन्त्री वचःकान्तिभिः ।
तस्यासौ तनयस्समार्जितनयश्श्रीवेङ्कटार्यस्सुधीः
श्रुत्यन्तान्वयकारिकाळिमतनोत्प्रीत्यै महत्यै सताम् ॥

**Colophon:**

इति श्रीमच्छठमर्षणान्वयपयोधिचन्द्रमसष्षड्दर्शनीपारदृश्वनोऽण्णार्यसोमपीथिनस्तृतीयसुतेन बुच्चिवेङ्कटाचार्येण विरचितायां वेदान्तकारिकावल्यां गुणानिरूपणं नाम दशमं प्रकरणम् ॥

श्रृणु वेङ्कटशैलशेखराग्रे कृतवासं नृहरे भवन्तमद्य ।
निशितेन मदात्मना शरेण प्रणिविद्धा(ध्या)मि हृदन्तरेऽवधेहि ॥

---

## No. 5006. वेदान्तकारिकावली.

## VĒDĀNTAKĀRIKĀVALĪ.

Pages, 23. Lines, 6 on a page.

Begins on fol. 17*a* of the MS. described under No. 4877.

Complete.

Same work as the above.

---

## No. 5007. वेदान्तकारिकावली.

## VEDĀNTAKĀRĪKĀVALĪ

Substance, palm-leaf. Size, 9½ × 1¼ inches. Pages, 24. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Incomplete. Up to Prakṛtinirūpaṇa.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5008. वेदान्तकौस्तुभः.
## VĒDĀNTAKAUSTUBHAḤ.

Substance, palm-leaf. Size, $20\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 188. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

A work on Viśiṣṭādvaita-Vēdānta pointing out that all authoritative scriptural passages denote Nārāyaṇa as the Supreme Brahman: by Paravastu Vēdāntācārya, son of Ādivarāhācārya and brother of Vēdāntācārya of Śrīvatsa family.

**Beginning:**

प्रणामा मम गाहन्तां श्रीरङ्गगृहमेधिनम् ।
लक्ष्मीः प्रियतमा यस्य पुत्रा विधिशिवादयः ॥
अन्यत्रेश्वरताभ्रान्तिं वारयन्तमिवात्मनाम् ।
पाणिं श्रीरङ्गराजस्य स्मराम्यभयमुद्रितम् ॥

* * * *

सत्तर्काद्रिप्रवरमथितादागमान्ताम्बुराशे-
र्जातः श्रीमान् प्रशमिततमाः कौस्तुभो वाङ्मयोऽयम् ।
जीयाल्लक्ष्मीरमणहृदयं रञ्जयन्नायुगान्तं
प्रीयन्तां मे यतिपतिमुखा देशिकाश्चास्मदीयाः ॥

इह खलु भगवान् श्रियःपतिः स्वभावतो निरस्तनिखिलदोषोऽनवधिकातिशयासङ्ख्येयकल्याणगुणगणः सर्वेश्वरः परमकारुणिकः अपारदुस्तरभवपयोधिनिमग्नान् पुरुषानुद्दिधीर्षुः अतिगहनगम्भीरवेदान्तबृन्दोपदर्शितपरतत्त्वपरमहितपरमपुरुषार्थगोचरविशदप्रतिपत्तिं प्रापय्य ताननुग्रहीतुकामः श्रीमतः पराशरात् कृष्णद्वैपायनरूपेणावतीर्य वेदोत्तंसेतिकर्तव्यताभूतं शारीरकशास्त्रं निबबन्ध । तत्र च मुमुक्षुभिर्ज्ञेयस्य परस्य ब्रह्मणः लक्षणमुपदिशन्तीं यतो वा इमानि भूतानि जायन्ते, येन जा-

For Private and Personal Use Only

तानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व, तद्ब्रह्म इति श्रुतिं जन्माद्यस्य यत इति सूत्रेण व्याचख्यौ । एवं च श्रुतिसूत्राभ्यां जगज्जन्मादिकारणं यत्तद्ब्रह्मेति विज्ञातव्यमित्येतत्सर्वसंमतम् । तच्च जगज्जन्मादिकारणं किमित्यपेक्षायां तत्प्रापकवाक्यान्तरान्वेषणेन तन्निर्धारणीयम् ।

See under the next number for the end.

---

## No. 5009. वेदान्तकौस्तुभः.

## VĒDĀNTAKAUSTUBHAḤ.

**Substance**, paper. Size, 13 × 8 inches. Pages, 237. Lines, 28 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 81*a*. The other works herein are Vēdāntavijaya 1*a*, Vēdāntakaustubha 250*a*.

Adhikāras 1 to 3. The 2nd Adhikāra is incomplete (24 leaves are left unwritten).

See under the previous number for the beginning.

Same work as the above.

**End:**

तस्मात्तत्र प्रागुपदर्शितैः प्रबलैर्न्यायैरुदाहृतप्रबलानेकस्मृतीतिहासपुराणभगवच्छास्त्राद्युपबृंहणैश्च सर्वासामुपनिषदां नारायणपरभाव एव विश्रान्तेर्वज्रलेपायितत्वात् देवतान्तरपरभावो वैदिकैर्बहिष्कार्य इति सिद्धम् ॥

**Colophon:**

इति श्रीवत्सकुलजलधिकौस्तुभवैदिकसार्वभौमवेदान्तदेशिकसम्प्रदायप्रवर्तकवेङ्कटदेशिकसुकृतपरिपाकसर्वतन्त्रस्वतन्त्रवेदान्ताचार्यानुजश्रीमदादिवराहाचार्यतनयस्य तच्चरणारविन्दचञ्चरीकस्य तत्प्रसादलब्धब्रह्मविद्यावैशद्यस्य निजहृदयकमलविहरमाणश्रीरङ्गराजप्रेरितस्य कोनद्यम्बागर्भसम्भ-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वस्य वेदान्ताचार्यस्य कृतिषु वेदान्तकौस्तुभे उपबृंहणाधिकारस्तृतीयस्स-
माप्तः ॥

---

## No. 5010. वेदान्तकौस्तुभः.

## VĒDĀNTAKAUSTUBHAḤ.

Pages, 221. Lines, 28 on a page.

Begins on fol. 250*a* of the MS. described under No. 5009.

Incomplete.

Similar to the above.

By Śrīśaila-Rāghavācārya.

**Beginning:**

श्रीकामश्रिश्रितवत्सलस्सुरवरश्रेणीकिरीटस्फुर-
न्माणिक्यद्युतिरञ्जिताङ्घ्रियुगळव्याख्यातसर्वोन्नतिः ।
सौन्दर्यामृतवारिधिः शुभगुणस्तोमाभिरामः पुमान्
श्रेयो मे वितनोतु गौतमसतीदाम्पत्यसन्धायकः ॥

यतिपतिनिगमान्तगुरू प्रणम श्रुतिशिखरवर्तनी याभ्याम् ।
निष्कण्टकघण्टापथभावं गमिता सुखं ददात्यमृतम् ॥

श्रीमद्वेङ्कटदेशिकमपरं यतिसार्वभौममिव मह्यम् ।
श्रुतिशिखररूपमर्थं प्रकाशयन्तं प्रकृष्टगुणमीडे ॥

तिरुमलदेशिकमस्मत्तातं श्रीवेङ्कटार्यगुरुतनयम् ।
वेदान्तयुगळसन्त(त)तव्याख्याविख्यातवैभवं वन्दे ॥

मतिमथितनिगमजलधेर्लब्ध्वा वेदान्तकौस्तुभाख्यमणिम् ।
श्रीशैलराघवार्पितमनुगृह्णातु श्रिया समं शौरिः ॥

मीमांसाया विधिप्राप्तरागप्राप्तत्वसंशयम् ।
छेत्तुं विचारयामोऽद्य विधिमध्ययनान्वितम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किमध्ययनविधिरर्थज्ञानपर्यवसाय्याहोस्विदक्षरराशिग्रहणमात्रपर्यवसा-यीति? किं युक्तमर्थज्ञानमात्रपर्यवसायीति? तथाहि—

अर्थावबोधमुद्दिश्य शब्दोच्चारणेन हि लोके वाक्यानां तात्पर्यमवधार्य(म्); तन्निर्वाहार्थं मुख्यासम्भवे लक्षणादिकल्पना; न तूच्चारणमात्रेण। अयं गौरश्वः पुरुषो हस्तीतिपदानामुच्चारणमात्रेण न लक्षणादि कल्प्यते। यदा तु विशिष्टार्थबोधमुद्दिश्य तेषामुच्चारणमिति तात्पर्यावगमः, तथै(दै)व तन्निर्वाहार्थमयं गौर्बलीवर्दः, अश्वो वेगवान्, पुरुषो नियतचेष्टः, हस्तीति बलवानिति गवादिपदानामध्याहारलक्षणादि कल्प्यते।

**End:**

सच्छब्दप्रत्ययमात्रभाजः परस्य ब्रह्मणोऽपि हन्ताहमिमास्तिस्रो देवताः, अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि, बहु स्यां प्रजायेयेति, स ऐक्षत, लोकान्नु सृजा इति.

---

## No. 5011. वेदान्तदीपः.
## VĒDĀNTADĪPAḤ.

**Pages**, 188. Lines, 8 on a page.

Begins on fol. 50*a* of the MS. described under No. 5003.

Complete.

A work explaining the main lessons taught in the Brahmasūtras according to the Viśiṣṭādvaita view of the Vēdānta: by Rāmānujamuni.

**Beginning:**

श्रियः कान्तोऽनन्तो वरगुणगणैकास्पदवपु-
र्हताशेषावद्यः परमखपरो(दो)वाङ्मनसयोः।
अभूमिर्भूमिर्यो नतजनदृशामादिपुरुषो
मनस्तत्पादाब्जे परिचरणयुक्तं भवतु मे ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रणम्य शिरसाचार्यांस्तदादिष्टेन वर्त्मना ।
ब्रह्मसूत्रपदान्तस्थवेदान्तार्थः प्रकाश्यते ॥

अत्रेयं वेदवेदा(न्त)प्रक्रिया—

अचिद्वस्तुनः स्वरूपतस्स्वभावतश्चात्यन्तविलक्षणस्तदात्मभूतश्चेतनः प्रत्यगात्मा तस्माद्बद्धान्मुक्तान्नित्याच्च निखिलहेयप्रत्यनीकतया कल्याणैकतानतया च सर्वावस्थचिदचिद्व्यापकतयाधारतया नियन्तृतया शेषितया चात्यन्तविलक्षणः परमात्मा ।

**End:**

यदि नियन्तृत्वं परस्यैव, एवं तर्हि स्वतन्त्रत्वेन मुक्तं परः कदाचित्पुनरावर्तयिष्यतीत्याशङ्कयाह —अनावृत्तिश्शब्दादनावृत्तिश्शब्दा(त्) । अस्य मुक्तस्यानावृत्तिः शब्दादवगम्यते । यथा—यतो वा इमानि भूतानि जायन्ते । सोऽकामयत । बहु स्यां प्रजायेयेति । यः पृथिव्या(वी)मन्तरो यमयति । य आत्मानमन्तरो यमयति इति शब्दात्परमपुरुषस्य स्रष्टृत्वं नियन्तृत्वं चावगम्यते, तथा एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते । स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्तते न च पुनरावर्तते ।

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः ॥

मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ।
इदं ज्ञानमपाश्रित्य मम साधर्म्यमागताः ॥

सर्गेऽपि नोपजायन्ते प्रळये न व्यथन्ति च ॥

इति शब्दादेवैनं कदाचिदपि नावर्तयतीत्यवगम्यते । सूत्रावृत्तिस्तु शास्त्रसमाप्तिं द्योतयतीति सर्वं समञ्जसम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति श्रीभगवद्रामानुजमुनिविरचिते वेदान्तदीपे चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

---

## No. 5012. वेदान्तदीपः.

## VĒDĀNTADĪPAḤ.

Substance, palm-leaf. Size, $17\frac{5}{8} \times 1\frac{3}{8}$ inches. Pages, 235. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Yōgasāra 120*a*.

Complete

Same work as the above.

---

## No. 5013. वेदान्तदीपः.

## VĒDĀNTADĪPAḤ.

Substance, palm-leaf. Size, $21\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 146. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Vēdāntasāra 74*a*, Viṣṇusahasranāmabhāṣya 103*a*, Gadyatrayavyākhyāna 169*a*, Tiruppāvaivyākhyāna (Tamil) 199*a*.

Complete.

Same work as the above.

---

## No. 5014. वेदान्तदीपः.

## VĒDĀNTADĪPAḤ.

Pages, 260. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 2851.

Complete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5015. वेदान्तदीपः.
## VĒDĀNTADĪPAḤ.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 522. Lines, 4 on a page. Character, Grantha. Condition, injured. Appearance, new.

Complete.

Same work as the above.

---

## No. 5016. वेदान्तदीपः.
## VĒDĀNTADĪPAḤ.

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 259. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, new.

Complete.

Same work as the above.

---

## No. 5017. वेदान्तदीपः
## VĒDĀNTADĪPAḤ.

Substance, palm-leaf. Size, $15\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 234. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Wants beginning and end.

Same work as the above.

---

## No. 5018. वेदान्तदीपः.
## VĒDĀNTADĪPAḤ.

Substance, palm-leaf. Size, $15\frac{3}{8} \times 1\frac{1}{8}$ inches. Pages, 150. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are Vēdārthasaṅgraha 77*a*, Vēdāntasāra 109*a*.

The last Pāda incomplete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5019. वेदान्तविजयः (गुरूपसदनविजयः).

## VĒDĀNTAVIJAYAḤ (GURŪPASADANAVIJAYAḤ).

Substance, paper. Size, $11\frac{1}{8} \times 8\frac{7}{8}$ inches. Pages, 273. Lines, 21 on a page. Character, Grantha. Condition, good. Appearance, new.

First Ullāsa complete.

Deals with the manner in which a disciple desirous of knowing the Brahman should conduct himself towards his Guru. This is in fact a sub-division of the work called Vēdānta-vijaya which consists of 5 Ullāsas: by Rāmānujadāsa *alias* Mahācārya, a disciple of Śrīnivāsācārya of the Vādhūla-gōtra.

**Beginning:**

वक्त्राम्भोजान्मुरारेरुदयमधिगतां सम्यगद्वैतविद्यां
दिव्यां सिन्धुं ध्रुवाद्या इव परसरितं व्यस्तृणन्ये धरायाम् ।
व्यासो नाथो यतीन्द्रश्रुतिशिखरगुरू श्रीमहाचार्यवर्यौ
वाधूलश्रीनिवासो गुरुरिति महितांस्तानिमानाश्रयामः ॥

त्रैविक्रमं दितिजनिर्जयमाप्तहर्षस्सूनुर्यदाम्बुजभुवः प्रथयाम्बभूव ।
सानन्दमौपनिषदं तदुदारभावप्रत्यर्थिनिर्जयमहं प्रथयामि तद्वत् ॥

त्रिविक्रमजयो यथा जलजजन्मनस्सूनुना
जितं भगवता जगन्निखिलमित्यजोघुष्यत ।
तथोपनिषदामिदं कुमतिगर्वमर्मच्छिदां
विनिर्जययशो रमानिधिसुतेन जोघुष्यते ॥
परस्परनिरोधेन निरस्ताः प्रतिवादिनः ।
तेन वेदान्तसिद्धान्तस्सम्पन्नो निरुपद्रवः ॥

स्वाध्यायोऽध्येतव्य इत्यध्ययनविधेरध्ययनगृहीताङ्गपरिकर्मितस्वाध्यायस्य समधिगतानन्तस्थिरफलकर्मब्रह्मावबोधस्य तत्प्रसूतवेदान्तार्थश्रवणाभिलाषस्य मीमांसितपूर्वभागस्य तत्सम्पादितात्पास्थिरस्वर्गपश्वादिफलकर्मावबोधस्य ब्रह्मजिज्ञासोत्पत्तिं पूर्वभागार्थनिर्णयसहितापरभागार्थापातप्रतीति-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रसूतां समीक्ष्य ब्रह्मजिज्ञासोर्गुरूपसदननियमं विदधाति—परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेदिति ।

**End:**

इतरे पुनः प्रमाणशब्देन । ते हि शैलूषवद्वैदिकभूमिकां परिगृह्य वेदप्रामाण्यं वदन्त इव प्रविश्य वेदस्य व्यावहारिकार्थविषयत्वेनाप्रामाण्यापरपर्यायं प्रामाण्यमुक्त्वा कार्त्स्न्येन तथोक्तौ वैदिकैः बहिष्कारो भवितेति बुद्ध्या कस्यचित्तत्त्वावेदकत्वं वदन्त इव वैदिकगोष्ठीमध्यारूढस्यापि तत्त्ववेदकतया अभिमततत्त्वमस्यादेस्संसर्गबोधकत्वमप्यपहृत्य पदार्थस्यैव वाक्यार्थतां वदन्तः पौनरुक्त्यप्रसङ्गेन तदपि त्याजयन्तो बोधकत्वमेव नास्ति, कुतः प्रामाण्यमिति व्यञ्जयन्ति । तत्र पूर्वनिरासः पूर्वकाण्डे विस्तृतोऽनुसन्धेयः ॥

इति प्रथमविजये ब्रह्मणः अवाच्यत्वभङ्गः ॥

इत्थं स्वानुचरैर्न्यायैर्निराकृत्य विरोधिनः ।
तद्विज्ञानश्रुतिस्सार्धं तैर्जयत्यक्षरादिभिः ॥

**Colophon:**

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथार्थ्ये(त्म्ये)न तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचिते वेदान्तविजये गुरूपसत्तिविजयः प्रथमः ॥

श्रीमहाचार्यकृतः गुरूपसदनविजयस्सम्पूर्णः ॥

---

## No. 5020. वेदान्तविजयः (विजयोल्लासः).

## VĒDĀNTAVIJAYAḤ (VIJAYŌLLĀSAḤ).

**Pages**, 158. Lines, 28 on a page.

Begins on fol. 1*a* of the MS. described under No. 5009.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Contains the 5th Ullāsa alone.

A work on Viśiṣṭādvaita-Vēdānta pointing out Nārāyaṇa to be the Supreme Brahman: by Rāmānujadāsa *alias* **Mahācārya,** disciple of Śrīnivāsa of the Vādhūlavaṁśa.

**Beginning :**

इत्थं वेदान्ततात्पर्यं देशिकानां प्रसादतः ।
वर्णितं मुनिमुख्यानां मतं तदनुकम्प्यताम् ॥

तथापि(हि)—

तद्भावो(व) ग्राहिणीभिरते श्रुतिभिर्न्यायबन्धुभिः ।
श्रुतीनां पुरुषे भावं निरणैषुस्समन्ततः ॥

ते मुनयः श्रुतीनां भावं विजयचतुष्टये प्रदर्शितैर्न्यायैर्न्यायान्तरसचिवैरुपोद्बलिताभिस्सर्वासां श्रुतीनां भगवति तात्पर्यबोधिकाभिश्श्रुतिभिर्निराचिन्वन् । स्वर्णघर्मानुवाकस्तावदादित्यमण्डलसमुद्रान्तर्वर्तिपरत्वात् पूर्वोक्तविनियोगानुसार . . भगवत्परः । तत्रेदं श्रूयते—सर्वे वेदा यत्रैकं भवन्तीति । अत्र "रामसुग्रीवयोरैक्यं देव्येवं समजायत ।" इतिवत् एकशब्दस्सौहार्दपरः । अनेन वाक्येन पूर्वोत्तरभागात्मकस्य कृत्स्नस्यापि वेदस्य भगवत्येव परमतात्पर्यमिति स्पष्टमवगम्यते ।

**End :**

श्रीभागवते—

"निन्दन्ति ये भगवतश्चरणारविन्द-
चिन्तावधूतसकलाशुभकल्मषौघान् ।
तेषां यशोधनसुखायुरपत्यबन्धु-
क्षेत्रादयः स्थिरतरा अपि यान्ति नाशम् ॥"

इत्यादि ॥

श्रीप(ा)ञ्चरात्रे—

"वासुदेवं तत्प्रपन्नं निन्दन्तं हि द्विजाधमम् ।
विवासयन् खरारोहं कृत्वा भूपो न पापभाक् ॥"



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्यादि बहु द्रष्टव्यम् ॥
इति विजयोल्लासे सतां लक्षणम् ॥

**Colophon:**

इति वाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचिते वेदान्तविजये विजयोल्लासः पञ्चमः ॥

सम्पूर्णो वेदान्तविजयः ॥

---

## No. 5021. वेदान्तविजयव्याख्या—मङ्गलदीपिका.

## VĒDĀNTAVIJAYAVYĀKHYĀ: MAṄGALADĪPIKĀ.

Substance, paper. Size, 11 × $8\frac{7}{8}$ inches. Pages, 225. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

A commentary on the Vēdāntavijaya of Mahācārya: by Sudarśanaguru.

**Beginning:**

महाचार्यदयापात्त्र मनीषाभूषमानसम् ।
सौदर्शनगुरुं वन्दे सौशील्यादिगुणोज्ज्वलम् ॥

भक्तापेक्षितसर्वकामफलदं सर्वापदां वारकं
सत्सन्त्राणविभासिताब्जनयनं सम्फुल्लपद्माननम् ।
जानुद्वन्द्वसमुल्लसत्करयुगं व्यत्यस्तपादद्वयं
जन्मस्थेमल[illegible]ादिलीलघटिकाशैलादिनाथं भजे ॥

श्रेयो देयान्ममाचार्यो विद्याविनयवारिधिः ।
परवादिमतध्वान्तदिवाकरमहागुरुः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वेदान्तानां विजयमधुना देशिकानां प्रसादात्
वेदान्तार्थान् विशदमधुना क्षालयित्वा हि सर्वान् ।
सद्भिर्न्यायैर्विविधकुशलैर्व्याससूत्राधिरूढैः
वाधूलश्रीघनगुरुरसौ व्याकरोद्देशिकेन्द्रः ॥

* * * *

विजये निगमान्तानां शुभां मङ्गलदीपिकाम् ।
तनुते तत्प्रकाशाय सुदर्शनगुरुस्सुधीः ॥

इह खलु वाधूलश्रीघनगुरुः . . . . . . वेदान्तविजयाख्यप्रबन्धं प्रणिनाय । तत्र तदर्थानामतिविततगहनतया मन्दमतिदुरवबोधानां सकलविद्वज्जनसुखबोधाय तदर्थान् प्रधानप्रतिपाद्यान् (सङ्गृह्य) वेदान्तविजयमङ्गलदीपिकाख्यप्रबन्धमुखेनोपन्यासः क्रियते ।

तत्र प्रथममन्येषां संशयादिनिवृत्तये ।
श्रवणादेर्विधेयत्वनिरासः क्रियतेऽधुना ॥

वेदान्तवाक्यविहितश्रवणादेर्न युक्तिमत् ।
विधेयत्वं परोक्तं तु सिद्धेर्ध्यानविधानतः ॥

वेदान्ते तावत् द्रष्टव्यश्श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यादीनि दर्शनादीनां विधायकवाक्यानि श्रूयन्ते । तत्र किं सर्वाणि वाक्यानि विधायकानि? उत कानिचिद्वाक्यानि? इति विचार्यते ।

**End :**

तस्मात् श्रीमन्नारायण एव सर्वस्मात्परः जगत्कारणभूतो मोक्ष . . . . जगच्छरीरः जगत्पतिश्चेति सिद्धान्तस्सुप्रतिष्ट(ष्ठि)त इति ॥

335-A

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

श्रीमद्रामानुजार्यप्रमुखगुरुवरप्राप्तवेदान्तसिद्धान्
सर्वश्रुत्यन्तपाठ्यानुरुगुणसुल . . . . . सर्वान् ।
अर्थी(र्थि)नाचार्यवर्यश्शुभगुणजलधिस्सर्वविद्वत्प्रबुद्ध्यै
व्याकुर्वन् वेदमौलेर्विजयफणितिना(मा)वर्धते श्रीमहार्यः ॥

विजयमङ्गलदीपिका समाप्ता ॥

---

No. **5022.** वेदान्तसारः.

VEDĀNTASĀRAḤ.

Substance, palm-leaf. Size, 13⅜ × 1¼ inches. Pages, 123. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, not new.

Complete

An easy and very brief commentary on the Brahmasūtras : by Rāmānujācārya.

**Beginning :**

समस्तचिदचिद्वस्तुशरीरायाखिलात्मने ।
श्रीमते निर्मलानन्दोदन्वते विष्णवे नमः ॥

परमपुरुषप्रसादाद्वेदान्तसारार्थ उद्ध्रियते—

अथातो ब्रह्मजिज्ञासा ।

अथशब्द आनन्तर्ये वर्तते, अतश्शब्दशिरस्कत्वात् । अतश्शब्दः पूर्ववृत्तस्य हेतुभावे । पूर्ववृत्तं च कर्मज्ञानमिति ज्ञायते । आरिप्सितस्य ब्रह्मज्ञानस्य वेदार्थविचारैकदेशत्वादधीतवेदस्य पुरुषस्य कर्मप्रतिपादनोपक्रमत्वाद्वेदानां कर्मविचारः प्रथमं कार्य इत्यथातो धर्मजिज्ञासेत्युक्तम् । कर्मणां च प्रकृतिविकृतिरूपाणां धर्मार्थकामपुरुषार्थसाधनतानिश्चयः प्रभु त्वादार्त्विज्यमित्यन्तसूत्रकलापेन सङ्कर्षणेन कृतः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् ।

स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसम्पद्यते न (च) पुनरावर्तत इति शब्दान्निवृत्तस(मस्तति)रोधानाविर्भूतापहतपाप्मत्वादिगुणगणानवधिकातिशयानन्दं परं ब्रह्मानुभवति । न च पुनरावर्तत इति निश्चीयत इति सर्वं समञ्जसम् ॥

**Colophon:**

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमद्भगवद्रामानुजयोगीन्द्रविरचिते श्रीमद्वेदान्तसारे चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

स्वाधीनयति यो नित्यं पराकृत्य मनो मम ।
तस्मै रामानुजार्याय नमस्स्ताद्ब्रह्मयोगिने ॥

---

## No. 5023. वेदान्तसारः.
## VĒDĀNTASĀRAḤ.

Substance, palm-leaf. Size, $15 \times 1\frac{3}{8}$ inches. Pages, 118. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, not new.

Complete.

Same work as the above.

---

## No. 5024. वेदान्तसारः.
## VĒDĀNTASĀRAḤ.

Pages, 58. Lines, 9 on a page.

Begins on fol. 74*a* of the MS. described under No. 5013.

Complete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5025. वेदान्तसारः.

## VĒDĀNTASĀRAḤ.

Substance, palm-leaf. Size, $15\frac{3}{8} \times 1\frac{3}{8}$ inches. Pages, 84. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 37*a*. The other works herein are Śrīguṇaratnakōśa 1*a*, Prabōdhacandrōdaya 6*a*.

Breaks off in the 4th Pāda of the 4th Adhyāya.

Same work as the above.

---

## No. 5026. वेदान्तसारः.

## VĒDĀNTASĀRAḤ.

Pages, 66. Lines, 6 on a page.

Begins on fol. 15*a* of the MS. described under No. 4656.

Incomplete.

Same work as the above.

---

## No. 5027. वेदान्तसारः.

## VĒDĀNTASĀRAḤ.

Pages, 7. Lines, 9 on a page.

Begins on fol. 109*a* of the MS. described under No. 5018.

Incomplete.

Same work as the above.

---

## No. 5028. वेदार्थविचारः.

## VĒDĀRTHAVICĀRAḤ.

Pages, 35. Lines, 7 on a page.

Begins on fol. 203*a* of the MS. described under No. 4985.

Complete.

This work interprets certain Upaniṣadic passages so as to support the Viśiṣṭādvaita view of the Vēdānta.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

निसर्गभिदुरोऽपि सन्नखिलचेतनाचेतनात्
समस्तजगदात्मकस्सकलशब्दवाच्यस्स्वयम् ।
अशेषवपुरुज्ज्वलो हृतसमस्तहेयाकृतिः
स ते भवतु केशवः शुभगुणाश्रयश्श्रेयसे ॥
जगद्ब्रह्माद्वैतं जलहुतवहाद्वैतसदृशं
प्रकृत्या भिद्यन्ते प्रकृतिपुरुषेशास्त्रय इति ।
त्रिदण्डव्याजेन स्थितिमभिदधत्तत्त्वविषयान्
जगत्या जीवातुस्स जयति यतीनां परिबृढः ॥

सर्वेषां वेदान्तवाक्यानां विशिष्टाद्वैते तात्पर्यम् । कानि चिच्छास्त्राणि स्वरूपभेदं प्रतिपादयन्ति । प्रधानक्षेत्रज्ञपतिर्गुणेशः क्षरं प्रधानममृताक्षरं हरः । क्षरात्मना विशते देव एकः । द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति । समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः । जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः । . . . . यदा ह्येवैष एतस्मिन्नु दरमन्तरं कुरुते । अथ तस्य भयं भवति । नास्त्यत्र काचन भिदेति भेदनिषेधात् ।

विभेदजनकेऽज्ञाने नाशमात्यन्तिकं गते ।
आत्मनो ब्रह्मणोऽभेदमसन्तं कः करिष्यति ॥

इति मुक्तिदशायां भेदनिवृत्तिस्मरणात् ।

एवं द्वैताद्वैतशास्त्राणां विरोधे सति न तावत्तेषां विकल्पः; वस्तुनि विकल्पायोगात् । नापि समुच्चयः; भेदाभेदस्य नैकस्मिन्नसम्भवादिति सूत्रकृतैव प्रतिक्षिप्तत्वात् ।

**End:**

तस्मान्निर्विशेषस्वरूपाभेदकमानाभावात् बाधकप्रमाणसद्भावाच्च सजातीयविजातीयसकलभेदविशिष्टं ब्रह्मैव तत्त्वमिति सिद्धम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पूर्वाचार्यतृणीकृते बलवता प्राप्तोपरोधश्चिरं
मिथ्यावादिजनेन माधवकृपारूपैस्तदुच्छेदकैः ।
श्रीरामानुजविष्णुचित्तवरदव्यासादिभिर्देशिकैः
तत्त्वज्ञैरुपदर्शितोऽयमधुना त्रय्यन्तघण्टापथः ॥
श्रीगोविन्दगुरोश्शिष्यं श्रीवत्सकुलभूषणम् ।
वरदाचार्यतनयं वन्दे सौम्यवरं गुरुम् ॥

---

No. **5029.** वेदार्थसङ्ग्रहः.

VĒDĀRTHASAṄGRAHAḤ.

**Pages, 95.** Lines, 6 on a page.

**Begins on fol. 1*a* of the MS. described under No. 5003.**

**Complete.**

**An elaborate essay on the teachings of the Upaniṣads: by Rāmānujācārya.**

**Beginning:**

अशेषचिदचिद्वस्तुशेषिणे शेषशायिने ।
निर्मलानन्तकल्याणनिधये विष्णवे नमः ॥

परं ब्रह्मैवाज्ञं भ्रमपरिगतं संसरति तत्-
परोपाध्यालीढं विवशमशुभस्यास्पदमिति ।
श्रुतिन्यायपेतं जगति विततं मोहनमिदं
तमो येनापास्तं स हि विजयते यामुनमुनिः ॥

अशेषजगद्धितानुशासनश्रुतिशिखराशिरसि समधिगतोऽयमर्थः जीवपरमात्मयाथात्म्यज्ञानपूर्वकवर्णाश्रमधर्मेतिकर्तव्यताकपरमपुरुषचरणयुगलध्यानार्चनप्रणामादिरत्यर्थप्रियस्तत्प्राप्तिफलकः . . . . . . . .
देहातिरिक्तात्मस्वरूपतत्स्वभावतदन्तर्यामिपरमात्मस्वरूपस्वभावतदुपासनतत्फलभूतात्मस्वरूपाविर्भावपूर्वकानवधिकातिशयानन्दब्रह्मानुभवज्ञाने प्रवृत्तं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हि वेदान्तवाक्यजातम्—तत्त्वमसि, अयमात्मा ब्रह्म, य आत्मनि तिष्ठन्, आत्मनोऽन्तरो यमात्मा न वेद, यस्यात्मा शरीरम्, य आत्मानमन्तरो यमयति, स आत्मान्तर्याम्यमृतः . . . . . नान्यः पन्था अयनायेत्यादिकम् ।

**End:**

भक्त्या त्वनन्यया शक्य इत्यनेनैकार्थ्यात् भक्तिश्च ज्ञानविशेष एवेति सर्वमुपपन्नम् ॥

सारासारविवेकज्ञा गरीयांसो विमत्सराः ।
प्रमाणतन्त्रास्सन्तीति कृतो वेदार्थसङ्ग्रहः ॥

**Colophon:**

इति श्रीमद्रामानुजाचार्यविरचितो वेदार्थसङ्ग्रहोऽयं समाप्तः ॥

---

## No. 5030. वेदार्थसङ्ग्रहः.

## VĒDĀRTHASAṄGRAHAḤ.

Pages, 63. Lines, 10 on a page.

Begins on fol. 77*a* of the MS. described under No. 5018.

Complete.

Same work as the above.

---

## No. 5031. वेदार्थसङ्ग्रहः.

## VĒDĀRTHASAṄGRAHAḤ.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 116. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Vēdārthasaṅgrahavyākhyā (Tātparyadīpikā) 59*a*.

Complete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5032. वेदार्थसङ्ग्रहः.

## VĒDĀRTHASAṄGRAHAḤ.

Pages, 72. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 3118.

Incomplete.

Same work as the above.

---

## No. 5033. वेदार्थसङ्ग्रहव्याख्या—तात्पर्यदीपिका.

## VĒDĀRTHASAṄGRAHAVYĀKHYĀ : TĀTPARYADĪPIKĀ.

Substance, palm-leaf. Size, 15½ × 1⅝ inches. Pages, 230. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

A commentary on the Vēdārthasaṅgraha of Bhagavat Rāmānujācārya : by Sudarśnasūri *alias* Vēdavyāsa, son of Vāgvijayin of the Hārītagōtra and a disciple of Varadarājaguru.

**Beginning :**

वरदं द्विरदाद्रिशेखरं कमलाया दयितं दयानिधिम् ।
सकलार्थिजनार्थितप्रदं प्रणमामि प्रणतार्तिहारिणम् ॥

कृत्वानवद्यं निगमान्तभाष्यं निराकृतं येन भयं श्रुतीनाम् ।
प्रतारितानामबहुश्रुतैस्तं रामानुजं योगिनमाश्रयामः ॥

अशेषेत्यादिश्लोकद्वयेन प्रारिप्सितप्रकरणाविघ्नपरिसमाप्त्यर्थे . . . तत्र विप्रतिपत्तिविषयस्य तत्त्वमसीतिवाक्यस्यार्थनिष्कर्षणमुखेन लीलाविभूतिविशिष्टत्वमुच्यते । अशेषचिदचिद्वस्तुशेषिण इति प्रथमपदेन जगद्ब्रह्मणोस्सामानाधिकरण्यं शरीरिशरीरभावनिबन्धनम् । शरीरत्वञ्च चेतनं प्रत्यनन्यार्हशेषत्वम् । एवं सामानाधिकरण्यस्य शरीरशरीरिभावनिबन्धनत्वे सति चाभेदश्रुतिभिः घटकश्रुतिभिश्चास्य वाक्यस्याविरोधः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

उक्तविशेषणत्रयफलमाह—प्रमाणतन्त्रा इति । ये प्रमाणानुसारिणस्तदनुगुणैस्तर्कैऽरर्थं निरूपयन्ति, न तु स्वापेक्षितार्थे प्रमाणजातं क्लेशं नयन्ति; ते प्रमाणतन्त्राः । कालो ह्ययं निरवधिर्विपुला च पृथ्वीति प्रकारेण यत्र कुत्र चिद्यदा कदाचिदेवंविधाः पुरुषा अपि संभविष्यन्तीति मत्वा तेषामभिमतिविषयत्वेन वेदार्थसङ्ग्रहः कृत इत्यर्थः ॥

वेदार्थसङ्ग्रहसुधां वेदान्तार्थे(ब्धे)र्ये आच(ह)रत् ।
रामानुजाय मुनये तस्मै भगवते नमः ॥
वेदार्थसङ्ग्रहव्याख्या विहितेयं यथाश्रुतम् ।
वेदव्यासापराह्वेन श्रीसुदर्शनसूरिणा ॥

**Colophon:**

इति हारीतकुलतिलकवाग्विजयिसूनुना श्रीरङ्गराजदिव्याज्ञालब्धवेदव्यासापरनामधे(येन)श्रीमद्वरदराजपादसेवासमधिगतवेदार्थसङ्ग्रहतात्पर्येण श्रीसुदर्शनसूरिणा विलिखि(रचि)ता तात्पर्यदीपिका समाप्ता ॥

यादवतृणवत्कारी शङ्करभास्करतिरस्क्रियाकारी ।
वैदिककुलोपकारी रामावरजोऽयमविकरणकारी ॥

---

No. **5034.** वेदार्थसङ्ग्रहव्याख्या—तात्पर्यदीपिका.

VEDĀRTHASAṄGRAHAVYĀKHYĀ : TĀTPARYADĪPIKĀ.

Substance, palm-leaf. Size, $17\frac{5}{8} \times 1\frac{1}{8}$ inches. Pages, 126. Lines 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

In the beginning 118 leaves are wanting.

The copyist who transcribed this manuscript is a Vīrarāghavācārya of Pillaipākkam.

Complete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **5035.** वेदार्थसङ्ग्रहव्याख्या—तात्पर्यदीपिका.

VĒDĀRTHASAṄGRAHAVYĀKHYĀ : TĀTPARYADĪPIKĀ.

Substance, palm-leaf. Size, 15⅝ × 1⅜ inches. Pages, 84. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Incomplete.

Same work as the above.

---

No. **5036.** वेदार्थसङ्ग्रहव्याख्या—तात्पर्यदीपिका.

VĒDĀRTHASAṄGRAHAVYĀKHYĀ : TĀTPARYADĪPIKĀ.

Pages, 118. Lines, 7 on a page.

Begins on fol. 59*a* of the MS. described under No. 5031.

Incomplete.

Same work as the above.

---

No. **5037.** शतदूषणी.

ŚATADŪṢAṆĪ.

Substance, paper. Size, 13¼ × 8⅜ inches. Pages, 817. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

66 Bhaṅgas complete.

A work which unfavourably criticises the Advaitic and some other views of the Vēdānta which differ from Rāmānuja's Viśiṣṭādvaita : by Vēdānta-Dēśika.

**Beginning :**

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समाहारस्साम्नां प्रतिपदमृचां धाम यजुषां
लयः प्रत्यूहानां लहरिविततिर्बोधजलधेः ।
कथादर्पक्षुभ्यत्कविकथककोलाहलभवं
हरत्वन्तर्ध्वान्तं हयवदनहेषाहलहलः ॥

इदम्प्रथमसम्भवत्कुमतिजालकूलङ्कषा
मृषामतविषानलज्वलितजीवजीवातवः ।
क्षरन्त्यमृतमक्षरं यतिपुरन्दरस्योक्तय-
श्चिरन्तनसरस्वतीचिकुरबन्धसैरन्ध्रिकाः ॥

प्राचीमुपेत्य पदवीं यतिराजजुष्टां तत्सन्निकृष्टमपि वा मतमाश्रयन्तः ।
प्राज्ञा यथोदितमिदं शुकवत्पठन्तः प्रच्छन्नबौद्धविजये परितो यतध्वम् ॥

वादाहवेषु निर्भेत्तुं वेदमार्गविदूषकान् ।
प्रयुज्यतां शरश्रेणी निशिता शतदूषणी ॥

तत्र तावच्छास्त्रारम्भे—

विचारविषयत्वेन सूत्रकृद्यदसूत्रयत् ।
परोक्ता ब्रह्मशब्दस्य वृत्तिरत्र निरस्यते ॥

निर्विशेषब्रह्मवादे ब्रह्मशब्दस्य क्वचिन्मुख्यत्वमस्ति न वा? न चेद-साधुत्वापत्तिः । साधुत्वस्य मिथ्यात्वमभ्युपगच्छतामसाधुत्वमिष्टमिति चेद्धन्त सर्वशब्दासाधुत्वम्; साध्वसाधुविवेकाभावे च कृतं वेदान्तैस्सा-ङ्गोपाङ्गैर्वेदैः । मुख्यार्थशून्यस्य तन्मूलवृत्त्यन्तरे लिङ्गत्वे चासम्भवति कथं क्वचिद्बोधकत्वमपि? न च साङ्केतिकोऽयमपभ्रंशो वा; येन वाच-कत्वाभिमानाद्बोधकत्वं स्यात् ।

**End:**

न चासौ विभ्रम इति शङ्कितुमपि शक्यम्; सकलवेदशाखाप्रवर्त-नाधिकृतत्वात्, क्वचिदपि प्रमाणविरुद्धार्थादर्शनात्, परिग्रहातिशयाच्च ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अतस्तदुक्तेषु सूत्रेषु यत्र कचित्प्रमाणविसंवादे यथाकथञ्चित्समाधातव्यम् । न चास्ति विसंवाद इति दर्शितमिति ॥

**Colophon:**

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु शतदूषण्यामद्वैतिमते सूत्रस्वारस्यभङ्गवादष्षट्षष्टितमः ॥

---

## No. 5038. शतदूषणी.
## ŚATADŪṢAṆĪ.

Substance, palm-leaf. Size, 17 × 1⅜ inches. Pages, 250. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains the Bhaṅgas 24 to 38.

Complete.

Same work as the above.

---

## No. 5039. शतदूषणी.
## ŚATADŪṢAṆĪ.

Substance, palm-leaf. Size, 16¼ × 1¾ inches. Pages, 136. Lines, 5 on a page. Character, Telugu. Condition, much injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is Śrīraṅgarājastavavyākhyā 79*a*.

There are many omissions in this manuscript. It commences with the 3rd Bhaṅga and breaks off in the 54th Bhaṅga.

Same work as the above.

---

## No. 5040. शतदूषणी.
## ŚATADŪṢAṆĪ.

Substance, palm-leaf. Size, 19¼ × 1¾ inches. Pages, 338. Lines, 10 on a page. Character, Grantha. Condition, good. Appearance, new.

66 Bhaṅgas complete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5041. शतदूषणीव्याख्यानम्–चण्डमारुतः.

## ŚATADŪṢAṆĪVYĀKHYĀNAM : CAṆḌAMĀRUTAḤ.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 221. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Contains Skandhas 1 to 15 complete.

Four leaves are wanting in the beginning.

A commentary on the Śatadūṣaṇī of Vēdāntācārya : by Rāmānujadāsa *alias* Mahācārya, a disciple of Śrīnivāsārya of the Vādhūlagōtra.

**Beginning :**

रुचकाकृतिमुपमृद्य स्वस्तिकाः क्रियन्ते । पुनरावृत्तस्वर्णपिण्डः खदिराङ्गारसवर्णे कुण्डले भवतः । आकृतिरन्या चान्या च भवति द्रव्यं पुनस्तदेव ; आकृत्युपमर्देन द्रव्यमेवावशिष्यत इत्यादिना संस्थानस्यानित्यत्वेपि द्रव्यस्य स्वरूपतो नित्यत्वप्रतिपादनात् । मतभेदेऽपि तदपि नित्यत्वमनुशासननिमित्तमिति प्रतीयते ।

* * * *

**Colophon :**

इति श्रीवाधूलकुलतिलकश्रीनिवासार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन तदेकदे(द)वतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्धमहाचार्यपरनामधेयेन रामानुजदासेन विरचितायां शतदूषणीव्याख्यायां चण्डमारुताख्यायां ब्रह्मशब्दप्रवृत्तिनिरूपणं नाम प्रथमस्कन्धः ॥

See under the next number for the end.

---

## No. 5042. शतदूषणीव्याख्यानम्–चण्डमारुतः.

## ŚATADŪṢAṆĪVYĀKHYĀNAM : CAṆḌAMĀRUTAḤ.

Substance, paper. Size, $13\frac{1}{4} \times 8\frac{1}{2}$ inches. Pages, 366. Lines, 30 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains Bhaṅgas 33 to 53.

Same work as the above.

See under the previous number for the beginning.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End :**

न च यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात् इत्यनुषज्यते, तस्योपपादकं वाचारम्भणमितीति वाच्यम्; अनुषङ्गस्यैव दोषत्वात्। अनुषङ्गेऽपि पिण्डमणिपदानन्वयाच्च नखनिकृन्तनेन कार्ष्णायसमित्येतदत्यन्तासङ्गतम्। तस्माच्छ्रुत्यैव सर्ववादिनो निरस्ताः ॥

श्रुत्यैवैवं समस्ताश्च निरस्ताः प्रतिवादिनः।
तथैव हृदयं सम्यग्बोधिता मम देशिकाः ॥

एवं माध्वमते सूत्रव्याघातोऽपि स्पष्टः ॥

**Colophon :**

श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपादसेवासमधिगतपरावरतत्त्वयाथात्म्येन तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्धमहाचार्यापरनामधेयेन रामानुजदासेन विरचितायां शतदूषणीव्याख्यायां चण्डमारुताख्यायां ब्रह्मोपादानत्वान्यथानुपपत्तिभङ्गस्त्रिपञ्चाशस्कन्धः ॥

यत्प्रपत्तिं विनेति। अनेन भगवत्प्रसादैकनिवर्त्यतया ज्ञाननिवर्त्यत्वाभावप्रतीतेर्जगदुपादानस्य मिथ्यात्वाभावसिद्ध्या वादार्थस्सङ्गृहीतः। मायां त्विति। प्रकृतिशब्दे जगदुपादानं निर्दिश्य तस्य मायाशब्देन मिथ्यात्वं विधीयत इति भावः.

---

## No. 5043. शतदूषणीव्याख्या—नृसिंहराजीया.

## ŚATADŪṢAṆĪVYĀKHYĀ : NṚSIṀHARĀJĪYĀ.

Substance, palm-leaf. Size, $18\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 268. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Bhaṅgas 4 to 38. Some leaves are lost in the codex.

A commentary on the Śatadūṣaṇī : by Nṛsiṁharāja.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

दनमिति वाच्यम् । चोदनाद्यविशेषादित्यादिशब्दसंयोगरूपा चोदनाख्याविशेषादिप[ा]रापेक्षत्वादेकमिति साध्यानिर्देशश्च तन्नायोवजव(न्मायोपजन)नेन तत्साध्यलाभादेव । तथा गुणश्चापूर्वसंयोगे वाक्ययोस्समत्वादित्यधिकरणव्युत्पादितो गुणाद्भेदो.

* * • *

**Colophon:**

इति शतदूषणीव्याख्यायां चतुर्थः ॥

**End:**

न चेत्कार्येषु भूतेषु वर्तमानो विधिः कथम् ।
कर्माद्युपाध्यभावेऽपि मुक्तादीनां प्रवर्तते ॥
इच्छासङ्कल्पदेहादिरीश्वरेच्छाविशेषतः ।
शे(स्वीये)च्छायास्तु वैषम्यं व्यु(व्य)ष्टौ(क)र्मविशेषतः ॥
समष्टौ गुणवैषम्यात् . . . . . . ।

---

No. **5044.** शतदूषणीव्याख्या—सहस्रकिरणी.

ŚATADŪṢAṆĪVYĀKHYĀ: SAHASRAKIRAṆĪ.

Substance, paper. Size, 12 × 9⅞ inches. Pages, 181. Lines, 21 on a page. Character, Telugu. Condition, good. Appearance, new.

Wants beginning.

A different commentary on the Śatadūṣaṇī: by Śrīnivāsācārya.

**Beginning:**

त्विरूपदोषतादवस्थ्यात् । एवं प्रातिभासिकत्वस्य ब्रह्मज्ञानेतरध्वा.(ज्ञा)नध्वंसप्रतियोगित्वरूपत्वे उत्तरज्ञाननाश्यपूर्वज्ञानतदभावव्यक्त्योस्त्वन्मतरीत्या स्वसमानाधिकरणस्वान्यूनसत्ताकपरस्परात्मकाभावप्रतियोगित्वज्ञानदशायां मिथ्यात्वव्यवहारानापत्तिः ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

वस्तुगत्या तादृशज्ञानविशेष्यं तु तज्जनकप्रमाणानुरोधेन प्रपञ्चो वा ब्रह्म वा उभयदा(था)पि न किञ्चिद्बाधकमित्याशयः ; तद्व्यतिरेकस्साध्यत इत्यत्रापि सामान्यत इत्यनुषज्यते । समान्यतस्तद्व्यतिरेकस्सामान्यस्सत्यभेदः । सत्य.

---

## No. 5045. शरीरवादः.

## ŚARĪRAVĀDAḤ.

Pages, 24. Lines, 7 on a page.

Begins on fol. 19*a* of the MS. described under No. 5000.

Complete.

An unfavourable criticism of the theory of the Naiyāyika school that the soul becomes possessed of the perceptive faculty only when in association with the body; by Anantārya, of the Śēṣārya family and a resident of Yādavādri.

**Beginning:**

श्रीकान्तकान्तपदपङ्कजसौरभश्रीपारीणचित्तनिभषट्चरणः प्रवीणः ।
श्रीलक्ष्मणार्यमभिवन्द्य शरीरवादं सारार्थसङ्गतमनन्तसुधीर्विधत्ते ॥

इह तावच्छरीरशब्दप्रवृत्तिनिमित्तं विचार्यते—शरीरपदप्रवृत्तिनिमित्तभूतं शरीरत्वं हि न तावज्जातिः; तत्साधकप्रमाणाभावात् । न चेदं शरीरमिदं शरीरमित्यनुगतप्रतीतिरेव तत्साधिका, अनुगतप्रतीतेर्बाधकविरहे जातिसाधकत्वादिति वाच्यम् ; सिद्धान्तेऽनुगतप्रतीतेस्संस्थानविषयकत्वेन तदतिरिक्तजातिसाधकत्वासम्भवात् ।

**End:**

नैयायिकादिनये उत्क्रान्त्यादिकाले शरीराभावेन निष्क्रामतीत्यादिना रथो गच्छतीत्यादाविव क्रियाश्रयत्वस्यैव बोधावश्यकतया क्रियावत्त्वरूपहेतोरात्मनि सिद्धेरिति सूत्राद्यभिप्रायात् । अधिकमन्यत्र विवेचितम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति शरीरवादः ॥

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

---

## No. 5046. शारीरकशास्त्रदीपिका.

## ŚĀRĪRAKAŚĀSTRADĪPIKĀ.

Substance, paper. Size, 13 × 8⅜ inches. Pages, 337. Lines, 27 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins in the 1st Adhyāya and breaks off in the 4th Pāda of the 4th Adhyāya.

An explanatory commentary on the important Viṣayavākyas of the Brahmasūtras: by Raṅgarāmānujamuni.

**Beginning:**

अतसीगुच्छसच्छायमञ्चितोरस्स्थलं श्रियम्(या) ।
अञ्जनाचलशृङ्गा(र)मञ्जलिर्मम गाहताम् ॥

परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् नास्त्यकृतः कृतेन ।
तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥

तस्मै स विद्वानुपहिता(सन्ना)य सम्यक् प्रशान्तचित्ताय शमान्विताय ।
येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम् ॥

(व्या)—

अस्मिन् वाक्ये परब्रह्मप्राप्तिसाधनज्ञानेच्छोः न्यायसिद्धानुवादेन गुरूपसदनं विधीयते । कर्मचितान् कर्मसञ्चितान् कर्मसम्पाद्यान् । लोकान् फलानि । परीक्ष्य मीमांसान्यायैर्निर्धार्य । ब्राह्मणः अधीतसाङ्गसशिरस्कवेदः । य इत्यध्याहार्यः । स इत्युत्तरत्र श्रवणात् ।

* * * *



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति शारीरकशास्त्रदीपिकायां चतुर्थस्याध्यायस्य तृतीयः पादः ॥

**End:**

एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यन्तीतिश्रुतिभ्यामाविष्कृतत्वात् । न विनश्यति न पश्यतीत्यर्थः । मुक्तस्य मनसैवैतान् कामान् पश्यन् रमत इति सार्वज्ञ्यस्य आविष्कृतत्वाच्च धर्मभूतज्ञानव्याप्तौ न किञ्चिद्बाधकम्.

---

## No. 5047. शारीरकशास्त्रार्थसङ्ग्रहः.

## ŚĀRĪRAKAŚĀSTRĀRTHASAṄGRAHAḤ.

Substance, paper. Size, 12 × 9½ inches. Pages, 210. Lines, 7 on a page. Character, Dēvanāgarī and Telugu. Condition, good. Appearance, new.

Complete.

A brief summary of Rāmānuja's commentary on the Brahma-sūtras.

**Beginning:**

श्रीश्रीनिवासगुरुवर्यकटाक्षलब्धजन्मात्ममन्त्रनिगमान्तयुगार्थतत्त्वम् ।
रामानुजार्यकृपया परिवृद्धबोधं श्रीशैलशेषवरदार्यगुरुं प्रपद्ये ॥

ब्रह्मसूत्रविवेकार्थाः प्रवृत्ता भाष्यकृद्गिरः ।
तत्र सूत्रक्रम(ा)र्थादेस्सङ्ग्रहो लिख्यते मया ॥

अथातो ब्रह्मजिज्ञासा ।

अत्राथशब्द आनन्तर्ये भवति । अतश्शब्दो वृत्तस्य हेतुभावे । यदनन्तरमित्यपेक्षायां कर्मविचारानन्तरम् । अतः कर्मविचारस्य वृत्तत्वाद्धेतोः ब्रह्मजिज्ञासा क्रियत इत्यन्वयः । ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा । ब्रह्मण इति कर्मणि षष्ठी । कर्तृकर्मणोः कृतीति विशेषविधानात् । यद्यपि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सम्बन्धसामान्यपरिग्रहेऽपि जिज्ञासायाः कर्मापेक्षत्वेन कर्मार्थित्वसिद्धिः, तथाप्याक्षेपतः प्राप्तादप्याभिधानिकस्यैव ग्राह्यत्वात् कर्मणि षष्ठी गृह्यते ।

**End:**

यदि परमपुरुषायत्तं मुक्तैश्वर्यम्, तर्हि तस्य स्वतन्त्रत्वेन तत्सङ्कल्पान्मुक्तस्य पुनरावृत्तिसम्भवाशङ्केत्यत्राह—

अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् ।

यथा निखिलहेयप्रत्यनीककल्याणगुणैकतानो जगज्जन्मादिकारणं समस्तवस्तुविलक्षणस्सर्वज्ञस्सत्यसङ्कल्प आश्रितवात्सल्यैकजलधिः

* * * *

स्वयाथात्म्यानुरूपानवधिकातिशयानन्दं प्रापय्य पुनर्नावर्तयतीत्यपि शब्दादेवावगम्यते ।

* * * *

य एवमाह—

"प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ।
उदारास्सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ॥

आस्थितस्स हि युक्तात्मा मामेवानुत्तमां गतिम् ।
बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ॥

वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः ।" इति ॥
सूत्राभ्यासश्शास्त्रपरिसमाप्तिं द्योतयति ॥

इति सर्वं समञ्जसम् ॥

**Colophon;**

इति शारीरकसूत्रार्थसङ्ग्रहे चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

समाप्तश्चाध्यायः ॥

शास्त्रं च परिसमाप्तम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5048. शास्त्रारम्भसमर्थनम्.
## ŚĀSTRĀRAMBHASAMARTHANAM.

Substance, palm-leaf. Size, $16\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 113. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 16*a*. The other works herein are Kuraṅgīpañcaka 1*a*, Kucapañcaka 1*b*, Kūrēśavijñāpana 2*a*, Kapyāsaśrutyartha 3*a*, Cātuślōka 5*a*.

Incomplete.

On the need and importance of the study of the Vēdāntaśāstra: by Anantācārya, of the Śēṣārya family, a resident of Yādavādri.

**Beginning:**

हेतवे सर्वजगतां हेयपापाब्धिसेतवे ।
शान्ताय यादवगिरौ कान्तायास्तु नमः श्रियः ॥
श्रीमद्रामानुजार्यं श्रुतिशिखरशिखाधर्विमेधाविलासैः
प्रोद्यद्व्याहारशम्भैर्विदळितकुमताडम्बरं तं भजामि ।
यद्भाष्याम्भोधिगर्जत्प्रसृमरसुमहायुक्तिवीचीविहारा
वेलान्ते विक्षिपन्ति प्रतिकथकघटादूषणाळीतृणानि ॥
नत्वा पूर्वगुरूणां सरणिं शेषार्यवंशवार्धीन्दुः ।
शास्त्रारम्भविचारं तनुते कुतुकादनन्तार्यः ॥

शास्त्रारम्भार्था चतुस्सूत्रीति सिद्धान्तः । अत्र शास्त्रशब्देन मीमांसाशास्त्रैकदेशरूपशारीरकमीमांसा विवक्षिता । तेन चतुस्सूत्र्या विंशातिलक्षणीपूर्वत्वाभावेन विशिष्टशास्त्रारम्भार्थत्वासम्भवेऽपि न क्षतिः । तत्रापि ईक्षतेर्नाशब्दमित्यादिकमेव विवक्षितम् । तेन चतुस्सूत्रीजन्यज्ञानस्य चतुस्सूत्रीविषयकप्रवृत्तिसाध्यस्य तत्र प्रवर्तकत्वाङ्गीकारेऽन्योन्याश्रयापत्तावपि न क्षतिः । आरम्भशब्देन प्रवृत्तिसामान्यं विवाक्षितम् । न त्वाद्यप्रवृत्तिः ।

See under the next number for the end.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5049. शास्त्रारम्भसमर्थनम्.

## ŚĀSTRĀRAMBHASAMARTHANAM.

Substance, palm-leaf. Size, 16⅜ × 1⅜ inches. Pages, 39. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Incomplete.

Same work as the above.

See under the previous number for the beginning.

**End:**

कालसम्बन्धित्वघटितहेतुत्वं तस्या नोपपद्यत इति भाव इत्याहुः । तस्मान्निष्प्रपञ्चीकरणनियोगवादस्यायुक्तत्वात् तादृशकार्यान्विततया वेदान्तानां ब्रह्मणि प्रामाण्यमिति न युक्तमित्यादिकमन्यत्र प्रपञ्चितमिति दिक् ॥

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

**Colophon:**

इति शेषार्यवंशमुक्ताफलस्य यादवाद्रिनिवासरसिकस्य अनन्ताचार्यस्य कृतिषु शास्त्रारम्भसमर्थनवादस्समाप्तः ॥

---

## No. 5050. शास्त्रारम्भसमर्थनम्.

## ŚĀSTRĀRAMBHASAMARTHANAM.

Substance, palm-leaf. Size, 16 × 1½ inches. Pages, 90. Lines, 9 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Incomplete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **5051.** शास्त्रैक्यवादः.

ŚĀSTRAIKYAVĀDAḤ.

Substance, palm-leaf. Size, $13\frac{3}{8} \times 1\frac{1}{8}$ inches. Pages, 32. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Complete.

Establishes the oneness of the Pūrvamīmāṁsā and the Uttaramīmāṁsā as a Śāstra : by Anantācārya.

**Beginning :**

निखिलभुवनहेतुं नित्यसेतुं भवाब्धेः
मुररिपुमभिवन्द्य श्रीयतीन्द्रं च नत्वा ।
परिचितगुरुवाराधी(गाशी)रनन्तार्यवर्यः
प्रथितविमलयुक्तिं वक्ति शास्त्रैक्यवादम् ॥

पूर्वोत्तरमीमांसयोरैकशास्त्र्यमिति तावत्सम्प्रदायः । ऐकशास्त्र्यं चैकग्रन्थत्वमेकवाक्यतापर्य(व)सितम् । तच्च साकाङ्क्षत्वे सत्येकार्थप्रतिपत्तिपरत्वम् । तथा च जैमिनिसूत्रम्—अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात् इति । तदुत्थाप्याकाङ्क्षानिवर्तकत्वतन्निवर्तनीयाकाङ्क्षोत्थापकत्वान्यतररूपवत्त्वमेव तत्साकाङ्क्षत्वम् ।

**End :**

तद्धर्मावच्छिन्नविशेष्यकप्रतियोगिप्रकारकज्ञानोत्पत्तिदर्शनादित्यर्थः । तस्मादुक्तरीत्या वाक्यजन्यज्ञानस्य हेतुत्वासम्भवात् कर्माङ्गकस्योपासनस्यैव मोक्षहेतुत्वेन ब्रह्मकाण्डप्रतिपाद्योपासनाङ्गभूतकर्मप्रतिपादकत्वात् कर्मकाण्डस्य ब्रह्मकाण्डेनैकशास्त्र्यं सिध्यतीति दिक् ॥

**Colophon :**

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5052. श्रीभाष्याद्यन्तभागः.

## ŚRĪBHĀṢYĀDYANTABHĀGAḤ.

**Pages**, 12. Lines, 6 on a page.

Begins on fol. 31*a* of the MS. described under No. 2853.

Complete.

Contains the beginning and the end of the Śrī-bhāṣya.

**Beginning :**

अखिलभुवनजन्मस्थेमभङ्गादिलीले
विनतविविधभूतव्रातरक्षैकदीक्षे ।
श्रुतिशिरसि विदीप्ते ब्रह्मणि श्रीनिवासे
भवतु मम परस्मिन् शेमुषी भक्तिरूपा ॥

* * * *

भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्वाचार्यास्संचिक्षिपुः ॥

**End :**

वासुदेवस्सर्वमिति स महात्मा सुदुर्लभः ॥ इति सूत्राभ्यासश्शास्त्रपरिसमाप्तिं द्योतयतीति सर्वं समञ्जसम् ॥

**Colophon :**

इति भगवद्रामानुजविरचिते शारीरकमीमांसाभाष्ये चतुर्थस्याध्यायस्य चतुर्थः पादः ॥ अध्यायश्च समाप्तः ॥ शास्त्रं च परिसमाप्तम् ॥

---

## No. 5053. श्रुत्यर्थनिर्णयः.

## ŚRUTYARTHANIRṆAYAḤ.

**Pages**, 194. Lines, 27 on a page.

Begins on fol. 73*a* of the MS. described under No. 4994.

Complete.

A treatise on Viśiṣṭādvaita-Vēdānta pointing out that **Nārāyaṇa** is according to the Śrutis the Supreme Brahman.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

श्रीमान्नारायणोऽशेषजगज्जन्मादिकारणम् ।
अन्तरात्मा शिवादीनामव्यादव्याजवत्सलः ॥
प्रमाणं लोकानां प्रणयपदमप्राकृतगिरां
परं वक्षश्श्यामापरिणतपयोराशिसुकृतम् ।
. . . . . . . तेजःकलिकमरुणाम्भोजनयनं
मनो मेघश्यामं यदुशिखरिधाम प्रणमति ॥
नारायणः परं ब्रह्म न ब्रह्मा न च शङ्करः ।
शास्ता जनानां सर्वात्मा ततो ज्यायांश्च पूरुषः ॥

तथाहि—

तद्विज्ञानार्थमिति वाक्ये विधीयते गुरूपसत्तिनियमो ब्रह्मज्ञानाय । तत्र हि अक्षरं पुरुषं वेदेत्यत्र वेद्यस्य वस्तुनः नारायणत्वं पुरुषपद-श्रुत्यावधारितम् ।

**End:**

तस्मान्मनुव्यासप्राचेतसपरमर्षिवचनशतोपबृंहितसर्वश्रुत्यैकरस्यात् सर्व-स्मात् सर्वकारणं सर्वान्तर्याम्यनन्यनियाम्यमपहतपाप्मत्वा(द्य)नन्तकल्याण-गुणाकरं परं ज्योतिः परं तत्त्वं परमात्मा परं ब्रह्म श्रीमान्नारायण एव अनन्तास्थिरफलप्रेप्सुभिः प्रतिबुद्धैरुपास्य इति सिद्धम् ॥

**Colophon:**

श्रुत्यर्थनिर्णयस्समाप्तः ॥

---

## No. 5054. षष्ठ्यर्थनिर्णयः.

## ṢAṢṬHYARTHANIRṆAYAḤ.

Pages, 44. Lines, 7 on a page.

Begins on fol. 6*b* of the MS. described under No. 4869.

Complete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



An investigation into the meaning of the elided genitive termination of Brahman in the word Brahmajijñāsā as found in the very first aphorism of the Brahmasūtras.

**Beginning:**

लक्ष्मीचरणलाक्षैकलक्षणं शुभवीक्षणम् ।
शेषक्षितिधराध्यक्षमम्बुजाक्षमुमास्महे ॥
जिज्ञासादर्पणे चोक्तो जिज्ञासार्थविनिर्णयः ।
षष्ठीदर्पणमादाय कुर्वे षष्ठ्यर्थनिर्णयम् ॥

इह तावत् ब्रह्मजिज्ञासेत्यत्र ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासेति षष्ठीसमासो भाष्ये दर्शितः । तत्र नेयं सम्बन्धसामान्ये षष्ठी किन्तु कर्तृकर्मणोः कृतीति कृद्योगविहिता षष्ठी । न च विनिगमनाविरहः आभिधिककर्मत्वप्रतिपत्तिमपेक्ष्याक्षेपककर्मत्वप्रतिपत्तेः जघन्यत्वात् । विशेषविषया सामान्यविधेर्बाधाच्च । तथाच श्रीमद्भाष्यम् ।

**End:**

अतस्तदविषये वैदिकीं प्रवृत्तिमुपजीव्य प्रवर्तमाना वैदिकाश्च . . . . ति यथा शास्त्रीययणादिकार्यवर्जितोऽपि वर्णनिर्देशो नापराध्यति तेन विना तदनिष्पत्तेस्तद्वदिहापीति सर्वमवदातम् ॥

---

No. **5055.** षष्ठ्यर्थनिर्णयः.

ṢAṢṬHYARTHANIRṆAYAḤ.

Pages, 33. Lines, 6 on a page.

Begins on fol. 37*a* of the MS. described under **No.** 4929.

Incomplete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5056. संविदेकत्वानुमाननिरासवादार्थः.

## SAṀVIDĒKATVĀNUMĀNANIRĀSAVĀDĀRTHAḤ.

**Pages, 18. Lines, 7 on a page.**

Begins on fol. 16*a* of the MS. described under No. 4974.

Complete.

An unfavourable criticism of the logical reasoning adopted by the Advaitins to establish the oneness of the principle of consciousness.

By Anantārya of Śēṣārya family.

**Beginning:**

श्रीमद्यादवशैलशृङ्गनिलयं नारायणं श्रीपतिं
श्रीमन्तं यतिनां पतिं च निखिलश्रुत्यन्तमन्थाचलम् ।
वन्दित्वा विशदीकरोति कुतुकाच्छ्रीभाष्यलेशाशयं
श्रुत्वानन्तसुधीर्गुरोर्वदनतश्शेषार्यवंशोद्भवः ॥

महासिद्धान्ते तावन्नानात्वनिरासकानुमानस्य प्रतिक्षेपकाणि श्रीभाष्याक्षराणि दृश्यन्ते । तद्व्याख्यानायेदमारभ्यते । अत्राद्वैतिनो वदन्ति—पदार्थो द्विविधः—दृग् दृश्यश्चेति ।

**End:**

एकस्या एव प्रकृतेरवस्थाभेदेन महदहङ्कारादिभेदस्य स्वाभाविकतावत् धर्मभूतज्ञानस्यापि अवस्थाभेदेन घटपटज्ञानादिभेदस्य स्वाभाविकत्वोपपत्तेरिति ॥

**Colophon:**

इति श्रीशेषकुलतिलकस्यानन्तार्यस्य कृतिषु संविदेकत्वानुमाननिरासवादः ॥

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5057. सद्विद्याविजयः.

## SADVIDYĀVIJAYAḤ.

Substance, paper. Size, 10¾ × 8¾ inches. Pages, 206. Lines, 16 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Complete.

This work denies and disproves the existence of an entity called Avidyā: by Rāmānujadāsa *alias* Mahācārya. The subjects treated herein are—

अविद्याश्रयभङ्गः. अविद्यानिवर्तकभङ्गः.
अविद्यालक्षणभङ्गः. अविद्यानिवृत्तिभङ्गः.
अविद्याप्रकाशभङ्गः.

**Beginning:**

वाधूलश्रीनिवासार्यतनयं विनयाधिकम् ।
प्रज्ञानिधिं प्रपद्येऽहं श्रीनिवासमहागुरुम् ॥

वेद्यता [ब्रह्मविद्या] ब्रह्मविद्याभिर्हरेरिति निरूपितम् ।
तेन तत्रैव जिज्ञासा सद्विद्या लक्ष्यशोधिनी ॥

उक्तं भगवतस्सर्वविद्यावेद्यत्वम् । अतस्स एव जिज्ञास्यः । जिज्ञास्यलक्षणमुक्तम्—यतो वा इमानीति । तत्र च जगत्कारणत्वं लक्षणमभिसंहितम् । तच्च सद्विद्यायां प्रतिपन्नम् । तत्र चोपोद्घातेन प्रथमखण्डेन पितापुत्राख्यायिकया प्रतिपिपादयिषितार्थोऽवतार्यते । अनन्तरं षड्भिः खण्डैः प्रतिपिपादयिषितार्थः प्रतिपाद्यते । अनन्तरञ्च नवभिः स एवार्थः स्थाप्यते । केन सिद्धोऽयं विभागः ? उच्यते—सद्विद्यान्त इव सप्तमखण्डेऽपि तद्धास्य विजज्ञाविति विजज्ञाविति पित्रा पुत्रस्योत्पिपादयिषितं ज्ञानं सम्यगेव निर्वृत्तमिति ह्यवगम्यते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

न च ब्रह्मस्वरूपमनादितस्संसाराविनाभूतं कस्यापि विरोधीति वक्तुं शक्यम् । अन्त्ये कथं चोद्यस्य परिहार इति यदुक्तं निवृत्तेरतिरिक्त-भावविकारत्वान्न चिरनिवृत्तेऽपि घटे निवर्तेत इति व्यवहारप्रसङ्ग इति तन्न; धात्वर्थविशिष्टे कर्तरि धात्वर्थरूपफलोपहिते व्यापारे वर्तमान-त्वाद्यन्वयादिति ॥

इति सद्विद्याविजयेऽविद्यानिवृत्तिभङ्गः ॥

**Colophon:**

इति श्रीवाधूलकुलतिलकश्रीनिवासाचार्यपदसेवासमधिगतपरावरतत्त्व-याथात्म्येन तदेकदैवतेन तच्चरणपरिचरणपरायणेन तत्प्रसादलब्धमहा-चार्यापरनामधेयेन रामानुजदासेन विरचिते वेदान्तविजये सद्विद्याविजयो नाम तृतीयः ॥

---

## No. 5058. सद्विद्याविजयः.

## ṢADVIDYĀVIJAYAḤ.

Substance, palm-leaf. Size, 16⅜ × 1¼ inches. Pages, 140. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Same work as the above.

---

## No. 5059. समासवादः.

## SAMĀSAVĀDAḤ.

Pages, 36. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 5000.

Complete.

On the significance of the grammatical composition in the compound word Brahmajijñāsā: by Anantārya of the Śēṣāryavaṁśa.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

मुररिपुचरणसरोजे नत्वा स्तुत्वा च लक्ष्मणमुनीन्द्रम् ।
तनुते समासवादं विशदं कुतुकादनन्तार्यः ॥

इह तावदाद्यसूत्रघटकीभूतस्य ब्रह्मजिज्ञासेतिसमासस्य प्रतिपाद्यार्थो विशदीक्रियते—

तत्र ब्रह्मजिज्ञासेति समासस्थले ब्रह्मपदस्य ब्रह्मविषयके लक्षणामभ्युपगम्य नि(र्वाह)पक्ष एकः, लक्षणाया अभावेऽपि लुप्तषष्ठीविभक्तिस्मरणमभ्युपगम्य, विषयविषयिभावस्य संसर्गतया भानमभ्युपेत्य, समासे शक्तिमभ्युपेत्य वा निर्वाहपक्षास्त्रयः । एतत्पक्षचतुष्टयमपि श्रुतप्रकाशिकायां स्थितम् । तत्र कस्मिन्पक्षे भाष्यादिस्वारस्यं, कस्मिंश्च पक्षे नेत्ययमंशो विवेचनीयः ।

**End:**

नन्वेवं ब्रह्मजिज्ञासेत्यादौ सनर्थप्रकारकधात्वर्थविशेष्यकबोधव्यवस्थापनमिच्छाया इष्यमाणप्रधानत्वादिति भाष्यस्य इष्यमाणधात्वर्थप्रधानकत्वात् धात्वर्थविशेष्यकत्वादित्यर्थकथनं च दर्पणकृतां विरुध्यत इति चेत् न; पूर्वं सनर्थविशेष्यतापक्षं प्रतिपाद्य तदनन्तरं धात्वर्थविशेष्यतापक्षस्य प्रतिपादनेन प्रथमकल्प एव तेषां निर्भराङ्गीकारादिति सर्वमवदातम् ॥

शेषार्यवंशरत्नेन यादवाद्रिनिवासिना ।
अनन्तार्येण रचितो वादार्थोऽयं विजृम्भताम् ॥

---

## No. 5060. सामानाधिकरण्यवादः.
## SĀMĀNĀDHIKARAṆYAVĀDAḤ.

Substance, palm-leaf. Size, 15⅝ × 1¼ inches. Pages, 72. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Śāmānādhikaraṇyavādaṭippaṇī 36*b*.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



By Anantācārya.

A discussion on the nature and the significance of grammatical equations wherein words having the same number, gender, and case are made to be syntactically in concord.

**Beginning:**

श्रीमद्यादवभूधराङ्कणलसन्मन्दारमिन्दीवर-
श्रेणीकान्तिझरीपरीतवपुषं निध्याय नारायणम् ।
श्रीरामानुजसूचितश्रुतिशिखासिद्धान्तबद्धादरः
सामानाधिकरण्यसद्मनिकां प्रथात्यनन्तस्सुधीः ॥

इह खलु सर्वं खल्विदं ब्रह्म अयमात्मा ब्रह्म तत्त्वमसीत्यादिसमानाधिकरणपदघटितवाक्यार्थो विचार्यते । तत्पदप्रयोज्यविशेष्यताविशिष्टाभेदसंबन्धावच्छिन्नप्रकारताप्रयोजकत्वं तेन समं सामानाधिकरण्यम्.

**End:**

नन्वेवं छन्दोऽभिधानादित्यत्रापि तच्छरीरकपरमात्मपरत्वेन मुख्यत्वसम्भवात् गौणपरत्वाश्रयणं व्यर्थमिति चेन्न; चतुष्पदा षड्विधेति चतुष्पात्त्वषड्विधत्वकीर्तनावैयर्थ्याय तत्साहश्येन गौणवृत्तेरेव तत्राश्रयणादिति दिक् ॥

**Colophon:**

इति सामानाधिकरण्यवादः ॥

---

No. **5061.** सामानाधिकरण्यवादटिप्पणी.

SĀMĀNĀDHIKARAṆYAVĀDAṬIPPAṆĪ.

**Pages**, 18. Lines, 5 on a page.

Begins on fol. 36*b* of the MS. described under No. 5060.

Incomplete.

A brief commentary on the Sāmānādhikaraṇyavāda.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

सम्बोधनान्तपदप्रयोज्यविषयताव्यापकविषयताप्रयोजकत्वस्यैव युष्मच्छब्दे सम्बोधनान्तपदसमानार्थकत्वरूपत्वात् चैत्र त्वं पचसीत्यादौ चैत्र त्वत्पितेत्यादिसमासस्थले तत्त्वमसीत्यादौ च उक्तनियमनिर्वाहात् तत्प्रयोज्यविषयता(स)मनियतविषयताप्रयोजकत्वस्यैव तत्समानार्थकत्वरूपत्वे चैत्र त्वत्पितेत्यादिसमासस्थले तादृशनियमस्य व्यभिचारापत्तेः ।

**End:**

वस्तुतो जलादिनिरूपिताधेयतया वह्नेस्सेककरणत्वे भानदशायां सेककरणत्वनिष्ठविषयतानिरूपितसांसर्गिकविषयताश्रयजलनिरूपिताधेयत्वीयप्रतियोगित्वानुयोगित्वान्यतरवत्त्वस्य वह्नौ बाधात्.

---

## No. 5062. सारार्थचतुष्टयम्.

## SĀRĀRTHACATUṢṬAYAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 102*a* of the MS. described under No. 4898.

Complete.

This is a work on Viśiṣṭādvaita-Vēdānta: by **Varadārya, a** nephew of Rāmānujārya.

The subjects treated herein are—

1. Svarūpajñāna.
2. Virōdhijñāna.
3. Śēṣatvajñāna.
4. Phalajñāna.

**Beginning:**

वरदाचार्यमुद्दिश्य विष्णुचित्तोऽब्रवीन्मतम् ।
प्राचामाचार्यवर्याणां यतीन्द्रपदसेविनाम् ॥
उपदेशार्हतां यातास्तेषां धारकपोषकाः ।
अर्थास्सन्त्यष्ट(ध)ा भिन्ना हृदये चिन्तितास्सदा ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वरूपं च विरोधी च फलश्चोपायसम्मितम् ।
याथात्म्येनापि चैतेषामित्येषां बुद्ध्योऽष्टधा ॥
नित्यं बाह्यदळीकुर्वन् ज्ञानमानन्दरूपकम् ।
श्रीशानन्यार्हशेषत्वं स्वरूपं केवलं मम ॥
इत्येवमनुसन्धानं स्वरूपं ज्ञानमीरितम् ।
अनन्यार्हं हि शेषत्वमवाच्यस्य श्रुतं पुरा ॥

**End:**

नारायणपदेनैष नमसा चार्थ उच्यते ॥
समन्वयाविरोधिभ्यां फलं तस्य च साधनम् ।
वदद्भिरंशैर्भाष्यस्य व्यज्यन्तेऽर्था अमी स्फुटम् ॥

**Colophon:**

इति वात्सल्यगुरुणा वरदार्येण वाग्मिना ।
रामानुजार्यस्वस्रीयपौत्रेणार्थाः प्रकाशिताः ॥
इति सारार्थचतुष्ट(यं) सम्पूर्णम् ॥

---

No. **5063.** सिद्धान्तरत्नावलिः.

SIDDHĀNTARATNĀVALIḤ.

Pages, 144. Lines, 27 on a page.

Begins on fol. 1a of the MS. described under No. 4994.

First Paricchēda complete.

On the accepted conclusions of the Viśiṣṭādvaita-Vēdānta.

By Vēṅkaṭācārya, a disciple of Vēṅkaṭa-Dēśika and son of Tātācārya.

**Beginning:**

वज्रध्वजाङ्कुश(रथाङ्ग)सरोजमुख्यसाम्राज्यचिह्नलसिते निजहस्तपद्मे ।
अध्यक्षयन् जगत ईश्वरतामभीतिमुद्राञ्चिते दिशतु रङ्गपतिर्मुदं नः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चूडालङ्कृतिविभ्रमं कलयते वाणी पुराणी यया
भोग्यत्वं विबुधव्रजस्य भजति श्रीरङ्गचन्द्रो यतः ।
आलोको न चिरेण मन्थरतरं यस्या निरुन्धे तम-
स्सा मे चन्द्रकला तनोतु कुतुकं श्रीरङ्गशृङ्गारिणी ॥

श्रुतिशिखररहस्यव्याक्रियाकर्मनर्मवृष(प्रवि)मलशशिबिम्बस्निग्धदिव्याङ्गका[न्ति ।
अखिलचिदचिदन्तर्यामि भेदैकवेद्यं हयवदनमुदारं ब्रह्म मे सन्निधत्ताम् ॥

पराङ्कुशपदाम्भोजद्वन्द्वं मनसि भावये ।
धत्ते यत्सुमनश्श्रैष्ठ्यमपि भावयतां सताम् ॥

अमृतप्रदो जगद्गुरुरामन्न्य मुदा वृषाद्रिगृहमेधी ।
तातेत्यमृतं यस्मादर्थितवान् स गुरुचन्द्रमा जयति ॥

अष्टमूर्तिरणिमा ह्यणुरेव श्रीसखस्य महिमानमपेक्ष्य ।
इत्यदः प्रकटयन् हृदये स्ताद्य(ा)क्रियाञ्चितकरेण यतीन्द्रः ॥

शमितकुमतचारश्शौरिघण्टावतारः कलिविमथनशूरः कामकोपातिदूरः ।
अवतु जगदुदारो ऽनन्तसूरेः कुमारः प्रणतसुकृतसारः प्रौढविद्याविहारः ॥

भाति स्मेरयशोविभाग्यवलितत्रैलोक्यविद्वत्सभा-
लङ्कारो हि विशुद्धवृत्तगुरुराण्मुक्ताफलोत्पत्तिभूः ।
विख्यातो भुवि बुक्कपट्टणमहावंशक्षमालाङ्कृति-
श्लाघाकर्मसुपर्वनन्दितलसच्छाखाकृताभ्युन्नतिः ॥

तत्राभूत्कथकौघसिन्धुरघटाकण्ठीरवप्रक्रिया-
विख्यातान्वयदेशिकेन्द्रविलसद्गर्भाब्धिशीतद्युतिः ।
श्रीशैलान्वयमौळिमण्डनमणिर्यः कुण्डलीग्रामणी
वाचस्पत्यभिनन्दनीयफणिति(:) श्रीतातयार्याग्रणीः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्सूनुः पदवाक्यमानपदवीतत्त्वार्थसर्वस्ववित्
श्रीमद्वेङ्कटदेशिकात्तनिगमश्रेणीशिखार्थस्थितिः ।
कुर्वे भागवताग्रगण्यहृदयालङ्कारसन्दायिनीं
तत्कारुण्यबलेन वेङ्कटसुधीस्सिद्धान्तरत्नावळीम् ॥

इह खलु भगवान् बादरायणः परमकारुणिकः परमपुरुषार्थार्थिजनानुजिघृक्षया मानान्तरागोचरं वेदान्तैकवेद्यं परं ब्रह्म जन्माद्यस्य यत इति सूत्रेण यतो वा इमानीत्यादिश्रुत्यर्थाविष्करणमुखेन निर्धारयाञ्चकार–जगत्कारणं ब्रह्मेति ।

* * * *

**Colophon:**

इति शठमर्षणकुलतिलकनिखिलवेदान्तविद्यानिषद्यायितहृदयकमलश्रीतातयाचार्यनन्दनस्य हयवदनकरुणाकटाक्षवीक्षालब्धपदवाक्यप्रमाणस्वारस्यश्रीमन्निगमान्तगुरुचरणसरसीरुहचञ्चरीकायमाणमानसस्य श्रीवेङ्कटदेशिकपादसेवासमधिगतश्रीमच्छारीरकमीमांसाभाष्यहृदयस्य वेङ्कटाचार्यस्य कृतिषु सिद्धान्तरत्नावळ्यां प्रथमः परिच्छेदः ॥

See under the next number for the end.

---

## No. **5064.** सिद्धान्तरत्नावलिः. SIDDHĀNTARATNĀVALIḤ.

Substance, palm-leaf. Size, 13 × 8¾ inches. Pages, 267. Lines, 24 on a page. Character, Telugu. Condition, good. Appearance, new.

Second Paricchēda complete.

Same work as the above.

See under the previous number for the beginning.

**End:**

तस्मादेतादृशकुशकाशावलम्बनेन शिवपारम्ये रामायणस्य तात्पर्यमस्तीति वर्ने(र्ण)यितुमशक्यत्वात् पूर्वोदाहृतभूयस्तरवचनानुरोधात् भगव-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्पारम्यतात्पर्यकत्वमेवेति सकलमहाजनपरिग्रहावगतप्रमाणमूर्धन्यभावश्रीमद्रामायणानुसारित्वात् सात्त्विकपुराणानां प्राबल्यमिति तैरेवोपनिषदुपबृंहणस्य कर्तव्यतया तदनुसारेण श्रुतीनां भगवत्येव तात्पर्यमिति शिवहिरण्यगर्भादिविभूतिकश्रीमन्नारायण एव जगत्कारणं ब्रह्मेति सिद्धम् ॥

**Colophon :**

इति श्रीशठमर्षणकुलतिलकनिखिलवेदान्तविद्यानिषद्यायितहृदयकमलश्रीताताचार्यनन्दनस्य हयवदनकरुणाकटाक्षवीक्षालब्धपदवाक्यप्रमाणसारस्य श्रीमन्निगमशिखरगुरुचरणसरसीरुहचञ्चरीकायमाणमानसस्य श्रीवेङ्कटदेशिकपादसेवासमधिगतश्रीमच्छारीरिकमीमांसाभाष्यहृदयस्य वेङ्कटाचार्यस्य कृतिषु सिद्धान्तरत्नावळ्यां द्वितीयः परिच्छेदः ॥

---

## No. 5065. सिद्धान्तरत्नावलिः.

### SIDDHĀNTARATNĀVALIḤ.

Substance, palm-leaf. Size, 18 × 1¼ inches. Pages, 158. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, not new.

**First** Pariccheda incomplete.

Same work as the above.

---

## No. 5066. सिद्धान्तरत्नवलिः.

### SIDDHĀNTARATNĀVALIḤ.

Substance, palm-leaf. Size, 16⅝ × 1⅝ inches. Pages, 48. Lines, 10 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Incomplete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5067. सिद्धान्तवैजयन्ती.

## SIDDHĀNTAVAIJAYANTĪ.

**Substance**, palm-leaf. Size, 16⅝ × 1¾ inches. Pages, 150. **Lines**, 11 on a page. Character, Telugu. Condition, injured. Appearance, old.

Prakaraṇas 3 to 6 complete.

A treatise on Viśiṣṭādvaita-Vēdānta establishing that the word Brahman denotes the Supreme Self.

By Veṅkaṭācārya.

**Beginning :**

. . त्वा . . . त्वाच्च यो ब्रह्मेत्यभिधीयते ।
अनवद्यगुणो नुद्यादवद्या . . . . . . . . ॥

* * * *

त्वं च स्वरूपेण गुणैश्च यत्रानवधिकातिशयं सोऽस्य मुख्यार्थः । स च सर्वेश्वर एव । अतो ब्रह्मशब्दस्तत्रैव मुख्यवृत्त . . . तस्मादन्यत्र ।

* * * *

ब्रह्मेति श्रीमद्भाष्यम् । नन्वेतदयुक्तमिव भाति ; ब्रह्मशब्दवाच्यानां प्रधानादीनां बृहत्त्वादिगुणयोगाविशेषेऽपि परमात्मन एव मुख्यार्थत्वमित्यत्र प्रमाणाभावात् ।

**Colophon :**

इति श्रीशठमर्षणकुलतिलकनिखिलवेदान्तप्रमुखविद्यानिषद्यायितहृदयकमलश्रीतातयाचार्यनन्दनस्य श्रीमद्वेङ्कटाम्बागर्भशुक्तिमौक्तिकमणेः हयवदनकरुणाकटाक्षवीक्षालब्धरहस्यप्रमाणसारस्यसारस्य निगमशिखरगुरु(वरचरण)सरसीरुहचञ्चरीकायमाणमान(स)स्य श्रीवेङ्कटदेशिकपादसेवासमधिगतश्रीमछा(च्छा)रीरकमीमांसाभाष्यहृदयस्याग्निष्टोमवाजपेययाजिनो वेङ्कटाचार्यस्य कृतिषु सिद्धान्तवैजयन्त्यां ब्रह्मशब्दार्थनिरूपणं नाम तृतीयं प्रकरणम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

. . . . . तथा कुब्जं खञ्जकं वामनं तथा ।
मूकं न बधिरं चैव सन्न्यासं नैव कारयेत् ॥"

इति निषेधात् सकलकर्मध्यानसङ्कल्पात्मकस्य सन्न्यासस्या.

---

No. **5068.** सिद्धान्तसङ्ग्रहः.

SIDDHĀNTASAṄGRAHAḤ.

Pages. 44. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 4991.

Complete.

A summary of the accepted conclusions of the Viśiṣṭādvaita-Vēdānta: by Śrīśailadāsa, son of Śrīraṅgarājamahādēśika *alias* Tiruvaraṅgamāṇḍān.

**Beginning:**

श्रीभाष्यकारसिद्धान्तरत्नाकरसुधांशवे ।
नमो वेदान्तगुरवे दुर्मतध्वान्तभानवे ॥

श्रीमत्सर्वार्थसिद्ध्यादिप्रबन्धेषु प्रपञ्चितः ।
सङ्गृह्यतेऽत्र सिद्धान्तः प्रसादाय विपश्चिताम् ॥

द्रव्याद्रव्यप्रभेदेन द्विधा तत्त्वमुदीरितम् ।
तत्र द्रव्यमवस्थावदन्यदद्रव्यमुच्यते ॥
आगन्तुरपृथक्सिद्धो धर्मोऽवस्थेति कीर्त्यते ।
मूर्ते चलति संयोगाद्ब्रह्मणो लक्षणान्वयः ॥

**End:**

आत्मानात्मविभेदेन द्वैविध्यं क्वचिदुच्यते ।
तत्त्वत्रयं च निपुणैरर्थपञ्चकमेव च ॥
ज्ञानोपचयसिद्ध्यर्थं यथाशयमुदाहृतम् ।
विभागांशे प्रकाराणां भेदे सत्यपि तत्र नः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्यूनताधिकता वापि तत्त्वेषु न च विद्यते ।
न्यायसिद्धाञ्जनन्यायपरिशुद्ध्योरशेषतः ॥
सर्वार्थसिद्धावपि च परिश्रमजुषां सताम् ।
विदुषां परितोषाय कृतस्सिद्धान्तसङ्ग्रहः ॥

**Colophon:**

इति श्रीमाडभूषितिरुवरङ्गमाण्डान्श्रीशैलश्रीरङ्गराजमहादेशिकतनूजेन तदेकदैवतेन तत्प्रसादलब्धवाजपेयाद्यनेकक्रतुयजनधन्यतावता श्रीशैलदासेन विरचितस्सिद्धान्तसङ्ग्रहः संपूर्णः ॥

---

No. **5069.** सिद्धान्तसिद्धाञ्जनम्.

SIDDHĀNTASIDDHĀÑJANAM.

Pages, 123. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 5005.

Complete.

An exhaustive treatise on the doctrines of the Viśiṣṭādvaita-Vēdanta.

By Anantārya of the Śeṣārya family and a resident of Yādavagiri in Mysore.

The work is divided into the following four Paricchēdas :—

(१) जडनिरूपणपरिच्छेदः.
(२) जीवनिरूपणपरिच्छेदः.
(३) ईश्वरनिरूपणपरिच्छेदः.
(४) नित्यविभूतिपरिच्छेदः.

**Beginning:**

श्रीयादवाद्रिनिलयं श्रितकल्पवृक्षं नारायणं निखिललोकनिदानभूतम् ।
निस्सीमनिर्मलगुणं निरवद्यरूपं नित्यं नमामि शिरसा सकलार्थसिद्ध्यै ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जयन्तु श्रीमन्तश्श्रुतिशिखरसारस्यमधुरा-
स्सुधासध्रीचीनाः कुटिलमतकोलाहलमुषः ।

स्फुरद्युक्त्यासक्त्या द्रुहिणरमणीश्लाघ्यविभवा
यतिक्षोणीभर्तुर्निरुपमवचोगुम्भविसराः ॥

शेषार्यवंशाम्बुधिशीतरश्मिस्सुधीरनन्तार्य इति प्रतीतः ।
सिद्धान्तसिद्धाञ्जननामधेयं प्रबन्धमेनं प्रकटीकरोति ॥

येऽर्था दुर्बोधतां प्राप्ता गम्भीराचार्यसूक्तिषु ।
तादृशार्थप्रकटनात् सफलोऽयं श्रमो मम ॥

चिदचि(दी)श्वरतत्त्वज्ञानसहकृतभगवदुपासनस्य मोक्षहेतुतया तादृशतत्त्वज्ञानार्थं प्रमेयं निरूप्यते—

ज्ञेयत्वं प्रमेयसामान्यलक्षणम् । ज्ञेयत्वं च विषया(यता)सम्बन्धेन ज्ञानमेव । तेन विषयत्वमात्रस्य लक्षणत्वसम्भवात् तत्र ज्ञाननिरूपितत्वांशवैयर्थ्यमिति शङ्कानवकाशः ।

**End :**

प्रमाणतदाभासान्यतरजन्यज्ञानत्वविशिष्टनिरुक्तसाध्यव्यापकत्वस्य बाधितत्वादिरूपोपाधौ सत्त्वेन वैधर्म्योच्चेत्यस्यापि न विरोध इत्याहुः । सा च पञ्चोपानिषत्प्रतिपाद्यानि पञ्चमहाभूतानि एकादशेन्द्रियाणीति षोडश. तत्त्वात्मिका ॥

**Colophon :**

श्रीमदनन्तकुलातिलकस्य श्रीमदनन्तार्यस्य कृतिषु सिद्धान्तसिद्धाञ्जने नित्यविभूतिपरिच्छेदश्चतुर्थस्समाप्तः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5070. सिद्धान्तसिद्धाञ्जनम्.
## SIDDHĀNTASIDDHĀÑJANAM.

Substance, palm-leaf. Size, $13\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 20. Lines, 9 on a page. Character, Grantha. Condition. good. Appearance, not old.

The first Paricchēda incomplete.

Same work as the above.

---

## No. 5071. सिद्धान्तसिद्धाञ्जनम्.
## SIDDHĀNTASIDDHĀÑJANAM.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{1}{2}$ inches. Pages, 50. Lines, 8 on a page. Character, Grantha. Condition, much injured. Appearance, not old.

The first Paricchēda incomplete.

Same work as the above.

---

## No. 5072. सिद्धित्रयम्.
## SIDDHITRAYAM.

Pages, 36. Lines, 7 on a page.

Begins on fol. 22*a* of the MS. described under No. 4730.

Incomplete.

An original work on Viśiṣṭādvaita-Vēdānta proving the reality of the three great principles, viz., soul, God and consciousness: by Yāmunācārya.

**Beginning:**

यत्पदाम्भोरुहध्यानं(न)विध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोऽहं यामुनेयं नमामि तम् ॥
प्रकृतिपुरुषकाल(ला)व्यक्तमुक्ता यदिच्छा-
मनुविदधति नित्यं नित्यसिद्धैरनेकैः ।
स्वपरिचरणभोगै(:) श्रीमति प्रीयमाणे
भवतु मम परस्मिन् पूरुषे भावबन्धः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(विरुद्धमतयोऽ)नेकास्सन्त्यात्मपरमात्मनोः ।
अतस्तत्परिशुद्ध्यर्थमात्मसिद्धिर्विधीयते ॥

सम्मतं हि सर्वसमयेष्वात्मज्ञानं निश्श्रेयसहेतुरिति । श्रूयते च—

प्रत्य(पृथ)गात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति । आत्मानं चेद्विजानीयात्तरति शोकमात्मवित् । ब्रह्मविदाप्नोति परम् इत्यादि । परावरात्मतत्त्वज्ञानस्यापवर्गसाधनत्वं प्रतिपादयेद्वेदान्तवाक्यगणः।

**End :**

स्वापादौ भासते नैवमर्थस्संवेदना(त्)पृथक् ।
तेन संवेदनं सत्यं संवेद्योऽर्थ[स्त्व]स्त्वसन्निति ॥

तदेत(द)परामृष्टस्ववाग्बाधस्य जल्पितम् ।
सहोपलम्भनियमो येनैवं स महीयते ॥

---

## No. 5073. सूत्रमुक्ताकलापः.

## SŪTRAMUKTĀKALĀPAḤ.

Substance, palm-leaf. Size, 11⅝ × 1¼ inches. Pages, 222. Lines, 6 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Incomplete.

A treatise recapitulating some of the important conclusions of the Viśiṣṭādvaita-Vēdānta.

**Beginning :**

गुरुभ्यस्तद्गुरुभ्यश्च यतीन्द्राय सम(शठ)द्विषे ।
सेनेशाय श्रियै देव्यै श्रीशाय च नमोऽस्तु ते ॥

नमो नमस्समस्तात्मसमुज्जीवनजन्मने ।
रङ्गमङ्गळधुर्याय रम्यजामातृयोगिने ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उज्जिजीविषतां पुंसामुचितोपायनिश्चयः ।
श्रुतिस्मृतिपुराणादि शोधयित्वा विधीयते ॥

श्रुतार्थमनु(न)नायैव सोऽयं मम समुद्यमः ।
सोढव्यमत्र स्खलितं सद्भिर्विषयगौरवात् ॥

सूत्रसङ्ग्रह एव स्यात्प्रयोक्तॄणां मनोमुदे ।
रत्नैः किमुदयाकीर्णैः परिष्कारार्थिनां फलम् ॥

सूत्रमुक्ताकलापोऽयं सुहृदां हृदयङ्गमः ।
नादीयेत न तज्ज्ञैश्चेन्नात्र चित्रं न च क्षतिः ॥

प्रकाशयति यत्सोऽयं भगवत्प्रियवैभवम् ।
वरं हितमिदं हीति प्राज्ञैस्सङ्गृह्यते तराम् ॥

प्रामाण्यमादौ शास्तानां(स्त्राणां)पश्चादात्मनिरूपणे ।
ततस्संसृतिहेतुश्च ततस्संसरणक्रमः ॥

मनुष्यस्त(त्व)स्य दौर्लभ्यमस्थैर्यं कर्मवश्यता ।
सङ्गस्य शोकहेतुत्वमुभे साध्यत्वमेव च ॥

श्रीशस्य तदुपायत्वं तत्स्वरूपनिरूपणम् ।

* * * *

इति प्रकरणान्यत्र ज्ञातव्यानि यथाक्रमम् ॥

विस्तरस्सङ्ग्रहश्चात्र विद्यते रुचिभेदतः ।
सर्वेषां सुलभत्वाय सङ्ग्रहस्तत्र लिख्यते ॥

अत्र प्रथमं तावत्प्राप्तुः प्रत्यगात्मनः प्राप्तस्य परमात्मनः प्रापकादीनां च शास्त्रैकसमधिगम्यत्वात् सर्वव्यवहारकारणस्य शास्त्रस्य प्रामाण्यमभिधीयते । आश्वमेधिके—

धर्मं जिज्ञासमानानां प्रमाणं प्रथमं श्रुतिः ।
द्वितीयं धर्मशास्त्रं च तृतीयं लोकसङ्ग्रहः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



याज्ञवल्क्यः—

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥

**End :**

सदतिक्रमहीनोऽपि सत्तया नैव हीयते ।
सदतिक्रमदग्धानां सर्वे . . . . . . . निष्फलम् ॥

समूलशुष्कसस्यानां सेकाद्यैः किं फलं भवेत् ।
सर्वेसहोदयासि . . . . . . . . नपि जगत्पतिः ॥

स्वभक्तया(क्त्या)पि(हि) भक्तेषु द्वेषिणो मङ्क्षु कुप्यति ।
दग्धः खलु प . . . . . . . . . . . ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## 4. ŚAIVA-VĒDĀNTA.

---

### No. 5074. अनुभवसूत्रम्.
### ANUBHAVASŪTRAM.

Pages, 87. Lines, 14 on a page.

Begins on fol. 134*a* of the MS. described under No. 2710.

Contains 8 Adhikaraṇas.

On the realization of Śiva as the Supreme Being in self-realization. This is a part of an exhaustive Āgama treatise called Vātūlatantra.

**Beginning:**

जयति षडध्वविशुद्धिर्जयति श्रीमत्षडक्षरीविद्या ।
जयति षडङ्गसुभक्तिर्जयति स्वत एव षट्स्थलब्रह्म ॥

अवाच्यात्मस्वरूपाय शिवभावप्रदायिने ।
नमस्सद्गुरुनाथाय षट्स्थलब्रह्ममूर्तये ॥

नमश्शिवाय स्वयमाप्तनाम्ने स्वभावसंसिद्धिमहामाहिम्ने ।
स्वलीनषट्त्रिंशदखण्डधाम्ने स्वमायया कल्पितभूत(धा)म्ने ॥

नमश्शिवायै शिववल्लभायै शिवानुभूतिप्रतिबोधिकायै ॥
शिवप्रसादामलविग्रहायै शिवप्रदायै भवतादुमायै ॥

यस्या मात्रात्रयं नाम व्यत्यस्तं प्रणवात्मकम् ।
बभौ ह्रस्वद्वयं दीर्घं द्विमात्रत्वादुमैव सा ॥

तयोमया सार्धमुपासितत्वाच्छिवस्सदानन्दचिदात्मसंज्ञः ।
प्रशस्यते सोम इति प्रतीत्या तमैपुराधीश्वरमानतोऽस्मि ॥

* * * *

अयं शिवाद्वैतपरो महात्मा परम्परापावनसम्प्रदायः ।
शिवेन देव्यै कथितं रहस्यं ततान यष्षट्स्थलनिर्णयं तत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वातूलान्त्याः कामिकाद्याः शिवेनोक्ताः शिवागमाः ।
तेषु वातूलसंज्ञोऽयं सर्वोत्कृष्टो महागमः ॥

* * * *

श्रीलिङ्गार्पणसद्भावसंज्ञं सप्तममिष्यते ॥
क्रियाविश्रान्तिसंज्ञाधिकरणश्चाष्टमं भवेत् ।
एवमष्टाधिकरणं शिवसिद्धान्ततन्त्रकम् ॥
एतद्यो वेद सोऽविद्याग्रन्थिं विक(कि)रति प्रभुः ।
शिवसिद्धान्तकं तन्त्रं शिवाद्वैतं शिवं पदम् ॥

**Colophon:**

इत्यनुभवसूत्रे षट्स्थलनिर्णये पारम्पर्यक्रमो नाम प्रथमाधिकरणम् ॥

तदिदानीं प्रवक्ष्यामि स्थलनिर्देशमादितः ।
यदुक्तं देवदेवेन रहस्यार्थं समासतः ॥
एकमेव परब्रह्म सच्चिदानन्दलक्षणम् ।
शिवतत्त्वं शिवाचार्यैस्थलमित्याहुरादरात् ॥

**End:**

लिङ्गाङ्गैक्यस्वलिङ्गाय नमस्ते लिङ्गमूर्तये ।
नमश्शब्द उमा साक्षात् शिवशब्दश्शिवः स्वयम् ॥
आयश्शब्दस्तयोर्योगः सोमतत्त्वमुपास्महे ।
शिवो लिङ्गमुमैवाङ्गमनयोस्साहितः स्वयम् ॥
सोमस्सम्बन्ध इत्येवं पदत्रयमुपास्महे ।
अवाच्यात्मस्वरूपाय शिवभावप्रदायिने ॥
नमस्सद्गुरुनाथाय षट्स्थलब्रह्ममूर्तये ॥
स्वानुभूतिविभवावगाहिना मायिदेवविभुना महात्मना ।
श्रीशिवानुभवसूत्रमुत्तरं तन्त्रमुक्तमतिशोधनं परम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एतद्यो वेद सोऽविद्याग्रन्थिं विकिरति प्रभुः ।
शिवसिद्धान्तकं तन्त्रं शिवाद्वैतं शिवं परम् ॥

**Colophon:**

इति श्रीवातूलोत्तरतन्त्रे शिवानुभवसूत्रे षट्स्थलनिर्णये क्रियाविश्रान्तिर्नामाष्टमाधिकरणं सम्पूर्णम् ॥

---

## No. 5075. अनुभवसूत्रम्.
## ANUBHAVASŪTRAM.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 47. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Viśēṣārthaprakāśa 25*a*, Caturvēdatātparyasaṅgraha (with commentary) 47*a*.

Incomplete.

Same work as the above.

---

## No. 5076. कालहस्तीशविलासः.
## KĀLAHASTĪŚAVILĀSAḤ.

Substance, palm-leaf. Size, $13\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 168. Lines, 4 on a page. Character, Telugu. Condition, injured. Appearance, old.

Incomplete.

First Vilāsa complete.

A treatise ascribing all the attributes of the Supreme Brahman to Śiva as Paramēśvara.

**Beginning:**

श्रीकाळहस्तीशविलासपुस्त . . . . . . . . . . . .

* * * *

ब्राह्मणत्वजात्यादावनुगमाभावेन शक्यतावच्छेदकत्वासम्भवात्, लाघवाद्ब्राह्मणत्वजातेरेव प्रवृत्तिनिमित्तत्वाच्च अवयवार्थादन्यस्य शब्दादप्रतीयमानस्य वा शक्यतावच्छेदकत्वे अश्वपदगोपदादावपि तथा वक्तुं शक्य-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वेन नानार्थोच्छेदापत्तेः । वस्तुतस्तु अथ कस्मादुच्यते तारा ? अथ कस्मादुच्यते प्रणवः ? अथ कस्मादुच्यते ब्रह्म ? इति प्रणवप्रकरणस्थेषु प्रश्नोत्तरेषु वाच्यवाचकयोरभेदसम्बन्धमादाय परब्रह्मणि परमेश्वरे विद्यमानं निरतिशयबृहत्त्वं प्रणवे आरोप्यते ।

**End:**

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नम इति सामान्येन ज्येष्ठत्वश्रेष्ठत्वप्रतीत्या सिद्धं सर्वापेक्षया आधिक्यं सदाशिवस्येति सर्वमवदातम् ॥

ब्रह्मत्वं कारणत्वं विधिहरिजननं धारणं हैमवत्या
रक्षा बाणस्य शिक्षा पशुपतिविषये रामनामाभिधा च ।
निर्माल्यस्योपयोगः शिवपरवचसां तामसत्वोक्तिभङ्गो
भङ्गो मूर्ध्नो विधातुः स्थिरतरपरता . . . पस्याप्युपेक्षा ॥

दैत्याद्भीत्यापयानं भृगुमुनिविषये कोप इत्यादयस्ते
सर्वोत्कर्षाय शम्भो न तु हतमतिभिः कल्पिताभासवादाः ।
श्रीकाळहस्तीशविलासपुस्ते सिद्धे पुरस्सन्निधिदेवतायाः ।
चण्डेश्वरीपादसमीपदेशे सिंहारुणेऽभूत्प्रथमो विलासः ॥

जयति विमलबुद्धिः षण्मतस्थापनार्यः सकलबुधजनेभ्यस्सर्वविद्याभिरामः ।
कुवलयततिविद्वत्पूर्णिमाश्लिष्टचन्द्रः सरसगुणयुतः श्रीचारुकीर्तिर्यतीन्द्रः ॥

प्लवसंवत्सरे मार्गशीर्षे . . . . . . . . . .
वेङ्कटेशेन लिखितं काळहस्तीशपुस्तकम् ॥

---

## No. 5077. चतुर्वेदतात्पर्यसङ्ग्रहः.

## CATURVEDATĀTPARYASAṄGRAHAḤ.

Substance, palm-leaf. Size, $19\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 200. Lines, 7 on a page. Character, Telugu and Kanarese. Condition, much injured. Appearance, old.

Wants beginning and end.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



A treatise purporting to give briefly the essence of the four Vēdas and in praise of the worship of Śiva as the Supreme God : by Haradattācārya.

**Beginning :**

नमो गणपते तुभ्यं ब्रह्मणां ब्रह्मणस्पते ।
उमाकोमळहस्ताब्जसम्भावितललाटिकम् ।
हिरण्यकुण्डलं वन्दे कुमारं पुष्करस्रजम् ॥

* * * *

**Colophon :**

इति सर्वज्ञशिरोमणिपरमशिवयोगिहरदत्ताचार्यकृतचतुर्वेदतात्पर्यसङ्ग्रह(हे)श्रुतिसूक्तिविला(सः) ॥

. . . . . . . . . . . साक्षादिन्द्रादयस्सुराः ।
अथापि यजमानस्य यज्ञस्य च सहर्त्विजः ॥
सद्य एव शिरश्छेदस्साधु सम्पद्यते फलम् ।
तस्मान्नावेदनिर्दिष्टं न चेश्वरबहिष्कृतम् ॥
नासत्परिगृहीतञ्च कर्म कुर्या . . . . . ।
. . . . . . . . . . . . . . . . येयौ ॥
शिवभक्ति(क्ते)र्वैपरीत्ये चण्डदक्षौ निदर्शनम् ।

तथाहि शिवपुराणवचनम्—

त्वत्किङ्कराणां सुकृताय पापमकिङ्कराणां दुरिताय पुण्यम् ।
सम्पद्यते पश्य कृतापराधौ चण्डेशदक्षौ तरुणेन्दुमौले ॥

**End :**

महेश्वरः क इत्याकाङ्क्षायाम्—

यद्वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः ॥ इति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वेदादौ वेदान्ते च स्वरः प्रणवः । तस्य प्रकृतिलीनस्य यः परः परमार्थतः साक्षाद्वाच्यः स महेश्वर इति ॥

**Colophon :**

इति श्रीमत्सर्वज्ञशिरोमणिपरमशिवयोगिहरदत्ताचार्यकृतचतुर्वेदतात्पर्यसङ्ग्रहे . . . . मालायां शताधिकैकादशश्लोकविलासः ॥

* * * *

सूतः—

योनैव कुरुते पूजां पूजार्हाणां महात्मनाम ।
स वै सर्वगुणाढ्योऽपि न श्रियं समवाप्नुयात् ॥
अस्मिन्नर्थे पुरावृत्तमाख्यानं प्रवदामि च ।
पुरा स्वायम्भुवे . . . . . . . . . . ॥
. . . . . . . भागः पुत्रार्थमनुचिन्तयन् ।
ततश्च भगवान्विष्णुर्देवदारुवने शुभे ॥
सह लक्ष्म्या महाभाग चचार सुचिरं तपः ।
पुत्रकामस्तमुद्दिश्य ध्यायमानो महेश्वरम् ॥
संस्थाप्य . . . . . . . . . . . . . . ।
. . . . . . . . . . . वर्षात्स्वागारमाश्रितः ॥
जलाश्रयश्च हेमन्ते स ध्यायति महेश्वरम् ।
ततो वर्षसहस्रान्ते तस्य तुष्टो महेश्वरः ॥
प्रत्यक्षोऽभूत्समं गौर्या गणसङ्घैस्समावृतः ।

* * *

. . . . . . . . शिवस्यैव प्रसादतः ।
अश्वमेधायुतं पुण्यं विश्वसेत्स लभेन्नरः ॥
तिलषोडशभागश्च तृणाङ्गाम्बु . . . . ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **5078.** चतुर्वेदतात्पर्यसङ्ग्रहः—सव्याख्या.

CATURVĒDATĀTPARYA SAṄGRAHAḤ WITH COMMENTARY.

Pages, 24. Lines, 7 on a page.

Begins on fol. 47*a* of the MS. described under No. 5075.

Incomplete (25 Ślōkas).

Similar to the above.

Contains also a commentary.

**Beginning:**

यस्मै नमो भवति यस्य गुणास्समग्रा
नारायणोपनिषदा यदुपासनोक्ता ।
यो नः प्रचोदयति बुद्धिमधिक्रतौ यः
तं त्वामनन्यगतिरीश्वर संश्रयामि ॥

यस्मै नम इति । नमो नमस्कारो यस्य सम्बन्धी भवति नमस्कारक्रिययास्यैवाभिप्रेतत्वात् नमसस्तत्सम्बन्धित्वम् । यस्मै नमः तसै (स्मै)त्वा जुष्टं नियुनज्मि इति मन्त्रानुकरणार्थत्वादनुकार्यानुकरणयोरभेदविवक्षया यस्मै इति चतुर्थी ; अनेन नमश्शेषित्वं लक्ष(ण)मुक्तम् । समग्रास्सकलगुणा ऐश्वर्यादयो यस्य सम्बन्धिनः ; अनेन ऐश्वर्यादिगुणकत्वं लक्षणमुक्तम् । नारायणोपनिषदा उप समीपे ईश्वरस्य प्रतीकत्वेन निषदिति इति उपनिषत् वेदान्तविभागः उपनिपूर्वात्सदेस्सत्सूद्विषेति क्विपि सदिरप्रतेरिति षत्वम् । नारायणेन महर्षिणा दृष्टा उपनिषन्नारायणोपनिषत् तया यस्योपासनोक्ता । अनेन नारायणोपनिषदुदीरितोपास्यत्वं लक्षणमुक्तम् ।

* * * *

वेदेषु वा तदनुयायिषु वा विचार्य तन्त्रेषु वाक्यमखिलं प्रतिपादकं ते ।
तात्पर्यसङ्ग(हम)हं विदधे महेश मह्यं प्रसीद नय मामृजुना पथा त्वम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

इति हेतोरग्निं रुद्रशब्दवाच्यमवैति ; तथाच श्रुतिः—देवासुरास्संयत्ता आसन् ते देवा विजयमुपयन्तोऽग्नौ वामं वसु संन्यदधतेदमु नो भविष्यति यदि नो जेष्यन्तीति तदग्निर्न्यकामयत तेनापाक्रामत्तद्देवा विजित्यावरुरुत्समाना अन्वायन्तदस्य सहसादित्सन्त सोऽरोदीयदरोदीत्तद्रुद्रस्य रुद्रत्वमिति ।

---

## No. 5079. नक्षत्रवादावलिः.

## NAKṢATRAVĀDĀVALIḤ.

Substance, paper. Size, 13 × 8¼ inches. Pages, 351. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

A refutation of some of the views of the followers of the Mīmāṁsā school, written chiefly with a view to support the Śaiva-Vēdānta of Śrīkaṇṭhācārya : by Appayadīkṣita.

The work is also called Vādanakṣatramālikā.

**Beginning:**

यस्याहुरागमविदः परिपूर्णशक्तेरंशे कियत्यपि निविष्टममुं प्रपञ्चम् ।
तस्मै तमालरुचिभासुरकन्धराय नारायणीसहचराय नमश्शिवाय ॥
यत्सिद्धवद्व्यवहृतं ध्वनितं च भाष्ये तत्रान्तरेष्वनुपपादितमर्थजातम् ।
तस्य प्रसाधनमिह क्रियते नयोक्त्या बालप्रियेण मृदुवादकथाप्रसङ्गः ॥

कुण्डपायिनामयनाख्ये सत्रे श्रूयते उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोतीति । तन्मासाग्निहोत्रं नैयमिकाग्निहोत्राद्भिद्यते न वेति जरन्मीमांसकमतानुसारिणः पूर्वपक्षिणः । श्रीकण्ठाचार्यमतानुसारिणः सिद्धान्तिनश्च विप्रतिपत्त्या संशये सति सिद्धान्तानुसारिणो वादिनः प्रथमकक्ष्या — मासाग्निहोत्रं नैयमिकाग्निहोत्रान्न भिद्यते श्रुताग्निहोत्रनामकत्वात् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

न खलु ब्रह्मानन्दमनुभवन् मुक्तः कश्चिन्मनुष्यगन्धर्वानन्दमात्रमनुभवन्नास्ते । सर्वेषां मुक्तानां निरतिशयब्रह्मानन्दानुभवसत्त्वा(त्त्व)दनुमानं बाधितविषयं न तु मदनुमानमिति सर्ववैषयिकानन्दावेशा ब्रह्मानन्दस्येति सिद्धम् ॥

इति ब्रह्मानन्दवैषयिकानन्दाभेदसमर्थनवादः ॥

**Colophon:**

श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजि - श्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतिर्वादनक्षत्रमालिका सम्पूर्णा ॥

इदं शास्त्रं मीमांसानक्षत्रमालिकाग्रन्थं लोकनाथशास्त्रेण(स्त्रिणा) लिखितम् ॥

---

## No. 5080. नन्दीश्वरकारिकाव्याख्या–तत्त्वविमर्शनी.

## NANDĪŚVARAKĀRIKĀVYĀKHYĀ: TATTVA-VIMARŚANĪ.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 12. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 49*a*. The other work herein is Līlāvatīvyākhyā 1*a*.

Complete.

A commentary on the **Nandīśvarakārikās**, which are a collection of stanzas, interpreting the 14 alphabetic Sūtras of **Mahēśvara** as in the Vyākaraṇa of Pāṇini so as to lend support to the doctrines of Śaiva-Vēdānta: by Upamanyu.

**Beginning:**

नमश्शिवाय देवाय सर्वज्ञाय परात्मने ।
यस्योन्मेषनिमेषाभ्यां व्यक्ताव्यक्तमिदं जगत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



*श्रीशं गुरुं कुमारं च शैवतत्त्वविशारदम् ।
प्रणम्य नन्दिकेशादीन् शिवभक्तान्मुहुर्मुहुः ॥
काशि(रि)कामादिसूत्राणां नन्दिकेशकृतां शुभाम् ।
लोकोपकारिणीं दिव्यां व्याकरोमि यथामति ॥

इह खलु सकललोकनायकः परमेश्वरः परमशिवः सनकसनन्दनसनत्कुमारादीन् श्रोतॄन् नन्दिकेश्वरपतञ्जलिव्याघ्रपादवसिष्ठादींश्च उद्धर्तुकामो ढक्कानिनादव्याजेन चतुर्दशसूत्रचात्मकं तत्त्वमुपदिदेश । तदनु ते सर्वे मुनीन्द्रवर्याश्चिरकालमाश्रितानामस्माकं चतुर्दशसूत्रचात्मकं तत्त्वमुपदिदेशेति मत्वा अस्य सूत्रजालस्य तत्त्वार्थं नन्दिकेश्वरो जानातीति नन्दिकेश्वरं प्रणिपत्य पृष्टवन्तस्तेषु पृष्टवत्सु षड्विंशतिकारिकारूपेण तत्त्वं सूत्राणामुपदेष्टुमिच्छन्निदमाचक्षे(ष्टे)—नृत्तेति ।

नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्तुकामस्सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥

नृत्तेति । अहमिति शेषः । नटराजराज इत्यनेन मङ्गळादीनि दर्शितानि । विश्वरूपविलासवैचित्र्यचमत्कारप्रवीणत्वान्नटराजराजः ।

* * * *

तत्राद्येन सूत्रेण सर्ववर्णानां समस्तभुवनानां च समुद्भवरूपं स्वात्मतत्त्वमुपदिष्टमित्याह—अकार इति ।

अकारो ब्रह्मरूपस्स्यान्निर्गुणस्सर्ववस्तुषु ।
चित्कलामिं समाश्रित्य जगद्रूप उरीश्वरः ॥

अकार इति । [अन्येन] अः परमेश्वरः निर्गुणः इं मायामाश्रित्य उः व्यापकस्सगुण आसीदिति सूचितः सूत्रार्थः ।

---

*श्रीशङ्करमिति पाठान्तरम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

सर्वतत्त्वजनकः स्वयं तत्त्वातीत इति ज्ञापनार्थमेतत्सूत्रं चकारे त्याह—तत्त्वातीत इति ।

तत्त्वातीतः परस्साक्षी सर्वानुग्रहविग्रहः ।
अहमात्मा परो हल् स्यादिति शम्भुस्तिरोदधे ॥

इति नन्दीश्वरकारिका समाप्ता ॥

तत्त्वातीत इति । सर्वानुग्रहविग्रहः साक्षी तत्त्वातीतो हल् स्यादिति ढक्कानिनादव्याजेन सर्वेषां मुनीनां तत्त्वमुपदिशन् तिरोदध इत्यर्थः । हकारश्शिववर्णस्स्यादिति शैवागमस्मृतिरिति । इति शिवम् ॥

**Colophon:**

इति श्रीउपमन्युकृतादिसूत्रनन्दिकेश्वरकाशि(रि)कायास्तत्त्वविमर्शिनी सम्पूर्णा ॥

वटस्य मूलमासीनं मेधामूर्तिं नमाम्यहम् ।
अज्ञानतिमिरं घोरं यस्य स्मृत्या विनश्यति ॥

---

## No. 5081. नवकोटिः.
## NAVAKŌṬIḤ.

Pages, 11. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 4887.

Complete.

A controversial pamphlet interpreting the word Nārāyaṇa as referring to Śiva and thus ascribing to Him the creatorship of the universe.

**Beginning:**

शर्वाण्याश्लिष्टवर्ष्माणं जगज्जन्मादिकारणम् ।
विष्ण्वाद्यर्चितपादाब्जं वन्देऽहं सर्वदा शिवम् ॥

तत्र शिवस्य जगत्कारणत्वसिद्धेः कारणवाक्यघटकनारायणशब्दस्य शिवपरत्वसिद्ध्यधीनत्वात् नारायणशब्दस्य शिवपरत्वमेव प्रथममुपपादनी-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यम् । उपपादनञ्च स्वपक्षस्थापनपरपक्षनिराकरणाभ्यां भवति । तदुभयं वादजल्पवितण्डानामन्यतमां कथामाश्रित्य सम्पादनीयम् । तत्र विप्रतिपत्तिजन्यसंशयस्य विचाराङ्गत्वान्मध्यस्थेनादौ विप्रतिपत्तिः प्रदर्शनीया । तत्रेयं विप्रतिपत्तिः—नारायणशब्दः शिवपरो न वेति विधिकोटिः सामानाधिकरण्येन, निषेधकोटिरवच्छेदकावच्छेदेन ।

**End :**

एवंप्रकारेण प्रकारान्तराण्यपि बहूनि प्राचीनोक्तानि वेदितव्यानि । एवञ्च कारणवाक्यघटकनारायणशब्दस्य शिवपरत्वव्यवस्थितौ कारणवाक्यानां सर्वेषामेव शिवपरत्वसम्भवात् शिवस्य जगज्जन्मादिकारणत्वं नानुपपन्नमिति ॥

नवकोटिरयं ग्रन्थः शिवपादाम्बुजेऽर्पितः ।
निर्मत्सराणां विदुषां सन्तोषं तनुताच्चिरम् ॥

---

## No. 5082. नवकोटिः.
## NAVAKŌṬIḤ.

Substance, palm-leaf. Size, $14\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 15. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, new.

Begins on fol. 36*a*. The other works herein are Abhilaṣitārthacintāmaṇi 1*a*, Sāmudrikaśāstra 17*a*.

Complete.

Same work as the above.

---

## No. 5083. नवकोटिः.
## NAVAKŌṬIḤ.

Pages, 11. Lines, 7 on a page.

Begins on fol. 13*a* of the MS. described under No. 4890.

Incomplete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5084. नारायणपदनिर्वचनम्.

## NĀRĀYAṆAPADANIRVACANAM.

Pages, 12. Lines, 8 on a page.

Begins on fol. 12*a* of the MS. described under No. 4909.

An interpretation of the word Nārāyaṇa as denoting Śiva.

**Beginning :**

शिष्यगोविन्दहृत्पद्मभास्करं करुणाकरम् ।
सूर्येग्र्यवन्द्यपादाब्जं नौमि पापयसूरिणम् ॥

कार्यतः रुद्ररूपेण धर्माख्यऋषिरूपेण वा चतुर्मुखस्य पुत्रत्वान्मत्स्यसिंहावतारभूतत्वाच्च रायणः, अजातत्वात् चतुर्मुखादीनां कारणत्वाच्च स न भवतीति नरायणः । सेतुबन्धनकाले रायणस्समुद्रः तद्विरोधी श्रीरामः——

चापमानय सौमित्रे शरांश्चाशीविषोपमान् ।

इति श्रीमद्रामायणे । नरसिंहावतारस्य विरोधित्वाच्छरभो वा, चतुर्मुखब्रह्मदक्षिणपादाङ्गुष्ठजन्यत्वाद्ब्रह्मपुत्रो दक्षः तद्विरोधी वा, रायणस्सूर्यः तस्याङ्गवैकल्यकारित्वात्तद्विरोधी वीरभद्रो वा नरायणः ।

**End :**

रुद्रः प्रचण्डे फालाक्षे निर्दुःखे ज्ञानिसूर्ययोः ।

इति नानार्थशब्दरत्ने । सन्त्यन्यानि बहूनि ग्रन्थविस्तरभिया न लिखितानि । तस्मात्सङ्कोचतयैव कोशकृद्भिरुक्तानीति विचार्य अनुक्तमन्यतो ग्राह्यमेव । असङ्कोचलेखने सर्वज्ञो भवितुमर्हति । तस्मात्सर्वेषां कोशानां प्रामाण्यमेवेति ग्राह्यम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5085. नारायणशब्दनिर्वचनम्.

## NĀRĀYAṆAŚABDANIRVACANAM.

Pages, 34. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 4909.

Incomplete.

Deals with the etymology and meaning of the word Nārāyaṇa from the Śaiva standpoint.

**Beginning :**

शिष्यगोविन्दहृत्पद्मभास्करं करुणाकरम् ।
सूर्यत्र्यवन्द्यपादाब्जं नौमि पापघशात्रि(त्रि)णम् ॥

विलासार्थे नरत्वं जीवत्वमयते प्राप्नोतीति नारायणः । अय पय गतौ नन्द्यादिभ्यो ल्युः, कृत्यल्युटो बहुलमिति वा कर्तरि ल्युट् । नर इत्यत्र भावप्रधानो निर्देशः; प्रज्ञादित्वात् स्वार्थे अण् ।

मनसैतानि भूतानि प्रणमेद्बहुमानयन् ।
ईश्वरो जीवकथया प्रविष्टो भगवानिति ॥ इति भागवते ।

उपाधिभिर्यथाकाशो भिन्नत्वेन प्रतीयते ।
अविद्योपाधिभेदेन तथेदमखिलं जगत् ॥ इति नारदीयेऽपि च ।

अरेरिदमारं शत्रुकृतपूजनं तद्विरुद्धं नारं भक्तकृतपूजनं तदयते प्राप्नोतीति वा ।

अण्वप्युपहृतं भक्तैः प्रेम्णा भूर्येव मे भवेत् ।
भूर्यप्यभक्तोपहृतं न मे तोषाय कल्प्य(ल्प)ते ॥ इति भागवते ।

न विद्यन्ते आरा दोषा येषां ते नारा भक्ताः तान् आययते मुक्तिं प्रापयति इति वा; अन्तर्भावितणिच्; नञर्थस्य नशब्दस्य सुप्सुपेति समासः ।

ध्यातः स्मृतः पूजितो वा स्तुतो वा नमितोऽपि वा ।
स्वं पदं सन्ददातीशस्तं वन्दे पुरुषोत्तमम् ॥ इति नारदीये ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

निद्रालस्यप्रमादादि(द्याः)पञ्च निन्द्यास्तु तामसाः ।
निद्रालस्यप्रमादाद्याः तद्गुणाः परिकीर्तिताः ॥
कृष्णो विष्णुः स्मृतः शेषशायी भक्तविमोहकः ।
तेषु च क्षत्रियाणाञ्च धर्मा विप्रैरुदाहृताः ॥ इति स्कान्दे ।
ब्राह्मणानां शिवो ध्येयः क्षत्रियाणां हरिस्स्मृतः ।
हिरण्यगर्भो वैश्यानामुपास्यः सदृशस्स्मृतः ॥ इत्युमासंहितायाम् ।
अतस्सर्वेषां नहिनिन्दान्यायेनेतरप्रशंसार्थत्वात् प्रामाण्यमिति.

---

No. **5086.** न्यायसारः.

NYĀYASĀRAḤ.

Substance, palm-leaf. Size, $5\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 90. Lines, 8 on a page. Character, Malayālam. Condition, injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is Mayūraśataka 43*a*.

Complete.

This treatise relates to Śaiva-Vēdānta and is intended to prove that salvation is attainable only through the realisation of Śiva.

By Bhāvajña.

**Beginning:**

यत्तद्ब्रह्म जगद्बीजमामनन्त्यागमोक्तयः ।
श्रीमच्छिवकरग्रामवास्तव्यं वस्तु तं (तत्)स्तुमः ॥
प्रणम्य शम्भुं जगतः पतिं परं समस्ततत्त्वार्थविदं स्वभावतः ।
शिशुप्रबोधाय मयाभिधास्यते प्रमाणतद्भेदतदन्यलक्षणम् ॥

सम्यगनुभवसाधनं प्रमाणं सङ्ग्रहणम्; संशयविपर्ययापोहार्थं तत्रानवधारणज्ञानं संशयः; स च समानधर्मानेकधर्म . . . . . . . .

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पलब्ध्यनुपलब्धिरूपकारणभेदात्पञ्चधा भिद्यते । तद्यथा समानधर्मात किमयं स्थाणुः पुरुषो वेति । अनेकधर्मात् आकाशविशेषगुणक(र्मा)त किमयं शब्दो नित्यः स्यादनित्यो वेति ।

* * * *

यदा चर्मवदाकाशं वेष्टयिष्यति मानवः ।
तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति ॥

इति तमेव विदित्वातिमृत्युमेति इत्यादि च; तस्माच्छिवदर्शनादेव मोक्ष इति । कः पुनरयं मोक्ष इति? एके तावद्वर्णयन्ति—समस्तविशेषच्छेदे संहारावस्थायामाकाशवदात्मनोऽवस्थानं गुणो मोक्ष इति ।

**End:**

तस्मात्कृतकत्वेऽपि नित्यसुखसंवेदनसम्बन्धस्य विनाशकारणाभावात् नित्यत्वं स्थितं तत्सिद्धमे(व) । नित्यसंवेद्यमानेन सुखेन विशिष्टात्यन्तिकी दुःखनिवृत्तिः पुरुषस्य मोक्ष इति ॥

**Colophon:**

इति भावज्ञविरचिते न्यायसारे तृतीयः परिच्छेदः ॥
शिवकरगतधाम्ना रामनाम्ना विपश्चिज्जनमहितमहिम्ना भूसुरेन्द्रेण सोऽयम् ।
विनयसुभगविद्यारत्नरत्नाकरेण प्रगुणतरमलेखि न्यायसारः प्रबन्धः ॥

---

## No. 5087. पञ्चरत्नव्याख्या—तन्त्रसारप्रकाशिका.

## PAÑCARATNAVYĀKHYĀ : TANTRASĀRA-PRAKĀŚIKĀ.

Substance, palm-leaf. Size, $10\frac{3}{4} \times 1$ inches. Pages, 58. Lines, 3 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Begins on fol. 106*a*. The other works herein are Smaratattvaprakāśikā (a commentary of Smararahasyapañcaratna) 1*a*, Śivatattvaprakāśikā (a commentary of Śivarahasyapañcaratna) 32*a*,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Śrutyarthapradīpikā (a commentary of Śrutisārapañcaratna) 45*a*, Tārakadīpikā (a commentary of Tārakapañcaratna) 134*a*, Śivajñānatārāvalī 150

Complete.

A commentary on the Tantrasārapañcaratna of Sōsali-Vīraṇārādhya: by his grandson Rēvaṇārādhya.

**Beginning:**

शिवं श्रीवीरणाराध्यं नत्वा कुर्वे समासतः ।
व्याख्यां श्रीपञ्चरत्नस्य तन्त्रसारप्रकाशिकाम् ॥
नत्वा पतिं तत्समवेतशक्तिं षडध्व(हे)तुं परमां पराञ्च ।
वक्ष्ये त्रयाणां पशुसञ्चयानां पाशात्मनां लक्षणमध्वनाञ्च ॥

अथास्य तन्त्रसारपञ्चरत्नस्य व्याख्यां तन्त्रसारप्रकाशिकाख्यां सङ्क्षेपतश्चिकीर्षुः प्रथमं पतिलक्षणमाह नत्वेति । एवं पतिपदार्थरूपं परशिवं नत्वा । तदुक्तं नारायणोपानिषदि—

पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतमिति ।

**End:**

दर्शनादर्चनात्तस्य त्रिसप्तकुलसंयुताः ।
जना मुक्तिपदं यान्ति किं पुनः तत्परायणाः ॥

इत्यादि विस्तरभयान्न लिखितम् । इदन्तु तन्त्रसारपञ्चरत्नमपि वीरणदेशिकेन्द्रैः श्रीमत्सोसलिवीरणाराध्यनामाचार्यसार्वभौमैः कृतं विरचितम् ॥

व्याख्या श्रीपञ्चरत्नस्य समस्तागमसम्मिता ।
अकारि रेवणाराध्यैः तन्त्रसारप्रकाशिका ॥

**Colophon:**

इति श्रीमत्सोसलिवीरणाराध्यस्य कृतेः तन्त्रसारपञ्चरत्नस्य व्याख्या रेवणाराध्यविरचिता तन्त्रसारप्रकाशिकाख्या परिसमाप्ता ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5088. पञ्चरत्नव्याख्या—तारकदीपिका.

## PAÑCARATNAVYĀKHYĀ : TĀRAKADĪPIKĀ.

Pages, 32. Lines, 4 on a page.

Begins on fol. 134*a* of the MS. described under No. 5087.
Complete.

A commentary on the Tārakapañcaratna of Sōsali-Vīraṇārādhya : by his grandson Rēvaṇārādhya.

**Beginning:**

शिवं श्रीवीरणाराध्यं नत्वा तारकदीपिकाम् ।
कुर्वे तारकपूर्वस्य पञ्चरत्नस्य पञ्चिकाम् ॥

आपो ज्योतिश्श्रुतिसुजननी ह्यग्निमीळेऽग्र्यवेदः
पद्माकोशं यजुरपि तथा चैष आत्मेति नाम ।
चूडाथर्वा प्रथमकथिता तारकाख्यं शिवं यं
प्राहुः सर्वोपनिषद इमं सर्वसिद्धान्तमीडे ॥

अथास्य तारकपञ्चरत्नस्य तारकप्रदीपिकाव्याख्यां सङ्क्षेपतः चिकीर्षुः देशिकसार्वभौमोपदेशगम्यं वेदवेदशिरोगायत्रीस्तोत्रपात्रं तारकब्रह्मस्वरूपं दर्शयति—आपेति । . . . . . . . . . . . .
तारकाख्यं यं शिवं प्राह अग्निमीळे पुरोहितमिति अग्र्यवेद ऋग्वेदः ।

**End:**

सञ्जाते परमज्ञाने ब्रह्मात्मैकत्वगोचरे ।
सिध्यत्येव सदा मुक्तिः सन्देहो नास्ति कश्चन ॥

इत्यादि ग्रन्थविस्तरभयान्न लिखितम् ।

एतत् तारकं पञ्चरत्नं श्रीवीरणाराध्यगुरुवरैः श्रीमत्सोसलिवीरणाराध्यदेशिकसार्वभौमैः प्रोक्तं भाषितम् ॥

वीरणाराध्यशिष्यश्रीरेवणाराध्ययोगिना ।
व्याख्या श्रीपञ्चरत्नस्य कृता तारकदीपिका ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति श्रीमद्वेदवेदशिरश्शिवागमपुराणप्रभृतिप्रवीणश्रीमत्सोसलिवीरणाराध्यस्य कृतेः तारकपञ्चरत्नस्य व्याख्या रेवणाराध्यविरचिता तारकप्रदीपिकाख्या परिसमाप्ता ॥

पार्थिवे श्रावणे शुक्लदशम्यां लिखितन्त्विदम् ॥

---

No. **5089.** पञ्चरत्नव्याख्या—शिवतत्त्वप्रकाशिका.

PAÑCARATNAVYĀKHYĀ: ŚIVATATTVA-PRAKĀŚIKĀ.

Pages, 26. Lines, 4 on a page.

Begins on fol. 32*a* of the MS. described under No. 5087.

Complete.

A commentary on Sōsali-Vīraṇārādhya's Śivarahasyapañcaratna: by Rēvaṇārādhya.

**Beginning:**

शिवं श्रीवीरणाराध्यं नत्वा कुर्वे समासतः ।
व्याख्यां श्रीपञ्चरत्नस्य शिवतत्त्वप्रकाशिकाम् ॥

वन्दे ह्यनाख्यं परिशेषसिद्धं कलिङ्गरूपौ परमौ शिवौ तौ ।
कलिङ्गरूपाद्यशिवाशिवौ तौ कलिङ्गरूपानलरूपमीशम् ॥

अथास्य शिवरहस्यपञ्चरत्नस्य व्याख्यां शिवतत्त्वप्रकाशिकाख्यां सङ्क्षिपतश्चिकीर्षुः प्रथममनामधेयं वस्तुस्वरूपमाह—वन्द इति । परिशेषसिद्धं परिशेषप्रमाणसिद्धम् । अनाख्यम् अवाङ्मनसगोचरम् । परं वस्तु वन्दे नमामि । अहमिति शेषः । तत्र श्रुतिः—यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । . . . . . . . .
नेति नेत्यस्थूलमनण्वह्रस्वादीर्घमिति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

श्रेयसे त्रिषु लोकेषु न वेदादधिकं परम् ।
विद्यते नात्र सन्देह इति दत्तवरो मया ॥

इत्यादि विस्तरभयान्न लिखितम् ॥

इदं तु शिवरहस्यपञ्चरत्नं वीरणदेशिकेन्द्रैः श्रीमत्सोसलिवीरणाराध्यनामाचार्यसार्वभौमैः कृतं विरचितम् ॥

वीरणाराध्यशिष्यश्रीरेवणाराध्यनिर्मिता ।
व्याख्या श्रीपञ्चरत्नस्य शिवतत्त्वप्रकाशिका ॥

**Colophon:**

इति श्रीमद्वेदशिरश्शिवागमपुराणप्रभृतिप्रचुरशास्त्रप्रवीणश्रीमत्सोसलिवीरणाराध्यदेशिककुञ्जरस्य कृतेः शिवरहस्यपञ्चरत्नस्य व्याख्या रेवणाराध्यविरचिता शिवतत्त्वप्रकाशिकाख्या परिसमाप्ता ॥

---

No. **5090.** पञ्चरत्नव्याख्या—श्रुत्यर्थप्रदीपिका.

PAÑCARATNAVYĀKHYĀ : ŚRUTYARTHA-PRADĪPIKĀ

Pages, 118. Lines, 4 on a page.

Begins on fol. 45*a* of the MS. described under No. 5087.

Complete.

A commentary on the Śrutisārapañcaratna of Sōsali-Vīraṇārādhya: by Rēvaṇārādhya, son of Rēvaṇasiddhēśvara and grandson of Sōsali-Vīraṇārādhya.

It is also called Śrutyarthaprakāśikā

**Beginning:**

श्रुतिश्रुतिशिरोरत्नगायत्रीशिरसि स्थितम् ।
अग्निमीळेपयोज्योतिस्तारकं भवतारकम् ॥

वन्दे सर्वेश्वराचार्यसार्वभौमतनूभवम् ।
सोसलीवीरणाराध्यं लोकाराध्यं यमीश्वरम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रेवणाराध्यनामाहं कुर्वे श्रुत्यर्थदीपिकाम् ।
श्रुतिश्रुतिशिरोरत्नपञ्चरत्नस्य पञ्चिकाम् ॥

* * * *

तत्र तावदाचार्यः श्रुतिसारपञ्चरत्नस्यास्य श्रुत्यर्थप्रकाशिकाख्यां व्याख्यां सङ्क्षेपतश्चिकीर्षुः प्रथमं श्रुत्यर्थसाधनं पुराणमिति दर्शयति स्कान्दे सूतसंहितायाम्—

यश्चतुर्वेदविद्विप्रः पुराणं वेत्ति नार्थतः ।
तं दृष्ट्वा भयमाप्नोति वेदो मां प्रतरिष्यति ॥

**End:**

वेदान्तश्रवणान्नैव तत्त्वमस्यवबोधनात् ।
न वाच्यान्न च सन्न्यासात् नचैवाश्रमपालनात् ॥
न षड्दर्शनवेषादिधारणान्न च मुण्डनात् ।
नानन्तोपाययज्ञेभ्यः प्राप्यते परमं पदम् ॥
गुरुदृक्पातपात्राणां दृढानां सत्यवादिनाम् ।
कथनाद्दृष्टिपाताद्वा सान्निध्याद्वावलोकनात् ॥
अवाच्यन्तु गुरोस्सम्यक्प्राप्यते परमं पदम् ।
अत एव शिवेनोक्तं न गुरोरधिकं परम् ॥

इत्यादि ग्रन्थविस्तरभयान्न लिखितम् । सकलश्रुतिशिरो रत्नवत् ।

जातौ जातौ यदुत्कृष्टं तद्रत्नमिति गीयते ।

इति विश्वः । तदस्यास्तिता(स्त्य)स्मिन्निति मतुप्प्रत्ययः । सकलवेदोपनिषत्सु श्रेष्ठवाक्ययुक्तं पञ्च(ञ्च)रत्नं व्यधत्त अकरोत् ॥

श्रीमत्सोसलिवीरणाराध्यनामाराध्यकुञ्जरः श्रुतिसारपञ्चरत्नं व्यधत्तेत्यन्वयोऽन्वेष्टव्यः ॥

व्याख्या श्रीपञ्चरत्नस्य समस्तश्रुतिसम्मि(म्म)ता ।
अकारि रेवणाराध्यनाम्ना श्रुत्यर्थदीपिका ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इमां व्याख्यां पठित्वाशु पाठ्यमन्यन्न विद्यते ।
ज्ञात्वा ज्ञेयं नोपदेश्यं देशिकैर्भुक्तिमुक्तिदम् ॥

श्रीमदैतरेयोपनिषदि—

ता एतास्संहिता नानन्तेवासिने प्रब्रूयात् । नासंवत्सरवासिने नाप्रचक्षे इत्याचार्याचार्यः । श्रीमद्योगसारे—

पाण्डित्यादर्थलोभाद्वा प्रमादाद्यः प्रयच्छति ।
तस्यावश्यं महाघोरो डाकिनीशाप आपतेत् ॥

द्वादशाब्दन्तु शुश्रूषां यः कुर्यादप्रमत्तधीः ।
तस्मै शिष्याय शान्ताय दातव्यं ब्रह्मचारिणे ॥

**Colophon :**

इति श्रीमद्वेदवेदशिरश्शिवागमपुराणप्रभृतिप्रवीणश्रीमत्सोसलिवीरणाराध्यस्य कृति(ते): श्रुतिसारपञ्चरत्नस्य व्याख्या तत्तनयश्रीमद्रेवणसिद्धेश्वरात्मजश्रीरेवणाराध्यविरचिता श्रीमद्वेदवेदशिरश्शिवागमपुराणप्रभृतिप्रचुरशास्त्रप्रख्यातश्रीमद्वृषेन्द्रप्रमुखमुखोद्गीतरहस्यार्थसमाख्यश्रुत्यर्थप्रकाशिका - ख्या परिसमाप्ता ॥

स्वाधीनमनसां पुंसां गृहमेव तपोवनम् ।
अतिराज्यस्थितो योगी जनकस्सनकाधिकः ॥

वृद्धजाबालोपनिषदि—

सर्वज्ञः पञ्चकृत्यसम्पन्नः सर्वेश्वरः . . शैवतन्त्रे समासतः ॥

---

## No. 5091. बसवराजीयम्.
## BASAVARĀJĪYAM.

Substance, palm-leaf. Size, 16⅝ × 1⅝ inches. Pages, 545. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

A Vīra-Śaiva work: by Basavarāja with a commentary by Sōmanātha. Both the original work and the commentary have their meaning given in Telugu by one Manōhara.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Complete in 26 Prakaraṇas.

The transcription of this manuscript was completed on Thursday the 13th day of Vaiśākha-Śuddha in the year Vijaya.

**Beginning:**

भाषाभूषाबुभूषावनस(सु)जननतादीनविद्यान्नदानः
कान्ताकान्तारकान्तभ्रमणविरमणस्वान्तविश्रान्तचिन्तः ।
लोकालोकातिलोकच्छिदुरितदुरितश्लोकलीलाकलापः
सोमस्सोमस्य नाम प्रणमति मयि सद्भूतिलाभाय भूयात् ॥
अस्य श्रीपार्वतीशस्य लोकानुग्रहकारणाः ।
भक्तिमाहात्म्यवक्तारः सन्तस्सन्ति सहस्रशः ॥
पाल्कूरिसोमनाथार्यः तेषु भाष्यमुवाच यः ।
तद्वत्पदार्थमाख्यातुं न भूतो न भविष्यति ॥
मनोहरेण श्रीकण्ठभक्ताज्ञावशवर्तिनः(ना) ।
तच्छ्रीबसवराजीयमान्ध्रदेशीयमुच्यते ।

श्लोकः—

जयतु बसवराजः स्थौल्यनैर्मल्यपूजः
प्रमथगणसमाजः प्रोल्लसद्भक्तिनैजः ।
प्रहृतदि(वि)नमतार्थे(दार्तिः) स्वायदाम्नायपूर्तिः
स्थिरदिगमितकीर्तिः श्रीवृषाधीशमूर्तिः ॥

बसव इति । इदानीं कलियुगे शिवभक्तिमुद्धर्तुं वृषभ एवाजायत । वृषभस्य एषा प्रक्रिया । वृता(षा)द्भवात् । कृत्वा कामेन हृत्वा हनो ण इति लक्षणात् वृकारस्य वकारादेशो भवति । वबयोरभेद इति वकारस्य बकारः । शषोस्स इति सूत्रात् षकारस्सकारो भवति ।

* * * *

अत एव पशुपेत्यक्षरत्रयम् । तद्भवात् बसवेत्यक्षरत्रयसिद्धिर्भवति । तस्य वृषभस्य माहात्म्यं किमित्यत उच्यते ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्कान्दे ग्रन्थः—

धर्मस्त्वं वृषरूपेण जगदानन्दकारकः ।
अष्टमूर्तेरधिष्ठानमतः पाहि सनातन ॥
पृथिव्यां यानि तीर्थानि सागरान्तानि यानि तु ।
अण्डमाश्रित्य तिष्ठन्ति प्रदोषे गोवृषस्य तु ॥
वृषस्य वृषणं स्पृष्ट्वा शङ्करस्यावलोकनात् ।
सप्तजन्मकृतं पापं तत्क्षणार्धे विनश्यति ॥

**End:**

आदित्यपुराणे—

ब्रह्मविष्णुसुरेशानां स्रष्टा यः प्रभुरव्ययः ।
ब्रह्मादयः पिशाचान्ता यस्य किङ्करवादिनः ॥

विष्णुवाक्यप्रमाणादपि—

विष्णुगुरुश्च कर्ता च शिवः, सोऽपि विष्णुस्तस्य शिवस्य शिष्यश्च किङ्करश्चेत्यादि ।

अत एव श्रुतिस्मृतिपुराणेतिहासवचनप्रमाणात् ब्रह्मविष्णुप्रभृतयो देवाः परमेश्वरो महादेवः । तस्मात्कारणान्निवण्टि(ण्टु)का वामदेवो महादेव इत्यादि पठन्ति । तथैव शास्त्रकर्तारः—

भवश्शर्वो रुद्रः पशुपतिरथोग्रस्स ह महं(हान्)
इत्यादि पठन्ति । षड्विंशतिप्रकरणानि प्रदर्शितानि ॥

एकैकाक्षरमध्वरायुतफलं पापौघतापापहं
श्रोतॄणां पठतामभीष्टफलदं विद्वत्सभामण्डनम् ।
भाष्ये तच्छ्रुतिस्मृति(धर्म)सम्मतमिदं श्रीसोमनाथप्रभो-
रेतत्तुल्यमहारुत(हो तरो)श्शिवमयं काण्डप्रकाण्डं भुवि ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इति श्रीवीरमाहेश्वराचारसारोद्धारे श्रीबसवराजीये श्रीसोमनाथभाष्ये मनोहरीयमन्त्र(मान्ध्र)भाषाविवृतं पशुपतिशब्दनिर्वचनमहादेवशब्दानिर्वचनं पञ्चविंशातिप्रकरणषड्विंशातिप्रकरणं सम्पूर्णम् ॥

इक्षुभिक्षुतिल . . . . पर्वतार ॥
विजयनामसंवत्सर . . . . कामय्य ॥

---

No. **5092.** ब्रह्मसूत्रभाष्यम्.

BRAHMASŪTRABHĀṢYAM.

Substance, palm-leaf (Śrītāla). Size, $13\frac{1}{4} \times 2\frac{5}{8}$ inches. Pages, 228. Lines, 10 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

A Śaiva commentary on the Brahmasūtras of Bādarāyaṇa: by Śrīkaṇṭha-Śivācārya.

**Beginning ;**

ओंनमोऽहंपदार्थाय लोकानां सिद्धिहेतवे ।
सच्चिदानन्दरूपाय शिवाय परमात्मने ॥

निजशक्तिभित्तिनिर्मितनिखिलजगज्जालचित्रनिकुरम्बम् ।
स जयति शिवः परात्मा सकलागमसारसर्वस्वम् ॥

भवतु स भवतां सिद्ध्यै परमात्मा सर्वमङ्गळोपेतः ।
चिदचिन्मयः प्रपञ्चः शेषोऽशेषोऽय(म)स्यैषः ॥

नमः श्वेताभिधानाय नानागमविधायिने ।
कैवल्यकल्पतरवे कल्याणगुरवे नमः ॥

श्रीमतां व्याससूत्राणां श्रीकण्ठीयः प्रकाशते ।
मधुरो भाष्यसन्दर्भो महार्थो नातिविस्तरः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्याससूत्रमिदं नेत्रं विदुषां ब्रह्मदर्शने ।
पूर्वाचार्यैः कलुषितं श्रीकण्ठेन प्रसाद्यते ॥

सर्ववेदान्तसारस्य सौरभास्वादमोदिनाम् ।
आर्याणां शिवनिष्ठानां भाष्यमेतन्महानिधिः ॥

इहौपनिषदी मीमांसा समारभ्यते—तदारम्भोऽत्र किंपुरुषार्थः? पुरुषार्थो हि निरुपाधिकप्रेमविद्वेषास्पदयोः सुखदुःखयोः प्राप्तिरत्यन्तनिवृत्तिर्वा । कश्चेहाधिकारी? यस्यार्थित्वादयो धर्माः । किमस्य विषयः? यत्प्रसिद्धमनतिप्रसिद्धञ्च सन्देहडोलासमारूढं वर्तते । कस्यानन्तरमस्यारम्भः? यस्य नियतप्रयोजकतया पूर्वभावित्वमवगम्यते—इति श्रोतृजनमनश्शङ्काशूकसमुन्मूलनाय सर्वज्ञशिखामणिना भगवता व्यासेन समवतारितमिदं सूत्रम् अथातो ब्रह्मजिज्ञासेति । इदमेकमधिकरणं विषयसंशयपूर्वपक्षसिद्धान्तनिर्णयसङ्गतीनामाधारत्वमिहाधिकरणत्वम् । अत्राथशब्दोऽयमानन्तर्यार्थः; न त्वथ योगानुशासनमित्यादाविवाधिकारार्थः ।

**End:**

सर्वज्ञस्य सर्वशक्तेस्सर्वैश्वर्यसम्पन्नस्य सर्वानुग्राहकस्य सर्वकर्मसमाराध्यस्य निरस्तसमस्तदोषकळङ्कस्य निरतिशयमङ्गळगुणरत्नाकरस्य विरूपाक्षस्य परब्रह्मण उमापतेर्लोकं पदं निरवधिकानन्दप्रकाशं नित्यमक्षय(म)भिसम्पन्नास्सर्वज्ञत्वादियोगिनोऽनावृत्तिभया वर्तन्ते । एतदुक्तं भवति । यत्र देवा अमृतमानश(ा)नाः तृतीये धामान्यभ्ये(भ्यै)रयन्तेत्यादिषु श्रुता(नि,)निरतिशयानन्दप्रकाशघने ब्रह्मणि(शिवे सा)मरस्यमुपागता मुक्ता(:) प्रकाशवपुषः सर्वज्ञास्सर्वगताश्शाता(न्ता)नित्यपरमैश्वराराध(र्याधारा)[या]निश्शेषविगळितमलावरणास्सर्वत्र तद्दर्शिनः तदात्मानः तदीये परमाकाशलक्षणे धामानि स्वाभिमतानि प्राप्य स्वेच्छोपगतसकलकामास्तेन सह सर्वत्र विद्योतन्त इति सर्वं समञ्जसम्(मेव) ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति श्रीकण्ठशिवाचार्यविरचिते ब्रह्ममीमांसाभाष्ये चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

श्वेताचार्यपदद्वन्द्वशुश्रूषाद्योतिताध्वना ।
कृतमेतन्मया भाष्यं केवलं भक्तिमात्रतः ॥

---

## No. 5093. ब्रह्मसूत्रभाष्यव्याख्या—शिवादित्यमणिदीपिका.

## BRAHMASŪTRABHĀṢYAVYĀKHYĀ: ŚIVĀDITYAMAṆIDĪPIKĀ.

Substance, palm-leaf. Size, 15⅜ × 1½ inches. Pages, 264. Lines, 6 on a page. Character, Grantha. Condition, much injured. Appearance, old.

The fourth Pāda of the first Adhyāya complete. Breaks off in the first Pāda of the second Adhyāya.

The first leaf is lost.

A commentary on Śrīkaṇṭha's Bhāṣya on the Brahmasūtras: by Appayadīkṣita.

**Beginning:**

वचनं युक्तम् । तस्य निरालम्बनत्वात् । महतः परमव्यक्तमित्यत्र महच्छब्दस्य बुद्धेरात्मा महान्पर इति . . . . . . . . साङ्ख्यस्मृतिप्रसिद्धतत्त्वविशेषपरत्वाशङ्कानास्पदतया स्मार्तक्रमप्रत्यभिज्ञानासिद्धेः । साङ्ख्यपरिभाषासिद्धा . . . अव्यक्तपदरूढैः नैयायिककल्पितायाः पक्षसपक्षादिपदरूढेरिव अन्यत्र शब्दार्थनिर्णयानुपयोगित्वादित्यभिप्रायेण पृच्छति कथमिति । महदव्यक्तपुरुषाणामिति ।

**End:**

साक्षात्परम्परया वेति विशेषणमपहाय लाघवेन शब्दानामपृथक्सिद्धप्रवृत्तिनिमित्ताश्रयवाचकत्वकल्पनस्योचितत्वात् । तथा च तेषां साक्षा-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्प्रवृत्तिनिमित्ताश्रयेषु चिदचिद्वस्तुष्वपि शक्ति . . . . . वेदेऽपि तैस्त-द्बोधने न काचिदनुपपत्तिः । प्रत्युत साक्षात्त्वस्यौत्सर्गिकत्वाद्वेदेऽपि तद्बोधन एव स्वारस्यम् । अत(एव) . . . . . करणादिपूर्वपक्षेषु भूताकाशादिविषयश्रुत्युपन्यास इति भावः । यदि प्रधानकारणवादो वेदान्तार्थोऽभविष्यत् तदा वे . . . . . . . . . . . . पि निबन्ध उपालप्स्यत । न चोपलभ्यते ।

**Colophon:**

इति शिवातिवादिमूर्धन्यशिवदर्शनस्थापनधुरन्धरसकलदेवभूदेवप्रति-ष्ठापकश्रीमच्चिन्नबोम्मभूपालहृदयकमलकुहरविहरमाणश्रीमत्साम्ब . . . . श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्ग-राजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ श्रीकण्ठाचार्यविरचितब्रह्ममीमांसा-भाष्यव्याख्यायां शिवादित्यमणिदीपिकाख्यायां प्रथमस्याध्यायस्य चतुर्थः पादः ॥

अध्यायश्च समाप्तः ॥

स्मृत्यनवकाशदोष इतिचेन्नान्यस्मृत्यनवकाशदोषप्रसङ्गात् ॥

* * * *

कर्मानुष्ठानव्यग्र(ा)[ह]णां मन्वादीनाम्.

---

## No. 5094. ब्रह्ममीमांसाभाष्यव्याख्या—शिवादित्यमणिदीपिका.

### BRAHMAMĪMĀṀSĀBHĀṢYAVYĀKHYĀ: ŚIVĀDITYAMAṆIDĪPIKĀ.

Substance, paper. Size, $11\frac{1}{8} \times 8\frac{3}{4}$ inches. Pages, 178. Lines, 18 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

There are many lacunæ in the original from which this MS. has been transcribed.

The fourth Pāda of the first Adhyāya; wants the first Sūtra.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5095. भारतसारसङ्ग्रहः—सव्याख्यः.

## BHĀRATASĀRASAṄGRAHAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, 16⅝ × 1½ inches. Pages, 32. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, new.

Begins on fol. 22*a*. The other work herein is Śivakarṇāmṛta 1*a*.

Complete.

A commentary on a work called Bhāratasārasaṅgraha, which interprets the Mahābhārata so as to support the superiority of Śiva to Viṣṇu.

Both the original and the commentary are by Appayadīkṣita.

**Beginning :**

अथ श्रीमहाभारतस्य शिवपारम्यप्रख्यापनपरतामाविष्कर्तुं कृतस्य स्तोत्रस्यायमाद्यश्लोकः ।

श्रीबादरायणमुनिस्स्वयमेव विष्णुः पार्थच्छलात्तमधिकृत्य कृते प्रबन्धे ।
तस्यापि नित्यमहितं शशिभूषणत्वमाम्रेडयन् गुरुरदर्शयदादितत्त्वम् ॥

श्रीबादरायणनामा प्रसिद्धो मुनिः स्वयमेव विष्णुः—

"कृष्णद्वैपायनं व्यासं विद्धि नारायणं स्वयम् ।
को ह्यन्यः पुण्डरीकाक्षात् महाभारतकृद्भवेत्" इतिवचनात् ।

स च श्रीमहाभारताख्यं प्रबन्धं पार्थचरितवर्णनात्मकं तदनुषक्तश्रीकृष्णचरितान्तर्गततन्माहात्म्यवर्णनात्मकञ्च निर्ममे ।

"वासुदेवस्य माहात्म्यं पाण्डवानाञ्च सत्यताम् ।
दुष्टतां धार्तराष्ट्राणामुक्तवान् भगवानृषिः" ॥ इतिवचनात् ।

अत्र च प्रबन्धे पार्थानां नायकीकरणं व्याजमात्रं तत्संरक्षणजागरूकश्रीकृष्णमाहात्म्यवर्णनात्मकमेव तत्प्रवृत्तं तद्बाहुल्यात्, तदधीनत्वाच्च पाण्डवानां

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राज्यलाभस्य । भारतस्यादौ एवंभूतं श्रीमहाभारतं कुर्वाणः सर्वेषां ब्रह्मविदां गुरुर्भगवान् व्यासः श्रीकृष्णमाहात्म्यवर्णनद्वारा शिव एव परं ब्रह्मेति शिष्येभ्यः परं तत्त्वं दर्शयामास । . . . . एवंभूतं शिवमाम्रेडयन् पुनः पुनः कथयन् सन् प्रायः सर्वत्रापि हि महाभारते श्रीकृष्णस्य शिवपूजानिष्ठत्वं तत्प्रसादलब्धसकलप्रभाववत्त्वञ्च वर्ण्यते ।

**End :**

मोहोत्सन्नस्तु कौन्तेय रथोपस्थ उपाविशम् ।

इति आरण्यपर्वणि साल्वयुद्धे श्रीकृष्णस्य मोहाज्ञानवचनेनापि जीवविशेषः स्यात् । तस्मात् कृत्स्नमपि भारतं गीतानुगीतामोक्षधर्मवैष्णवधर्मशास्त्रसहितं विशेषध्वनिवृत्त्या शिवपारम्यविश्रान्तं तत्प्रधानमेव भगवता श्रीवेदव्यासेन कृतमित्येतत् सुप्रतिष्ठितमिति सर्वं समञ्जसम् ॥ अथ कृतस्य स्तोत्रस्य प्रचयगमनार्थं मङ्गलादीनीत्याप्तवाक्यप्रामाण्यात् स्तोत्रसमाप्तौ शिवपारम्योपदेष्टृगुरुनमस्काररूपं मङ्गलमाचरति ।

इत्थं चक्रे भारतं यः प्रबन्धं भक्त्या व्यासश्शाम्भवोत्कर्षवर्षी ।
ध्वन्यध्वन्यध्वन्यमूर्धन्यधन्यस्तं(शौ)रिं तत्साक्षिणञ्चानतोऽस्मि ॥

**Colophon :**

श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदप्पयदीक्षितकृतं भारतसारस्तोत्रविवरणं संपूर्णम् ॥

---

No. **5096.** भारतसारसङ्ग्रहः–सव्याख्यः.

BHĀRATASĀRASAṄGRAHAḤ WITH COMMENTARY.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 43. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Rāmāyaṇatātparyanirṇaya 23*a*.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Complete.

Same work as the above.

इति श्रीमदुद्भटाराध्यवंशार्णवपूर्णचन्द्राखिलशिष्याज्ञानतमोनिषूदनभास्कराघोरशरभसाल्वाद्यणुजातकवीरणाराध्यसूनुना सकलशिवभक्ताङ्घ्रिपद्मपरागलेशसमानेन मल्लिकार्जुनाख्येन सूरिणा भारतसारसङ्ग्रहस्तोत्रं लिखितम् ॥

---

## No. 5097. भूतसृष्टिः.

## BHŪTASṚṢṬIḤ.

Substance, palm-leaf. Size, $14\frac{1}{4} \times 2\frac{1}{8}$ inches. Pages, 4. Lines, 9 on a page. Character, Kanarese. Condition, slightly injured Appearance, old.

Begins on fol. 18*a*. The other works herein are Śivōtkarṣapratipādanagrantha 1*a*, Tryambakādisūktavivaraṇa 20*a*, Vaidyaviṣaya (Kanarese) 24*b*, Khilaṛk 26*a*, Śāstrasanmaṅgalāditvavicāra 30*a*.

Incomplete.

A tract to show that the universe emanated from Śiva.

**Beginning:**

तैत्तिरीये—

यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति . . . . . . . . . . . .
यस्माद्ब्रह्मा विष्णुर्जातवेदाः । नमस्तस्मै रुद्ररूपाय तुभ्यं तन्मे मनः शिवसङ्कल्पमस्तु । श्वेताश्वतरे—

यो देवानां प्रभवश्चोद्भवश्च विश्वाधिको रुद्रो महर्षिः । हिरण्यगर्भं जनयामास पूर्वम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End:**

शब्दस्तवायमभिधानमनन्यशब्दो नैघण्टुकाः शिवपदादिवदेनमाहुः ।
वस्तुस्वभावकृतमेव तु पूज्यभावं ब्रूते महेश्वर महान् परमश्च शब्दः ॥
ईश ऐश्वर्ये इत्यस्य धातोरीशपदश्रुतिम् ।

श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये परदौर्बल्यमर्थविप्रकर्षात् . . . . . . . . प्रमाणम । तस्मादीशे ऐश्वर्यवद्वस्तुनि.

---

## No. 5098. रत्नत्रयपरीक्षा—सव्याख्या.

### RATNATRAYAPARĪKṢĀ WITH COMMENTARY.

Pages, 3. Lines, 6 on a page.

Begins on fol. 1*a* of the MS described under No. 854.

Incomplete.

A collection of 8 stanzas with a commentary, establishing the superiority of Śiva as the Supreme Lord : by Appayadīkṣita.

**Beginning:**

श्रीवीतानन्दचरणं ध्यात्वा दीक्षितसत्कृतिम् ।
रत्नत्रयपरीक्षाख्यां सव्याख्यां विलिखाम्यहम् ॥

अथ रत्नत्रयपरीक्षाख्यामष्टश्लोकीं सङ्क्षेपेण व्याकुर्महे—

नित्यं निर्दोषगन्धं निरतिशयसुखं ब्रह्म चैतन्यमेकं
धर्माधर्मेति भेदद्वयमयति पृथग्भूय मायावशेन ।
धर्मस्तत्रानुभूतिस्सकलविषयिणी सर्वकार्यानुकूला
शक्तिश्चेच्छादिरूपा भवति गुणगणश्चाश्रयस्त्वेक एव ॥

नित्यं दोषगन्धेनापि रहितं निरतिशयसुखात्मानमद्वितीयं ब्रह्म चैतन्यं मायया कल्पितभेदं सत् धर्माधर्मविभागं प्राप्नोति । जीवब्रह्मविभागवदयं धर्मधर्मिविभागोऽपि । तत्र धर्मः स्वरूपमात्रप्रकाशरूपस्य धर्मिणः परब्रह्मणः सकलप्रपञ्चविषयानुभूतिर्भवति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदुक्तं कूर्मपुराणे शिवेनैव—

तयाहं संगतो देव्या केवलो निष्कळ[ङ्क]: परः ।
पश्याम्यशेषमेवेदं यस्तद्वेद समुद्यतः ॥ इति ।

**End:**

अतो धर्मज्ञानरूपा चिदम्बरशक्तिरेव आकाश इत्यवसीयते । तत्र आ समन्तात्काशयति सर्वं प्रपञ्चमवभासयतीति परब्रह्मणः सर्वविषय(क)ज्ञानरूपे तस्मिन्नवयवार्थानुगतिसद्भावात् ।

यस्य सा परमा देवी शक्तिराकाशसंज्ञिता ।
अनन्तैश्वर्ययोगात्मा महेशो दृश्यते हि सः ॥

इति श्रीकूर्मसूक्त्या तस्याकाशशब्दवाच्यत्वावगमात् ।

छान्दोग्योपनिषदि मन्त्रभाष्ये—

ऋतं सत्ये प्रतिष्ठितं भूतं भविष्यता सह ।

इति भूतभविष्यद्वर्तमानसकलप्रपञ्चाधारत्वेन प्रकृते सत्ये आकाश उपनिरज्यतु मह्यमथो श्रियमिति आकाशशब्दप्रयोगेण अक्षरधर्मिको बृहदारण्यकोक्ताकाश एव अयं जगदाधार इत्यवसितम् । अत्र ऋतशब्देन अवित(त)थवाचिना तादृग्विषयतया निश्चितत्वात्पारिशेष्याच्च वर्तमानत्वमुक्तमेव स्पष्टीकृतम् ।

---

No. **5099.** रामायणतात्पर्यनिर्णयः.

RĀMĀYAṆATĀTPARYANIRṆAYAḤ.

**Pages,** 42. Lines, 7 on a page.

Begins on fol. 23*a* of the MS. described under No. 5096.

An interpretation of the Rāmāyaṇa in accordance with the view that Śiva is the Supreme Brahman : by Appayadīkṣita.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Beginning:**

इह खलु भगवान् प्राचेतसो मुनिवरः कमलासनवरलब्धसकलार्थवेदनः श्रीरामचरितवर्णनात्मकं श्रीरामायणाख्यं महदादिकाव्यं निर्मिमाण एव तत्र तत्र निबद्धैः श्रीरामचन्द्रवचनैस्तच्चरितविशेषैर्मुखान्तरवचनैश्च शिवस्यैव सकलदेवतातिशायित्वं व्यञ्जयामासेति एतदर्थप्रतिपादकं शिवस्तोत्रमारभमाणः प्रतिपाद्यमर्थं तावत्प्रतिजानीते—

वाल्मीकिरादिकविराडखिलार्थदर्शी साक्षाद्विरिञ्चिरिव सम्प्रतिपन्नभावः ।
विश्वेशविष्णुमधिकृत्य कृते प्रबन्धे व्यक्त्या तथैव निबबन्ध परं परत्वम् ॥

व्यक्त्या व्यञ्जनाख्यया वृत्त्या । तत्र तावदगस्त्याश्रमप्रवेशसमये श्रीरामचन्द्रवचनैः कविवचनैश्च शिवमहिमातिशयमाविष्करोति—

रामायणे हि कलशप्रभवाश्रमस्था देवादयोऽपि तमुपासत इत्युदीर्य ।
स्थानानि धातृमधुजिन्मघवन्मुखानां तस्याश्रमे निगदितानि न ते कपर्दिन् ॥

**End:**

तस्माद्विभीषणप्रपदनस्य फलगौरवकृतं पारिभाषिकमपि प्रधानप्रतिपाद्यत्वं न सम्भवतीति पूर्वोक्तरीत्या रामायणे प्रायस्सर्वत्र ध्वन्यमानं शिवपारम्यमेव तस्य प्रधानप्रतिपाद्यमिति सिद्धम् । यद्यपि ध्वन्यमानत्वाविशेषाद्रामायणे तत्र तत्र व्यञ्जितः शृङ्गारवीरकरुणाद्भुतरौद्रादिको रसः देवतागुरुनृपपितृपुत्रादिविषयो रत्यादिरूपो भावोऽपि प्राधान्यमर्हति, तथापि श्रीमद्रामायणे सर्वत्र प्रतीतिः(तः) शिवपारम्यरूप एव वस्तुध्वनिः प्राधान्यमश्नुत इति अत्र नास्ति विमत्यवकाशः । अतो रामायणं शिवमहिमप्रख्यापनप्रधानं भवत्ये(वे)ति सिद्धम् । कृतस्तोत्रस्य प्रचयगमनार्थं समाप्तौ गुरुदेवतानमस्कारात्मकम्—

प्राचेतसाय कवये प्रथमाय तस्मै तत्काव्यहारतरळाय च राघवाय ।
विश्वात्मने तदुभयस्थिरभावलक्ष्मीमुख्यास्पदाय विभवे च नमश्शिवाय ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति श्रीमद्भारद्वाजगोत्रपवित्रसकलविद्वदग्रगण्यविश्वजिद्याजिरङ्गराजाध्वरीन्द्रसूनोरप्प(य)दीक्षितस्य कृतौ श्रीरामायणतात्पर्यनिर्णयात्मिका सम्पूर्णा ॥

---

No. **5100.** विशेषार्थप्रकाशः.
VIŚEṢĀRTHAPRAKĀŚAḤ.

**Pages, 45. Lines, 6 on a page.**

Begins on fol. 25*a* of the MS. described under No. 5075.

Complete in 5 Adhikaraṇas.

A work in the form of a dialogue in metre bringing out the meaning and aim of the Śiva-siddhānta-tantra.

The transcription of this manuscript was completed on Sunday the 15th of Āṣāḍha Śukla in the year Ānanda.

**Beginning:**

श्रीमदैपुरसोमेशलिङ्गायालिङ्गरूपिणे ।
लिङ्गाङ्गैक्यस्वालिङ्गाय नमस्ते लिङ्गमूर्तये ॥
नमश्शब्द उमा साक्षाच्छिवशब्दश्शिवः स्वयम् ।
अयशब्दस्तयोर्योगः सोमतत्त्वमुपास्महे ॥
शिवो लिङ्गमुमैवाङ्गमनया सहितः स्वयम् ।
सोमस्सम्बन्ध इत्येवं पदत्रयमुपास्महे ॥
ततः परं प्रवक्ष्यामि विशेषार्थप्रकाशकम् ।
शिवसिद्धान्ततन्त्रोक्तं संवादं गुरुशिष्ययोः ।
तत्रादौ षट्स्थलब्रह्मोपदेशविधिरुच्यते ॥
द्वितीये कथ्यते सम्यक्छिवलिङ्गार्चनक्रमः ।
श्रीमत्प्रसादसद्भावस्तृतीये परिगीयते ॥
चतुर्थे षट्स्थलब्रह्मपुरश्चरणमुच्यते ।
अवसानविधानं यत्पञ्चमे परिकीर्त्यते ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवं पञ्चाधिकरणं विशेषार्थप्रकाशकम् ।
शिवानुभवसूत्रार्थं क्रमादेव निरूप्यते ॥

गुरुः—

अथ ते षट्स्थलब्रह्माख्योपदेशविधिं परम् ।
प्रवक्ष्यामि विशेषेण शिवसिद्धान्ततन्त्रजम् ॥
पुरा यथोपदिश्योक्तं षट्स्थलब्रह्म शम्भुना ।
षण्मुखायोपदिष्टार्थस्तदेवेहाधुनोच्यते ॥
षडध्वशुद्धिर्या प्रोक्ता षट्स्थलब्रह्म शाम्भवम् ।
उपदेशं षडध्वानो मन्त्राध्वाद्यादयः क्रमात् ॥
मन्त्राध्वा च पदाध्वा च वर्णाध्वा चेति शब्दतः ।
भुवनाध्वा च तत्त्वाध्वा कळाध्वा चार्थतः स्मृताः ॥
कृत्वा सर्वं यथाकालं यथाशक्ति यथाविधि ।
यथोचितं विधातव्यं तत्र भक्त्या समाहितः ॥

*　　*　　*　　*

**Colophon :**

इति श्रीविशेषार्थप्रकाशके षट्स्थलब्रह्मोपदेशविधिर्नाम प्रथमाधिकरणम् ॥

इति श्रीशिवसिद्धान्ततन्त्रविशेषार्थप्रकाशके गुरुशिष्यसंवादे शिवलिङ्गार्चनक्रमो नाम द्वितीयाधिकरणम् ॥

इति श्री . . संवादे प्रसादसद्भावनिरूपणं नाम तृतीयाधिकरणम् ॥

इति श्री . . संवादे षट्स्थलपुरश्चरणविधिर्नाम चतुर्थाधिकरणम् ॥

**End :**

एत एवादिश स्वामिन् सोमेश्वर निरन्तरम् ।
कृपालय कृपाराम कृपाकर कृपानिधे ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कृपासिन्धो कृपाबन्धो कृपाभरण पाहि माम् ।
संसारबन्धनच्छेदकरज्ञानास्त्रद प्रभो ॥
श्रीमदैपुरसोमेश नमस्ते षट्स्थलात्मने ।
इति पूर्वोत्तरभागद्वयसमुचितमेतदभिहितं विहितम् ॥
शिवसिद्धान्ततन्त्रं शिवानुभवसूत्रं सम्पूर्णम् ॥
स्वानुभूतिविभवावगाहिना मायिदेवविभुना महात्मना ।
श्रीशिवानुभवसूत्रमुत्तरं तन्त्रमुक्तमतिशोभनं परम् ॥
य एतदाचरत्येवं स आचार्यवरो विभुः ।
परानुभवसूत्रोक्तं परमार्थं परं पदम् ॥

**Colophon:**

इति श्रीशिवसिद्धान्ततन्त्रे विशेषार्थप्रकाशके गुरुशिष्यसंवादे अव-सानविधानं नाम पञ्चमाधिकरणम् ॥

बाललिङ्गेन रचितं पद्यम्—

श्रीशैलोपरि संस्थितं परतरं चिद्व्यक्तवर्णं मह-
द्भावादित्रिविधप्रभावविभवैराकर्षितं देशिकैः ।
यल्लिङ्गं शिवयोगिहृन्मुखमुखैर्भुङ्क्ते पदार्थान्सदा
तद्वन्दे बसवाभिधं पुरहरव्याप्तप्रपञ्चं महः ॥

आनन्दनामसंवत्सरआषाडशुद्ध १५ आदिवारे प्रतिस्थक्रमेण अनु-भवसूत्रं विशेषार्थप्रकाशिकाश्च व्यलिखम् ॥

---

## No. 5101. विशेषार्थप्रकाशः.

## VIŚEṢĀRTHAPRAKĀŚAḤ.

Substance, paper. Size, $11\frac{1}{8} \times 7\frac{1}{8}$ inches. Pages, 59. Lines, 19 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Vātūlatantra 30*b*, Vīraśaiva-siddhānta 66*b*, Śīlasampādanakrama 88*b*, Āgama-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



sārasatakatraya 101*a*, Antyēṣṭividhi 119*a*, Vīrasaiva-siddhāntōttarakaumudī 85*a* and 147*a*.

Adhikaraṇas five complete.

Same work as the above.

---

## No. 5102. विशेषार्थप्रकाशः.

## VIŚĒṢĀRTHAPRAKĀŚAḤ.

Substance, palm-leaf. Size, 13 × 1¼ inches. Pages, 10. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Second Adhikaraṇa only complete.

Same work as the above.

---

## No. 5103. वीरशैवासिद्धान्तः.

## VĪRAŚAIVASIDDHĀNTAḤ.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 280. Lines, 7 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.

17 Nirṇayas complete.

On the doctrines of the Vīra-śaivas: by Śivayōgīndra. The Liṅgāyats are understood to be the Vīra-śaivas.

This manuscript contains certain Kanarese notes.

**Beginning:**

तत्र तत्करुणावाप्तविवेकविकसन्मनाः ।
कुलदीप[क]सिरीयाक(?)त्रिपुरारिवरात्मजः ॥
भक्त्या स पर्वतः श्रीमान् परिपूर्णगुणोदयः ।
प्र(णम्य दण्डवत्प्रा)ज्ञो विनयेन व्यजिज्ञपत् ॥
श्रीवीरशैवसिद्धान्ते एकोत्तरशतस्थली ।
(प्रसिद्धा)सद्गुरो तस्यास्त्वत्तो विविदिषास्ति नः ॥
इति विज्ञप्तिमाकर्ण्य तस्य वाराणसीश्वरः ।
स्वान्तेवासिनमग्रण्यं श्रीगिरीन्द्रं . . . . ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End :**

सर्वेषु सर्वदा व्याप्तः सर्वबन्धविवर्जितः ।
एकरूपो महादेवः स्थितस्सोऽहं परावृतः ॥
आत्मानं यदि निन्दन्ति स्वयमेव हि मानवाः ।
. . रं यदि निन्दन्ति सहायास्ते जना मम ॥

अहं मनुरभवं सूर्यश्च ।

**Colophon :**

इति श्री . . . . . . . शिवयोगीन्द्रविरचितवाक्ये अखण्डब्रह्माण्डैक्योपदेशप्रकरणं नाम सप्तदश[क]निर्णयः समाप्तः ॥

जीवन्मुक्तिप्रकरणं कथ्यते बालबुद्धये ।
यथाङ्गीकुर्वते सख्यो यथावति(दि) . . . . ॥
आनन्दं ब्रह्मणो विद्वानित्येतच्चेति सम्मतम् ।
ब्रह्मानन्दं प्रवक्ष्यामि ज्ञानिनां चित्तशुद्धये ॥

---

No. **5104.** वैदिकविजयध्वजः.

VAIDIKAVIJAYADHVAJAḤ.

Pages, 54. Lines, 7 on a page.

Begins on fol. 7*a* of the MS. described under No. 854.

Incomplete.

A work in support of the view that Śaṅkarācārya was an incarnation of Śiva and that his commentary on the Brahmasūtras is therefore fully authoritative.

**Beginning :**

श्रीभगवत्पादावतारप्रमाणानि सौरपुराणे—

व्याकुर्वन्व्याससूत्राणि श्रुतेरर्थं यथोचितम् ।
स एवार्थः श्रुतेर्ग्राह्यः शङ्करस्सविता न नु(ना) ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न (ना) न मनुष्यः; किन्तु शिव एवेत्यर्थः । तथाच कौर्मपूर्वार्ध सप्तविंशाध्याये—

करिष्यत्यवताराणि शङ्करो नीललोहितः ।
श्रौतस्मार्तप्रतिष्ठार्थं भक्तानां हितकाम्यया ॥
उपदेक्ष्यति तच्छास्त्रं यज्ज्ञानं ब्रह्मसंज्ञितम् । (इति) ।
उपदेक्ष्यति शिष्याणामिति स्मृत्यन्तरे . . . ।

भविष्यत्पुराणेऽपि—

द्वापरे द्वापरे विष्णुर्व्यासरूपी महामुने ।
चतुर्भिस्सह शिष्यैस्तु शङ्करोऽवतरिष्यति ॥ (इति) ।

विष्णुधर्मोत्तरे पुष्करोपाख्यानेऽपि ।

**End:**

देवदेव महादेवो यथा सर्वैः प्रपूज्यते ।
तथैव वैदिको मर्त्यः पूज्यस्सर्वजनैरपि ॥
आदित्येन विहीनन्तु जगदन्धं यथा भवेत् ।
तथा वैदिकहीनन्तु जगदन्धं न संशयः ॥
अहो वैदिकमाहात्म्यं मया वक्तुं न शक्यते ।
प्राणेन्द्रियविहीनन्तु शरीरं कुणपं यथा ॥
तथा वैदिकहीनन्तु जगद्व्यर्थं न संशयः ।
वेद एव तु माहात्म्यं वैदिकस्याब्रुवन्मुदा ॥
स्मृतयश्च पुराणानि भारतादीनि सुव्रताः ।
वैदिकस्य तु माहात्म्यं प्रवदन्ति सदा मुदा ॥
वेदोक्तं तान्त्रिकास्सर्वे कुर्वन्तिहि(न्तीह) द्विजर्षभाः ।
नोपजीवन्ति तन्त्रोक्तं . . . . . . . . . ॥

इत्यलम् ।

वक्तव्यं सकलं . . . वेदान्तमतनिर्णये ।
इतः परञ्च वक्तव्यं न किञ्चिदिह विद्यते ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पञ्चानामपि भाष्याणां मूल एव न दृश्यते ।
शास्त्रषट्कोक्ततन्त्र . . . . . पञ्च च ॥
स्मृतिष्वष्टादशस्वत्र . . . . स्मृतिष्वपि ।
पुराणोपपुराणेषु ख्यातेष्वष्टादशास्विह ।
अथर्वणेतिहासेषु तन्त्रेष्वष्टादशस्वपि ॥
अन्येष्वपि च . . . . . . . . . ।

---

## No 5105. शास्त्रसन्मङ्गलादित्वविचारः.
## ŚĀSTRASANMAṄGALĀDITVAVICĀRAḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 30*a* of the MS. described under No. 5097.

Complete.

On the necessity of using expressions signifying Śiva as the supreme abode of all auspiciousness, in the beginning of all scientific and philosophical treatises: by Sarvajñagaṅgādhara. The word Atha is itself made to mean Śiva.

**Beginning:**

अथोच्यमानशास्त्रस्य मङ्गलं मूल(मुच्यते) ।
अतस्तन्मङ्गलं वक्ष्ये शास्त्रवेदोदितं पुरा ॥
वस्तुनिर्देश आशीर्वा नमस्कारश्च तन्मुखम् ।
निर्दिष्टवस्तुकथनं वस्तुनिर्देश उच्यते ॥

**End:**

वाच्यस्य गुणदोषाभ्यां सुष्ठुता दुष्ठुता गिरः ॥
कारणात्त्र स्वतस्तस्मादथ वाच्यः शिवस्स्मृतः ।
अथार्थस्सकलकल्याणगुणैकपु(ता)न ईश्वरः ॥
शिव इत्युच्यते सर्वैः शिवतत्त्वार्थवेदिभिः ।
सर्वमङ्गलरूपं तद्वस्तुरूपं परं शिवम् ॥
निर्दिश्यस्स्वशास्त्रादावथशब्दः प्रभाषितः ।
ततः सकलशास्त्राणि मङ्गलादीकृतानि वै ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुरुणा सर्वज्ञगङ्गाधरनाम्नोदिते शुभे ।
शास्त्रे सन्मङ्गलादित्वमुक्तं शास्त्रोक्तवर्त्मना ॥

---

No. 5106. शिखरिणीमाला–शिवतत्त्वविवेकसहिता.

SIKHARIṆĪMĀLĀ WITH ŚIVATATTVAVIVĒKA.

Substance, paper. Size, 14⅝ × 9½ inches. Pages, 133. Lines, 37 on a page. Character, Telugu. Condition, good. Appearance, not old.

Complete.

A short work consisting of 60 stanzas on the greatness of Śiva. It is called Śikhariṇīmālā because the verses are composed in the Śikhariṇī metre. The commentary called Śivatattvaprakāśikā is by Appayadīkṣita.

**Beginning:**

यस्याहुरागमविदः परिपूर्णशक्तेरंशे कियत्यपि निविष्टममुं प्रपञ्चम् ।
तस्मै तमालरुचिभासुरकन्धराय नारायणीसहचराय नमश्शिवाय ॥
आकर्णकृष्टधनुराहितमोहनास्त्रमाराग्निरीक्ष्य मदनं कुपितस्य किञ्चित् ।
शम्भोस्समाधिसमये विकसत्कृशानुज्वालाकलापजटिलं नयनं स्मरामि ॥

सर्वविद्यालतोपघ्नपारिजातमहीरुहान् ।
महागुरून् नमस्यामि सादरं सर्ववेदसः ॥

निगमशिरसि निष्ठा नित्यवस्तुन्यभीप्सा
भवचरणसरोजे भक्तिरव्याजसिद्धा ।
त्रयमपि हृदि येषां त्रातृ संसारशोकात्
सहजमुपगतं ते सन्तु सन्तस्समृद्धाः ॥

पश्चैषदृष्टया पशुपतिमहं देवमस्ताविषं यै-
रन्तस्सारैरखिलजगतामन्तरात्मानमेकम् ।
भावं तेषां प्रविशदयितुं भग्नवाचाटवाचां
वृत्तिं कुर्वे विषमविवृतिं वृद्धवर्त्मानुगानाम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यद्यपि निष्कळं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् । यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा यत्र त्वस्य सर्वमात्मैवाभूत् तत्केन कं पश्येत्—इति श्रुतिः ।

प्रत्यस्तमितभेदं यत् सत्तामात्रमगोचरम् ।
वचसामात्मसंवेद्यं तज्ज्ञानं ब्रह्मसंज्ञितम् ॥

इत्यादिस्मृतिसन्दोहसन्दर्भसम्प्रतिपन्नं निरस्तसमस्तकर्तृकर्मादिभेदप्रपञ्चमखिलवाङ्मनसपथातीतं निर्गुणं शिवतत्त्वं न स्मृतिगोचरीकर्तुं शक्यम्; तथापि मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम् ।

* * * *

तमालश्यामलगलं लसत्फालविलोचनम् ।

इत्यादिश्रुतिस्मृतिशतप्रतिपन्नं स्वाधिष्ठितानिर्वचनीयमायाकल्पितगुणाभोगं . . . . . . . . . . . . . . . .

उमासहायं परमशिवशब्दितं तस्यैव सगुणं रूपं गौतमदधीच्यादिशापनिर्मूलितपरमशिवपदनळिनभक्तिलेशकलिमलमलीमसहृदयकुहरविश्रान्तदुरन्तदुरितानुबन्धितं निन्दामुखरमुखबिलकुमतिकुलप्रलापदूरीकरणेन विश्वाधिकत्वविश्वसेव्यत्वव्यवस्थापनपरैः चतुष्षष्ट्या पद्यैः स्तोतुकामः परमशिवस्वरूपमहिमविषयग्रन्थनिर्माणे तदवबोधं विनानधिकारात् तस्य यमेवैष वृणुते तेन लभ्यः स नो बुद्ध्या शुभया संयुनक्तु । ईश्वरात् ज्ञानमिच्छेत् । इत्यादिश्रुतिस्मृतिभिः तत्प्रसादैकलभ्यत्वप्रतिपादनात् । तत्रच—

यथान्तरोपचारेण नरः स्त्रीषु प्रसीदति ।
तथान्तरेण ध्यानेन प्रसीदति महेश्वरः ॥

इत्यादिस्मृतिभिः अन्तरनुसन्धानस्यान्तरङ्गोपायत्वोपदेशादिदमेव सर्वोत्कृष्टं मङ्गळमिति हृदयेनादौ कृतं ध्यानं श्लोकेन निबध्नन् आरिप्सितस्तोत्रव्यवस्थापनीयमप्यर्थं सूचयति—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीकान्तद्रुहिणोपमन्युतपनस्कन्देन्द्रनन्द्याद्यः
प्राचीना गुरवोऽपि यस्य करुणालेशाद्गता गौरवम् ।
तं सर्वादिगुरुं मनोज्ञवपुषं मन्दस्मितालङ्कृतं
चिन्मुद्राकृतमुद्रपाणिनळिनं चित्ते शिवं कुर्महे ॥

तस्मात्सह तया शक्त्या . . . . गुणालयम् ।

इत्यादिपुराणवचनानुरोधात् ब्रह्मविद्याधिदेवतया सदाशिवाङ्कमारूढशक्तिरिच्छाह्वया शिवा । इति शिवपुराणोक्तेः भगवत इच्छाशक्तिरूपया.

* * * *

एवंभूतं शिवं चित्ते कुर्महे ध्यायामः । अत्र श्रीकान्तेत्यादिना विशेषणेन स्तोत्रेण व्यवस्थापयिष्यमाणं शिवस्य विश्वाधिकत्वं विश्वसेव्यत्वञ्चोपक्षिप्तं मन्तव्यम् । एवं परदेवतामनुसन्धाय व्यवस्थापयिष्यमाणसकलार्थप्रमाणभूतां परविद्यामनुसन्धत्ते—

परशिवपरोत्कर्षप्रख्यापनैकपरायणा पवनतपनव्यासाद्युक्त्युत्करैरुपबृंहिता ।
कुमतिपरिषच्चेतःकीलायितार्थनिबन्धना जयतु नितरामाद्या विद्या जनस्य [हितैषिणी ॥

मूर्तित्रयातीतो मायाशिवः परमशिवः । तदीयनिरतिशयो . . . . . . . . . . परब्रह्मणः स्तुतौ स्वस्य नाधिकार इत्याक्षिप्य समाधत्ते—

प्रभावं ते नालं परशिव परिच्छेत्तुममरा
नरः स्तोतुं वाञ्छन् न कथमपहास्यत्वमयताम् ।
तथापि त्वन्नामस्मृतिगुणनिकापुण्यभजनं
कुतोऽप्यस्तु द्वारादिति मतिरिह प्रेरयति माम् ॥

**End:**

एवं मूर्खाणां शिवभजनवैमुख्यस्य पापपरिपाकरूपत्वं प्रदर्शितम् । तद्वैमुख्यस्य पापसाध्यत्वे दृष्टद्वारोपन्यासेन तदेव दृढीकृत्य स्वस्य शिवभजनैकान्त्यसम्पादनेन सकलभयसन्तारकस्य निरतिशयपुरुषार्थरत्नाकरस्य बोधस्य स्थैर्यं प्रार्थयते—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भ्रमान्मोहाल्लोभान्मतदुरभिमानादथ(पि) मुधा
नयन्त्यायुर्नाशं शिव तव पदाम्भोजविमुखाः ।
वयं तावत्सर्वे सह सुतकळत्रादिभिरिमे
भवामस्ते दासा इति मतिरियं मेऽस्तु सुदृढा ॥

भ्रमः शास्त्रसिद्धदेवतापरापरभावादिविपर्ययज्ञानम् । मोहः तदज्ञानम् । लोभः आभिमानिकसम्प्रीणनेनोदरभरणदुराशा । मतदुरभिमानः प्राक्स्वीकृतकुमतदुराग्रहः । अपिशब्देन प्राचीनदुर्वासनानुवृत्तिः [व्याजशिवमेकं] समुच्चीयते । शिवदास्यस्यानादिसिद्धत्वेनाप्रार्थनीयत्वात् तत्स्थैर्यमेव प्रार्थितम् ।

अथैवमारचितं स्तोत्रमुपहारमालारूपणेन भगवत्पादाम्बुजयोस्समर्पणेन भगवन्तं प्रसादयन् एतत्स्तोत्रप्रचारमुपायमुखेन प्रार्थयते—

इति विरचिता पद्यैष्षष्ट्या पदाम्बुरुहद्वयेऽ-
पि च शिखरिणीमाला लीलाकिरातसमर्पिता ।
अनुदिनमिमामित्थं सद्यः(परं) पठति प्रभो
स तव लभतां साकं कुल्यैः कटाक्षकृपामृतम् ॥

अथैवं स्तोत्ररचनायां मन्दमतेः भ्रान्त्यादिकृतस्य तस्य तत्त्वार्थे स्खालित्यस्यावर्जनीयत्वापचारः प्रार्थ(नीय) इति भीतस्तदपनयार्थमाह—

क्वाहं मूढः क्व तव महिमा निर्जरैरप्यमेयः
स्तोत्रव्याजादयमपि महान् केवलं मेऽपचारः ।
किन्तु स्वामिन् सदसदपि वा भक्तिपूर्वं कृतं यत्
भक्तिग्राह्यस्तदखिलमपि क्षाम्यसीति श्रमोऽयम् ॥

वेदाहमेतमिति यन्महिमावबोधं नारायणस्स भगवानवदत्स्ववाचा ।
स्वस्यातिगौरवकरं तव शेषमूलं कोऽन्यः परं शिवमिहार्हतु नाम बोद्धुम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति श्रीशिखरिणीमालाव्याख्याने शिवतत्त्वविवेकाख्याने श्रीसदाशिवस्य विश्वसेव्यत्वव्यवस्थापनपरिच्छेदः ॥

सदाशिवपदाम्भोजसक्तधीरप्पदीक्षितः ।
समग्रहीत्समस्तानां सारमेकं(तं) त्रयीगिराम् ॥
विभक्तार्थं विश्वेश्वरमहिमपारायणमिदं
गभीरैर्मीमांसाद्वयनयनिबन्धैस्सुघटितम् ।
धिया किञ्चित्पूर्वापरगतिविचारावग[ति]तया
हवि(न मु)श्चन्तस्सन्तः सुचिरमनुगृह्णन्तु विबुधाः ॥

---

No. 5107. शिवज्ञानतारावली.
ŚIVAJÑĀNATĀRĀVALĪ.

Pages, 8. Lines, 4 on a page.

Begins on fol. 150*a* of the MS. described under No. 5087.

Complete.

A pamphlet proving Śiva to be the Supreme God: by Sōsali-Vīraṇārādhya.

**Beginning:**

गुरुं सर्वेश्वरं वन्दे वारणानी(सी)श्वरात्मजम् ।
भवद्रुमाग्निज्ञानाब्धिचन्द्रमन्तस्तमोरविम् ॥
षट्त्रिंशत्तत्त्वमूर्धा यस्सोऽगम्यो निगमागमैः ।
चिद्रूपो व्यापको नित्य एकोऽस्ति परमश्शिवः ॥

**End:**

तपोध्वं तेन किं सौख्यमद्वैतात्परमं सुखम् ।
एतदाब्रह्मपशुपं सिद्धं शास्त्रगणैः किमु ॥
मूढाः पश्यन्ति शास्त्रेषु दर्पणे कङ्कणं यथा ।
संयुक्तं शिवयोर्लिङ्गं सृष्टिस्थितिलयालयम् ॥

* * * *

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

वंशे श्रीरेणुकस्यामितकृतनिलयो वीरणाराध्यनामा
पुत्रस्तस्य व्यधत्तागमनिगमपरां देशिकेन्द्रोपदेश्याम् ।
*   *   *   *
. . . . . मनुगां ज्ञानताराविलं ताम् ॥

इति श्रीमद्वेदवेदशिर(श्शिवागमपुराणप्रभृतिप्रवीणश्रीमत्सोसलि)वीरणाराध्यकृता श्रीशिवज्ञानताराविलः परिसमाप्ता ॥

---

No. 5108. शिवज्ञानदीपिका.
ŚIVAJÑĀNADĪPIKĀ.

Substance, paper. Size, 13 × 8¼ inches. Pages, 100. Lines, 23 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Contains Paṭalas 1 to 25 in the first Kāṇḍa

On the means conducive to the attainment of salvation through the realization of Śiva : by Ādināthamahāyōgin

**Beginning:**

ऐश्वरं परमं तत्त्वमादिमध्यान्तवर्जितम् ।
आधारं सर्वलोकानामनाधारमविक्रियम् ॥
अनन्तानन्दबोधाम्बुनिधिमद्भुतविक्रमम् ।
अम्बिकापतिमीशानमनिशं प्रणमाम्यहम् ॥
एकदा योगिनः केचिच्छिवज्ञानपरायणाः ।
कैलासं प्राप्य शैलेन्द्रं ददृशुश्चन्द्रशेखरम् ॥
*   *   *   *
मनो भवति डम्भात्मा साध्ये कर्मण्यसाधकः ।
तं प्राहू राजसं प्राज्ञोऽकालक्षेपगुणान्तरम् ॥
कर्मण्यसाध्ये यो(चो)द्युक्तो मोहाद्युक्तो जडाशयः ।
असाधको यदि पुनस्तं प्राहुस्तामसं जडम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



असाध्यमपि यत्कर्म यो(यः)साधयति यत्त(त्न)तः ।
तं प्राहुस्सात्त्विकं प्राज्ञास्सर्वकार्यगुणोत्तरम् ॥

**End:**

योगमार्गस्य का सिद्धिः कथं सत्त्वगुणोद्भवः ।
ब्रूहि मे विस्तराद्ब्रह्मन् संशयस्तत्र बाधते ॥

श्रीभगवानुवाच—

योगानां बहुरूपाणां सिद्धयः कोटिकोटयः ।
हठादीनां सुदुर्गाणां कथ्यते श्रूयतां शिवे ॥
विरूपाक्षादियोगीन्द्राः साधु साध्वित्यपूजयन् ।

**Colophon:**

इति श्रीपरमरहस्यतन्त्रे शिवज्ञानदीपिकायामुमामहेश्वरसंवादे परमहंसपरब्रह्मविद्यायां महाविश्वरूपनिसर्गमहाविभूतिदर्शनं नाम पञ्चविंश[ति]ः पटलः ॥

इति परमहंसपरिव्राजकाचार्येण अष्टाङ्गयोगविलसत्कलावलयितेन आदिनाथमहायोगिना प्रस्तारितः प्रथमः काण्डः समाप्तः ॥

---

## No. 5109. शिवज्ञानबोधः.

## ŚIVAJÑĀNABŌDHAḤ.

Substance, palm-leaf. Size, 12 × 1⅜ inches. Page, 1. Lines, 11 on a page. Character, Grantha. Condition, good. Appearance, not old.

Begins on fol. 1*a*. The other work is Śivajñānabōdhalaghuṭikā 1*b*.

Complete.

The Pāśavimōcana-Paṭala of the Rauravāgama.

**Beginning:**

स्त्रीपुंनपुंसकादित्वाज्जगतः कार्यदर्शनात् ।
अस्ति कर्ता स हृत्वैतत् सृजत्यस्मात्प्रभुर्हरः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्यस्सन् व्याप्तितोऽनन्यः कर्ता कर्मानुसारतः ।
करोति संसृतिं पुंसामाज्ञया समवेतया ॥

नेतितो ममतोद्रेकादक्षोपरतिबोधितः ।
स्वापे निर्भोगतो बोधे बोद्धृत्वादस्त्यणुस्तनौ ॥

आत्मान्तःकरणादन्योऽप्यन्वितो मन्त्रिभूपवत् ।
अवस्थापञ्चकस्थोऽतो मलरुद्धस्स्वदृक्क्रियः ॥

विदन्त्यक्षाणि पुंसार्थान् न स्वयं सोऽपि शम्भुना ।
तद्विकारी शिवश्चेन्न कान्तोऽयोवत् स तं नयेत् ॥

अदृश्यं चेदसद्भावो दृश्यं चेज्जडिमा भवेत् ।
शम्भोस्तद्व्यतिरेकेण ज्ञेयं रूपं विदुर्बुधाः ॥

नाचित् चित्सन्निधौ वेत्ति न वित्तस्ते उभे मिथः ।
प्रपञ्चशिवयोर्वेत्ता यस्स आत्मा तयोः पृथक् ॥

**End:**

चिद्दृशात्मनि दृष्ट्वेशं त्यक्त्वा वृत्तिमरीचिकाम् ।
लब्ध्वा शिवपदच्छायां ध्यायेत् पञ्चाक्षरं सुधीः ॥

शिवेनैक्यं गतस्सिद्धः तदधीनस्ववृत्तिकः ।
मलमायाद्यसंस्पृष्टो भवति स्वानुभूतिमान् ॥

दृशोर्दर्शयिता चात्मा तस्य दर्शयिता शिवः ।
तस्मात्तस्मिन् परां भक्तिं कुर्यादात्मोपकारके ॥

मुक्त्यै प्राप्य सतस्तेषां भजेद्वेषं शिवालयम् ।
एवं विद्याच्छिवज्ञानबोधे शैवार्थनिर्णयम् ॥

**Colophon:**

रौरवागमे पाशविमोचनपटलस्समाप्तः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## No. 5110. शिवज्ञानबोधलघुटीका.

## ŚIVAJÑĀNABŌDHALAGHUṬĪKĀ.

**Pages**, 11. Lines, 11 on a page.

Begins on fol. 1*b* of the MS. described under No. 5109.

A brief commentary on the work noticed under the previous number : by Śivāśramayōgin.

**Beginning :**

शिवज्ञानबोधलघुटीका—

ज्ञानानन्दमयं शुद्धं हरणोत्पत्तिकारणम् ।
पाशविच्छेदकं वन्दे पशूनां पतिमव्ययम् ॥

अथ भगवान् श्रीकण्ठपरमेश्वरः धर्मार्थकाममोक्षेषु पशूनां पुरुषार्थेषु परमप्रयोजनपूर्वमोक्षं तत्साधनपूर्वपदार्थत्रयविवेकं च पृष्टो नन्दिकेश्वराय समस्तागमसाररौरवागमान्तर्गतं द्वादशसूत्रात्मकं शिवज्ञानबोधाख्यं शास्त्रमुपदिष्टवान् । तत्रादौ तावत् पतिपशुपाशेषु प्रधानभूततया पतिपदार्थं निरूपयिष्यन् तत्साधकमनुमानमादिमसूत्रेण निबध्नाति—

(मू.)

स्त्रीपुंनपुंसकादित्वाज्जगतः कार्यदर्शनात् ।
अस्ति कर्ता स हृत्वैतत् सृजत्यस्मात्प्रभुर्हरः ॥

(अस्यार्थः)—

कार्यदर्शनात् कार्यत्वदर्शनात् जगतः महीतर्वादे कर्तास्ति । जगतः कार्यत्वं वा कुत इत्यत आह—स्त्रीपुंनपुंसकादित्व(ादि)ति । अत्र स्त्रीपुंनपुंसकशब्दे(न) तद्देहा उच्यन्ते । आदिशब्देनेन्द्रियाणि तदादित्वात् तत्प्रकारकत्वात् तद्वत्सावयवत्वादित्यर्थः । स किं करोति? तत्राह—सृजति । सः कर्ता एतत् जगत् हृत्वा उपसंहृत्य पुनः सृजतीत्येतेन संहारकर्तुरेव स्वामित्वमित्याह—अस्मादिति । अस्मादुक्तयुक्त्या हरः देहेन्द्रियादिरहितः सर्वोपसंहारशक्तिमानेव प्रभुरीश्वरः । अत्र चास्तीत्यनेन चैकत्वं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विवक्षितम् । तेन च समस्तोपसंहारकत्व एव सिद्धौ तस्यैव सृष्ट्यादिकर्तृत्वमुचितमिति प्रथमसृष्टौ शिव एव कर्ता तदनुग्रहेण चानन्तेश्वरेण हिरण्यगर्भादीनामवान्तरकर्तृत्वमिति तन्त्रान्तरेणाविरोधो द्रष्टव्यः ॥

**End:**

मुक्त्यै प्राप्य सतस्तेषां भजेद्वेषं शिवालयम् ।
एवं विद्याच्छिवज्ञानबोधे शैवार्थनिर्णयम् ॥

एवमिति । शिवज्ञानबोधे शास्त्रे शैवार्थनिर्णयं शैवार्थस्य पूर्वोक्तस्य निर्णयम् एवं विद्यात् उक्तेनैव प्रकारेण जानीयात्; न तु प्रकारान्तरेणेति सर्वमवदातम् ॥

**Colophon:**

इति श्रीमदतिवर्णाश्रमाचार्यवर्यशैवपरिपालकशिवाश्र(म)योगिविरचिता शिवज्ञानबोधलघुटीका संपूर्णा ॥

---

No. **5111.** शिवतत्त्वरत्नाकरः.

ŚIVATATTVARATNĀKARAḤ.

Substance, paper. Size, $10\frac{7}{8} \times 8\frac{5}{8}$ inches. Pages, 622. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new.

To the end of the 12th Taraṅga of the 6th Kallōla.

An exhaustive treatise on Śaiva-Vēdānta: by Kēḷadī Basavarāja.

**Beginning:**

श्रियै नः शिवलिङ्गं स्यात्सर्वादिगुरु निर्मलम् ।
अन्तर्याम्यखिलाधारः सच्चिदानन्दविग्रहः(म्) ॥

भुजङ्गकलितस्रजं वरमतङ्गजत्वग्युजं
कपर्दधृतचन्द्रकं पदकमार्गकोपीन्द्रकम्(?) ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्फुरद्द्विभिकपालकं ज्वलननेत्रयुक्फालकं
गळप्रकटमेचकं शिवमुपास्महे मोचकम् ॥

त्रिलोकपरिरक्षिणी खलसमूहसंशिक्षिणी
श्रिताभिमतपूरणी श्रुतिशिरोऽन्तसञ्चारिणी ।
जगत्प्रळयसाक्षिणी करुणगर्भितावेक्षिणी
शिवस्य चरणाम्बुजे प्रि(प्र)यतमावतां नोऽस्य हि ॥

यद्रूपमास्थाय शिलादनाम्ने तपोधनाय प्रससाद शम्भुः ।
यस्यानुगाश्च प्रमदास्समस्ता वन्दामहे नन्दिनमिन्दुगौरम् ॥

दक्षाध्वरध्वंसनदक्षशक्तिः श्रितेष्टविश्राणनसानुरक्तिः ।
करान्तरान्दोळितचन्द्रहासः स वीरभद्रोऽस्तु मुदे सहासः ॥

जातस्तत्पुरुषाह्वयाद्वदनतो यो रेवणीसिद्धराट्
किञ्चाघोरमुखाच्च यो मरुळसिद्धेशः प्रसिद्धोऽभवत् ।
जज्ञे कामदवामदेववदनाद्यः पूजिताचार्यकः
सद्योजातमुखोदितोऽप्यवतु मां यश्चैकरामो गुरुः ॥

आसीदुज्जयिनीपतिर्मरुळसिद्धेशो गुरुप्रस्फुरत्-
पादेशोऽथ वसन्तदेवमहितश्रीमल्लिकाद्यार्जुनौ ।
वीरश्रीनपरस्ततो गुरुपदस्वामी वसन्तस्ततः
तस्मादुन्नतचेन्नवीरविभुरित्याचार्यपारम्परी ॥

यत्कर्णताळप्रसरत्समीरवराङ्कुराशाभ्यवहारतृप्ताः ।
भूषाभुजङ्गा विलसन्ति यस्य सोऽयं दिशेद्विघ्नशमं गजास्यः ॥

शुभगुणनिकुरम्बामिन्दुचिह्नत्कबिम्बां
पुळिनजयिनितम्बां पल्लवाभोष्ठबिम्बाम् ।
कृतनमदवलम्बां दत्तसारोक्तिगुम्भां
करसदमृतबिम्बां नौम्यहं शारदाम्बाम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुणैरशेषैरवधूतदोषैरवाप्तपोषैर्जनदत्ततोषैः ।
या वासभूमिः परिचीयते स्म तां चेन्नमाम्बां जननीं नतोऽस्मि ॥

सोमशेखरपदं स्फुटमुद्यत्सर्वमङ्गळतयाजनि यस्मिन् ।
काममाश्रितजनाय दिशन्तं कल्पसालमिव तं प्रणतोऽस्मि ॥

नीतिं नीतिपरा विलोक्य सुकलाभेदान् विनोदार्थिनः
तन्त्राण्यत्र च तान्त्रिकास्सुमहितान् भोगांश्च यो(भो)गेष(च्छ)वः ।
मोक्षश्चापि मुमुक्षवो द्रुत(बुध)जना जानन्त्विति प्रेक्षया
ग्रन्थस्सोऽयमुदाररीतिरधुना निर्मातुमारभ्यते ॥

वृत्त्या सुयोजितपदाप्यपरिस्फुटापि सम्भिन्नवर्णरचनाप्यधिकार्थिकापि ।
एषा कृतिर्मधुरबालकगीरिवार्यैर्नेया विमृश्य विबुधैरनवद्यभावा ॥

निजफणितिविशेषैस्तोषयन्तोऽपि लोकान्
न वचनरचनायां सादराः किं परेषाम् ।
स्वफलसलिलपूरैः प्रीणयन् सन्नपीक्षोः(ष्टो)
न भवति जलसेकी किं न्वसौ की(के)रवृक्षः ॥

आख्यान्तु दूषणगणानिह केऽपि लोकाः
किं तावतास्य विदितास्सुगणा गळन्ति ।
चन्द्रः कळङ्कित इतीह गिरा तदीया
निश्शेषलोकपरितोषकता व्यपैति ॥

कामं वस(द)न्त्विह परश्शतदूषणानि सन्तस्तथापि सुगुणान्परमाद्रियन्ते ।
ग्राहादिघातुकदुरासदसत्त्वपूर्णं रत्नाकरं जगति वार्धिमुदाहरन्ति ॥

दोषालोकमुहुस्समाहितदृशः प्रायः परेषां कृतौ
दृष्ट्वा तद्गुणजातमन्तरधिकं सन्तापमाबिभ्रतः ।
निन्दान्यद्य किमु स्तवानि किमिति प्रव्यक्तचिन्ताद्वयी-
सन्धिप्रस्फुटदौस्स्थ्यदूनहृदया ये सन्ति तेभ्यो नमः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लोकानान्तु हिताय सारकिळतीसिंहासनाधीश्वरो
गौरीनाथकृपार्चिताखिलकलापाण्डित्यविभ्राजितः ।
कुर्वेऽहं बसवेन्द्रभूमिरमणो रत्नाकराख्यां कृतिं
सर्वं प्रेक्ष्य च वाक्प्रपञ्चमसकृत्पुत्र त्वमाकर्णय ॥

सर्वज्ञसर्वविनियामकविश्वभर्तृभास्वन्महीश्वरसमन्वितशक्तिजातम् ।
जानीहि वर्णपदमन्त्रमयं च नामरूपं जगद्भुवनतत्त्वकलास्वरूपम् ॥

नानाभूषाललीलाजयसमुपनतानेकलोकप्रतीत-
प्रौढस्तोत्रैकपात्रं बिरुदचयमतीवोन्नतं त्वं बिभर्षि ।
श्रीमद्राजाधिराज स्फुरदखिलकलासारवेदिन्निदानीं
स्वामिन् प्रख्यातकीर्ते नृपकुलतिलक श्रोतुमिच्छामि शंस ॥

वस्तुजातं चक्षुरादिबहिरिन्द्रियगोचरम् ।
यदस्ति तत्समस्तञ्च कस्माज्जातं कियद्विधम् ॥

किम्प्रमाणञ्च किंरूपमेतन्मह्यं निरूपय ।

श्रीसोमशेखरकुमार कुमारभावं सौन्दर्यसन्मतिमुखैस्सुगुणैर्बिभर्षि ।
कोऽप्येष शङ्करकृपाकलिताप्रभावादास्ते विवेकविभवस्तव मञ्जुळोऽयम् ॥

सम्यक्पृष्टं त्वया पुत्र बुद्धिस्ते सूक्ष्मदर्शिनी ।
या पुनर्दुर्विबोधेऽस्मिन् विषये सम्प्रवर्तते ॥

आकर्णयोत्तरं तस्य यज्ज्ञातुमभिकाङ्क्षसि ।

विद्याःसमस्तास्समवेक्ष्य भूयस्संमृश्य चार्थानिह पद्यरूपैः ।
वचोनिगुम्भैश्शिवतत्त्वरत्नाकराभिधानां कृतिमारचय्य ॥

स्वामिन् दृष्टाखिला विद्याः कृतिरेषा वितन्यते ।
इत्युदीरितमेतर्हि ता विद्याः का वदस्व मे ॥

समाकर्णय यत्पृष्टं तद्ब्रवीमि कुमार ते ।
अष्टादश महाविद्याः प्रथमं परिकीर्तिताः ॥

* * * *



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon:**

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानबिन्दुकारणचिदम्बर-शक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारदश्रीमत्केळदीबसव-राजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्रसारभूतशिवतत्त्वरत्नाकरे प्रथम-कल्लोले विराट्पुरुषादिमूर्तित्रयस्वरूपतत्त्वप्रभेदपञ्चीकरणविभागप्रदर्शनं नाम सप्तमस्तरङ्गः ॥

एवं सप्ततरङ्गेषु भुवनोदयधामसु ।
नवोत्तरा पञ्चशती पद्यानामिह सङ्ख्यया ॥
वेदागमपुराणानां सारसङ्ग्रहरूपकम् ।
वीरशैवशिखारत्नं शैवामृतपुराणकम् ॥
दशाङ्गसूक्ष्युद्धरणं वाक्यग्रन्थं विलोक्य च ।
तथैव चानादिवीरशैवाचारस्य सङ्ग्रहम् ॥
निर्मितोऽयमभूदाद्यः कल्लोलः सुधियां मुदे ।
श्रीमत्सद्गुणसोमशेखरलसच्चेन्नाम्बिकासूनुना
श्रीदीक्षागुरुचेन्नवीरकरसञ्जातेन गौरीपतेः ।
भूयः पूर्णकृपाजुषा बसवराजेन्द्रेण क्लृप्ते पुनः
कल्लोलः परिपूरितः कृतु(ति)वरे तस्मिन्नभूदादिमः ॥
हारीभूतफणीन्द्रमौळिमणिषु . . . . . ।
. . . . . . . . . . . . . . ॥

**Colophon:**

समाप्तः प्रथमः कल्लोलः ॥

इति श्रीमदनाद्यनन्त . . . . . शिवतत्त्वरत्नाकरे द्वितीय-कल्लोले शाकद्वीपादिकटाहान्तवर्णनं नामाष्टमस्तरङ्गः ॥

ग्रन्थास्तु षट्शतान्येकचत्वारिंशच्च सङ्ख्यया ।
तरङ्गैरष्टभिर्युक्ते कल्लोलेऽस्मिन् द्वितीयके ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महाभारतवाराहे कौर्मे स्कान्दश्च वैष्णवम् ।
कुमारीकाण्डशैवादि सङ्गृह्यायं कृतोऽभवत् ॥

श्रीमत्सद्गुणसोमशेखरलसच्चेन्नाम्बिकासूनुना
श्रीदीक्षागुरुचेन्नवीरकरसञ्जातेन लब्धश्रिया ।
गौरीभर्तुरनुग्रहाद्बसवराजेन्द्रेण क्लृप्ते पुनः
कल्लोलः परिपूरितः कृतिवरे तस्मिन् द्वितीयोऽभवत् ॥

इति श्रीमत् . . शिवतत्त्वरत्नाकरे तृतीयकल्लोले शिवलोकादिकटाहान्तवर्णनं नाम सप्तमस्तरङ्गः ॥

तरङ्गैस्सप्तभिर्युक्ते कल्लोलेऽस्मिन् तृतीयके ।
ग्रन्थानां षट्शती पञ्चचत्वारिंशत्समान्विता ॥

महाभारतवाराहे कौर्मे स्कान्दश्च वैष्णवम् ।
कुमारीकाण्डशैवादि सङ्गृह्यायं कृतोऽभवत् ॥

श्रीमत्सद्गुण . . कल्लोलः परिपूरितः कृतिवरे त्वस्मिन् तृतीयोऽभवत् ॥

इति श्रीमत् . . शिवतत्त्वरत्नाकरे चतुर्थकल्लोले नरपतिसिंहासनवृत्तान्तवर्णनं नाम द्वादशस्तरङ्गः ॥

द्विचत्वारिंशदधिकशतोत्तरसहस्रकम् ।
ग्रन्था रवितरङ्गाढ्ये कल्लोलेऽस्मिंश्चतुर्थके ॥

पुराणस्मृतिसिद्धान्तानितिहासविमिश्रितान् ।
विद्यारण्यकृतिश्चैव पितामहसुसंहिताम् ॥

विलोक्यायं विरचितः कल्लोलोऽभूच्चतुर्थकः ।

श्रीमत्सद्गुण . . परिपूरितः कृतिवरे तस्मिंश्चतुर्थोऽभवत् ॥

इति श्रीमत् . . शिवतत्त्वरत्नाकरे पञ्चमकल्लोले राजसप्ताङ्गकथनं नाम पञ्चदशस्तरङ्गः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कामन्दकीयनीतिश्च गुरुभार्गवयोर्मतम् ।
व(उ)ड्डामरेश्वरं तन्त्रं खण्डं सह्याद्रिनामकम् ॥
निधिप्रदीपिकाश्चैव ज्योतिषार्णवमेव च ।
आगमं शिल्पशास्त्रश्च शास्त्रं शकुनबोधकम् ॥
आलोक्य सङ्गृहीतोऽयं कल्लोलः पञ्चमोऽभवत् ।
तरङ्गैरन्वितः पञ्चदशसङ्ख्यासमन्वितैः ॥
सैकत्रिंशत्पञ्चशताभ्यधिकन्तु सहस्रकम् ।
ग्रन्थानामत्र कल्लोले सङ्ख्या समवलोक्यताम् ॥
श्रीमत् . . कल्लोलः परिपूरितः कृतिवरे तस्मिन्नभूत्पञ्चमः ॥

**End :**

विस्तीर्णे ललिते सुधाधवळिते चित्रादिनालङ्कृते
रम्ये प्रोन्नतचत्वरेऽगरुमहाधूपादिपुष्पान्विते ।
सङ्गीताङ्गविराजिते स्वभवने दीपप्रभाभासुरे
निश्शङ्कं सुरतं यथाभिलषितं कुर्यात्समं कान्तया ॥

**Colophon :**

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानबिन्दुकारणाचिद्म्बरशक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारदश्रीमत्केळदीबसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्रसारभूतशिवतत्त्वरत्नाकरे षष्ठकल्लोले कामशास्त्रे जातिस्वभावगुणदेशधर्मचेष्टादिनिरूपणं नाम द्वादशस्तरङ्गः ॥

---

No. **5112.** शिवतत्त्वरत्नाकरः.

ŚIVATATTVARATNĀKARAḤ.

Substance, paper. Size, $10\frac{7}{8} \times 8\frac{5}{8}$ inches. Pages, 645. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new.

From the 13th Taraṅga of the 6th Kallōla to the end of the 9th Taraṅga of the 9th Kallōla.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



The second volume of the work noticed under the previous number.

**Beginning:**

षष्ठकल्लोले कामशास्त्रे जातिस्वभावगुणदेशधर्मचेष्टादिनिरूपणं नाम द्वादशस्तरङ्गः ॥

जातिस्वभावादिकमीरितं प्रागथोच्यते बाह्यरतोपयोगः ।
आदौ रतौ बाह्यमिह प्रयोज्यं तत्रापि चालिङ्गनपूर्वमेतत् ॥
अजातजातस्मरकेळिभेदाद्द्विधा पुनर्द्वादशधा च तत्स्यात् ।
यद्योषितस्संमुखमागताया अन्यप्रदेशाद्व्रजतो नरस्य ॥
गात्रेण गात्रं घटते रतज्ञा आलिङ्गनं स्पृष्टकमेतदाहुः ।
यद्वृहती कश्चन वञ्चिताक्षं स्थितोपविष्टं पुरुषं स्तनाख्यम् ॥

**Colophon:**

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानबिन्दुकारणचिदम्बरशक्तिसमन्वितपरमेश्वरप्रसादासादिताशिवाद्वैतविद्याविशारदश्रीमत्केळदीबसवराजेन्द्रविरचितवेदागमान्तर्गतविविधविद्यातन्त्रसारभूतशिवतत्त्वरत्नाकरे षष्ठकल्लोले विषचिकित्सायां मन्त्रद्रव्यागदवीरभद्रनायकचरित्रवर्णनं नाम सप्तविंश[ति]स्तरङ्गः ॥

दत्तिलेन कृतं नन्दिभृङ्गिकोहलकादिभिः ।
भरतश्चादिभरतं गीतरत्नाकरं तथा ॥
उत्पलाद्यं परिमळं कृतं शार्ङ्गधरस्य च ।
विश्वकर्माख्यमययोर्मतश्च वरुणार्गळम् ॥
वात्स्यायनीयं नन्दीशगोर्नि(णि)कापुत्रयोर्मतम् ।
मतं शुक्रबृहस्पत्योः रत्नशास्त्रञ्च सर्वतः ॥
मतं नळस्य गौर्याश्च धन्वन्तर्यश्विनोस्तथा ।
रसरत्नाकरं तद्वत् रसादिहृदयं तथा ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



खनिशास्त्रं मन्त्रशास्त्रं योगरत्नावलिं तथा ।
प्रयोगसारञ्च तथा विहगेन्द्रस्य संहिताम् ॥
आलोक्यायं सङ्गृहीतः कल्लोलः परिपूरितः ।
त्रिसाहस्री सप्तशती द्वाविंशतिरतः परम् ॥
ग्रन्थानां दृश्यतां सङ्ख्या षष्ठे कल्लोलके त्विह ।
विचित्रार्थाश्रयास्त्वत्र तरङ्गास्सप्तविंशतिः ॥
श्रीमत्सद्गुणसोमशेखरलसच्चेन्नाम्बिकासूनुना
श्रीदीक्षागुरुचेन्नवीरकरसञ्जातेन गौरीपतेः ।
हेवाकेन पदाम्बुजे च बसवक्षोणीभृता निर्मिते
कल्लोलः परिपूरितः कृतिवरे त्वस्मिन्नभूत् षष्ठकः ॥

इति श्रीमत् . . शिवतत्त्वरत्नाकरे सप्तमकल्लोले योगोपदेशवर्णनं नाम पञ्चदशस्तरङ्गः ॥

हरमेखलिकातन्त्रं मेरुतन्त्रं ततः परम् ।
मानसोल्लासमपि कौतुकचिन्तामणिन्तथा ॥
वाग्भटञ्चामृतानन्दं कृतिञ्च दशरूपकम् ।
विद्यानाथकृतिञ्चैव पुराणानां समुच्चयम् ॥
सामुद्रतिलकं होराशास्त्रं वाराहसंहिताम् ।
बार्हस्पत्यं पालकाप्यं शालिहोत्रञ्च गारुडम् ॥
नळस्य नकुलस्यापि मतं पाराशरन्तथा ।
शिवयोगं शिवालोकं हठयोगप्रदीपिकाम् ॥
एताः कृतीस्समालोक्य ग्रन्थान् सङ्गृह्य तद्गतान् ।
पूरितोऽयं समभवत् कल्लोलस्सप्तमस्त्वयम् ॥
तरङ्गैः पञ्चदशभिः शोभमाने विशेषतः ।
एकाशीत्यभ्यधिकया चतुश्शत्या समन्वितम् ॥
सहस्रद्वितयं ग्रन्थाः कल्लोले त्वत्र सप्तमे ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमत्सद्गुण . . कल्लोलः परिपूरितः कृतिवरे त्वस्मिन्नभूत्सप्तमः ॥

इति श्रीमत् . . शिवतत्त्वरत्नाकरे अष्टमकल्लोले चेन्नाम्बिका-चरित्रमाहेश्वरमहिमतद्दानफलातिशयादिवर्णनं नामाष्टमस्तरङ्गः ॥

पाराशरं मानवञ्च याज्ञवल्क्यकृतिं तथा ।
मतं परशुरामस्य द्रोणाचार्यस्य चैव हि ॥
वाराहीं संहिताञ्चैव वातुळं पारमेश्वरम् ।
आगमञ्चोपनिषदं जाबालाख्यां ततः परम् ॥
शिवागमञ्च सङ्गृह्य कल्लोलः [परि]पूरितोऽष्टमः ।
एकादशाधिकं त्वत्र सहस्रं ग्रन्थसम्मितिः ॥
तरङ्गैरष्टसङ्ख्याकैरस्मिन् समुपलक्षिते ।

श्रीमत्सद्गुण . . कल्लोलः परिपूरितः कृतिवरे त्वस्मिन्नभूदष्टमः ॥

**End :**

तेषु श्रेष्ठा महाभाग महालिङ्गाङ्गसङ्गिनः ।
लिङ्गाङ्गसङ्गिष्वधिकः षट्स्थले ज्ञानवान्नरः ॥
तस्मादभ्यधिको नास्ति त्रिषु लोकेषु सर्वदा ।
एवं षट्स्थलभेदाश्च तत्स्वरूपञ्च कीर्तितम् ॥
पूर्वोक्तानादिभक्तस्य सत्यनिर्मलताजुषः ।
एतानि षट्स्थलान्येव त्वं जानीहि षडङ्गकम् ॥
इदमेवं परं ब्रूमो हितं तव विशेषतः ।

एतादृशं मनसि तत्त्वमनादिभक्तशब्देन कीर्तितमुपास्य च सर्वकालम् ।
आचन्द्रतारमवनीपतिसेविताङ्घ्रिपङ्केरुहो ननु कुमार सुखी भव त्वम् ॥
यत्पादपङ्कजमतीव सुदुस्तरं तत् निर्धूय बोधमयदीपमपि प्रबोध्य ।
निर्वापितामितमहाहृदयान्धकारविद्यासुखार्णवगुरो ध(श)रणं मम स्याः ॥
दैत्याप्सरस्सुरनरोरगतर्कवेदनानागमानुगपुराणमतादिभिश्च ।
यन्मृग्यते जगति तादृशतत्त्वदर्शिन् विद्यासुखार्णवगुरो शरणं मम स्याः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पञ्चाध्वनामुपरि यास्ति कला तदूर्ध्वं विद्योतमानगगनामलशक्त्यतीते ।
योगप्रदातरि विनीतपरस्वरूपे विद्यासुखार्णवगुरो शरणं मम स्याः ॥

**Colophon:**

इति श्रीमदनाद्यनन्तसकलतत्त्वोत्तीर्णषडध्वोपादानबिन्दुकारणचिदम्बर-शक्तिसमन्वितपरमेश्वरप्रसादासादितशिवाद्वैतविद्याविशारदश्रीमत्केळदीबसव-राजेन्द्रविरचिते वेदागमान्तर्गतविविधविद्यासारभूते शिवतत्त्वरत्नाकरे नवम-कल्लोले षट्स्थलज्ञाननिरूपणं नाम नवमस्तरङ्गः ॥

शरीराख्योपनिषदं गर्भोपनिषदं तथा ।
पुराणानि कृतिश्चैव शैवसिद्धान्तदीपिकाम् ॥
मीमांसान्यायकाणादयोगवेदान्तसाङ्ख्यगाः ।
बौद्धचार्वाकजैनीयाः कृतीश्चागमविस्तरम् ॥
आलोक्यायं सङ्गृहीतः कल्लोलो नवमोऽभवत् ।
तरङ्गैर्नवभिर्युक्ते ग्रन्थानां मितिरत्र तु ॥
पञ्चविंशत्यभ्यधिकशतोपेतसहस्रकम् ।
श्रीमत्सद्गुणसोमशेखरलसच्चेन्नाम्बिकासूनुना
श्रीदीक्षागुरुचेन्नवीरकरसञ्जातेन विद्याब्धिना ।
गौरीभर्तृकृपास्पदेन बसवक्षोणीभृता निर्मिते
कल्लोलो नवमः स्वयं कृतिवरे त्वस्मिन्नभूत्पूरितः ॥

शिवतत्त्वरत्नाकरस्समाप्तः ॥

विषयसूचिका—

विचित्रनानाविषयाभिरामे मनोज्ञबन्धेऽत्र महाप्रबन्धे ।
वेद्यावबोधार्थमहं प्रमेयसङ्क्षेपमुद्देशमुखेन कुर्वे ॥
ग्रन्थेऽस्मिन् नव कल्लोलाः चित्रार्थरचनाश्रयाः ।
कल्लोलेषु तरङ्गास्तु नवस्वष्टोत्तरं शतम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कल्लोले प्रथमे तत्र तरङ्गास्सप्तसम्मिताः ।
द्वितीयेऽष्टतरङ्गास्तु तृतीये सप्तसंमिताः ॥
चतुर्थे द्वादशमिताः ते पञ्चदश पञ्चमे ।
कल्लोले त्वत्र षष्ठे तु तरङ्गास्सप्तविंशतिः ॥
सप्तमे पञ्चदश ते तेऽष्टसङ्ख्याः स्युरष्टमे ।
कल्लोले नवसङ्ख्याकास्तरङ्गे नवमे स्फुटाः ॥
इत्थमष्टोत्तरशतं तरङ्गा इह कीर्तिताः ।

वेदागमान्तर्गतसर्वविद्याः प्रोक्तास्तु नाम्ना प्रथमे तरङ्गे ।
उक्ता द्वितीयेऽत्र समासतोऽर्थाः पूर्वोक्तविद्यासमुपाश्रयास्तु ॥

* * * *

तरङ्गेऽष्टोत्तरशततमे लिङ्गार्चनक्रमः ।
विहितो वीरशैवानां षट्स्थलोद्बोध एव च ॥
एवमष्टोत्तरशततरङ्गेष्वर्थसङ्ग्रहः ।
ग्रन्थेऽस्मिन् पद्यसङ्ख्या तु सहस्राणि त्रयोदश ॥

**Colophon :**

श्रीवीरभद्रकरुणासमुपार्जितश्रीसाम्राज्यवैभवपराक्रमकीर्तिभावा(जा) ।
गोराष्ट्रचतौळवसकेरळमल्लराष्ट्रत्रैगर्तदेशपरिपालनदाक्षिणेन ॥

परयडवमुरारीकोटिकोलाहलेन प्रविशवि(दि)तविशुद्धाद्वैतसिद्धान्तभूम्ना ।
असियुगळभृताश्वद्वैरिसप्ताङ्गलक्ष्मीहरहरितपरोद्यत्केतनश्रीयुतेन ॥

चौडप्पनायकसमुन्मिषितान्वया(वा)यदुग्धाब्धिवृद्धिकरकैरवबान्धवेन
एकाङ्गवीररणरङ्गविहारधीरदोनेजपाश्चिमसरखदधीश्वरेण ॥

स्वाभीष्टदायिकेळदीस्थिरवीरभद्रमुद्राबलेन परिपालयता धरित्रीम् ।
राजाधिराजकेळदीबसवक्षितीन्द्ररत्नेन संविरचितेति कृतिः प्रपूर्णा ॥

श्रीमत्युन्नतशालिवाहनशके चन्द्राग्न्यृतुक्ष्मामिते
वर्षे विश्रुतसर्वधारिणि तथा मासे नभस्याह्वये ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वारे निर्जरवैरिणामपि गुरोः श्रीपौर्णमासीदिने
ग्रन्थोऽयं परिपूर्णतामवहत प्रख्यातसारार्थयुक् ॥
अनुत्तरगभीरिमा बहुतरङ्गकल्लोलवान्
उदित्वरकलाश्रयो महितरत्नलक्ष्म्यान्वितः ।
अयं जनितधीसुधस्स शिवतत्त्वरत्नाकरः
क्षितौ विजयतां चिरं कृतिवरोऽखिलाश्चर्यकृत् ॥
शक्यस्तरीतुं न भवेत्परैर्य आदेयतामप्यखिलस्य धत्ते ।
स एष भूयश्शिवतत्त्वरत्नाकरस्सतां कौतुकमातनोतु ॥
दोषैरेष विवर्जितो बहुगुणैरालिङ्गितस्सप्रभः
सद्वृत्तो बहुळार्थयुङ्नवलसत्कल्लोलरत्नान्वितः ।
ग्रन्थोऽयं मणिहारवत्तव शतेनाष्टोत्तरेणाधुना
गौरीनाथ भवेत्तरङ्गमणिभिर्विभ्राजितो भूषणम् ॥
एतच्छास्त्रं ये पठन्ति शृण्वन्ति विलिखन्ति वा ।
तेषामायुररोगत्वपुत्रपौत्रादिसम्पदः ॥
धनधान्यसमृद्धिश्च सौभाग्यमपि चाधिकम् ।
प्रतिक्षणं सम्भवन्ति तरङ्गा इव वारिधेः ॥
साम्राज्यादिसुखानीह समासाद्य ततः परम् ।
शिवलिङ्गैकसम्पत्त्या परानन्दं भजन्ति ते ॥

---

## No. 5113. शिवाद्वैतम्.

## ŚIVĀDVAITAM.

Substance, palm-leaf. Size, 17½ × 1½ inches. Pages, 184. Lines, 7 on a page. Character, Kanarese. Condition, injured. Appearance, old.

Contains the following seven Paṭalas of which the first six are complete, and the 7th is incomplete.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१. तत्त्वभेदः
२. वर्णभेदः.
३. चक्रभेदः.
४. वर्गभेदः.
५. मन्त्रभेदः.
६. प्रणवभेदः.
७. ब्रह्मभेदः.

In the beginning 3 leaves are lost.
On the doctrines of the Śaiva-Advaita religion and philosophy. Deals elaborately with the Tattvas.

**Beginning:**

तस्य चिन्ता परा शक्तिः सहस्रांशेन जायते ।
तच्छक्तिस्तु सहस्रांशे(आदिशक्ति)समुद्भवा ॥
एषा वै पञ्चधा शक्तिः निष्कळश्चे(ळा चे)ति कीर्तिता ।
पराख्यशक्त्यादिशक्त्योस्सादाख्यस्य समुद्भवः ॥
प्रथमं शिवसादाख्यममूर्धन्तु द्वितीयकम् ।
तृतीयं मूर्तिसादाख्यं चतुर्थं कर्तृनामकम् ॥
पञ्चमं कर्मसादाख्यं पञ्चसादाख्यमुच्यते ।

**End:**

एणाजिनसमायुक्तमघोरं रौद्ररूपकम् ।
चतुर्वक्त्रं चतुर्बाहुं जटामकुटमण्डितम् ॥
द्वादशाक्षिसमायुक्तं दंष्ट्राकराळमास्यकम् ।
व्याघ्रचर्माम्बरधरं व्याघ्रचर्मोत्तरीयकम् ॥
पादनूपुरसंयुक्तं सर्वाभरणभूषितम् ।
* * * *
अघोररूपमेवं मे सर्वशत्रुजयं भवेत् ॥

---

No. **5114.** शिवाद्वैतप्रकाशकः.
ŚIVĀDVAITAPRAKĀŚAKAḤ.

Substance, palm-leaf. Size, $13\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 281. Lines, 8 on a page. Character, Kanarese. Condition, slightly injured. Appearance, old.
With brief notes in Kanarese.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Incomplete.
On Śaiva-Vēdānta religion and philosophy.
The subjects treated of herein are—

१. सर्वप्रपञ्चनिवृत्तिक्रमः.
२. विभूतिरुद्राक्षधारणपञ्चाक्षरोच्चारणविश्वासलिङ्गादिस्थलनिश्चयक्रमः.
३. इतरदेवताशक्तिनिरासादिस्थलनिश्चयक्रमः.
४. भविसङ्गनिरासादीष्टलिङ्गार्पणक्रमः.
५. भक्तादिशरणान्तस्थलक्रमः.
६. ज्ञानशून्यक्रमः.

The transcription of this manuscript is said to have been completed on Monday the 10th of Jyēṣṭha Kṛṣṇa in the year Dhātu.

**Beginning :**

तत्त्वमस्यर्थरूपात्मा निष्प्रपञ्चो निरञ्जनः ।
लोकानां कारणं कर्ता . . . . . . ॥
अनादिसिद्धसंस्कारकर्तृकर्मविवर्जितम् ।
स्वयमेव . . . स्वयमेव विलीयते ॥
अत(न्त)श्शून्यबहिश्शून्यशून्यशून्यदा(द)शा दिशः ।
सर्वशून्यनिराकारं निर्द्वन्द्वं परमं पदम् ॥
अस्तिनास्तिद्वयातीतमस्तिनास्तिसमन्वितम् ।
सर्वज्ञं सर्वरहितं तत्पदं विद्धि षण्मुक(ख) ॥
चैतन्यं शाश्वतं शान्तं व्योमातीतं निरञ्जनम् ।
नादबिन्दुकलातीतं तस्मै श्रीगुरवे नमः ॥
अलक्षमद्वयं शून्यममूर्तं परमव्ययम् ।
अनाममकुलं शुद्धमनाद्यं शिवमुच्यते ॥
न ब्रह्माद्यै(दि)र्न विष्णुश्च न रुद्रो न रविर्विदु(धु)ः ।
नाग्निर्व्योमसमीराम्बु न भूमिर्न ग्रहोऽपि सः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न तत्त्वप्रचयं काले शिवमेकोऽस्ति केवलम् ।
शिवोऽस्ति सच्चिदानन्दपरिपूर्णो निरञ्जनः ॥
अकारणमकार(र्ये)श्च मनोवाचामगोचरम् ।
आदिरत्यश्च(न्त) शून्यश्च व्योमाव्योमविवर्जितः ॥
ध्यानज्ञानमयाहीनं शून्यलिङ्गमनाश्रयम् ।

**Colophon :**

इति सर्वशून्यस्थलं सम्पूर्णम् ॥

**End :**

सर्वाकारे चिदानन्दसच्चिद्रूपिणि शाश्वते ।
पराकाशमये तस्मिन् परब्रह्मणि लीयते ॥
एकीभूतमुपेतानां योगिनां परमात्मनाम् ।
परावरपरिज्ञानं परिहासकथा कुतः ॥
अप्रमेये चिदाकारे ब्रह्मणोऽद्वैतवैभवौ(वे) ।
विविन(च्य)किं न जानाति स्वात्मनः परमेव वा ॥
प्रतीयमानौ विद्येते भावाभावौ न कुत्रचित् ।
लिङ्गैक्ये सति यत्तस्मात् भावाभावलयस्तदा ॥
परस्पर(स्य)संमोक्षाभावाभावविमोचनम् ।
ज्ञानं ब्रह्मणि यन्नास्ति ज्ञानशून्यस्थलं विदुः ॥
ज्ञातेन ज्ञानमालोक्य ज्ञानं ज्ञेये विलीयते ।
लक्ष्यलक्षणयोरैक्यं ज्ञानशून्यमितीरितम् ॥

* * * *

निर्विकल्पो निराधारो निर्गुणो निर(रु)पादि(धि)कः ।
प्रत्यक्षजगदाधारः पाहि(तु) मां शशिभूषणः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



No. **5115.** शिवोत्कर्षप्रतिपादनग्रन्थः.

ŚIVŌTKARṢAPRATIPĀDANAGRANTHAḤ.

Pages, 34. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 5097.
Incomplete.

This work establishes the supremacy of Śiva as the Highest Being with the aid of Upaniṣadic passages.

**Beginning:**

नादबिन्दुकलातीतं त्रिशक्त्यात्मत्रयाधिपम् ।
शब्दार्थात्मैकबीजं तं मेऽमितं नौमि शङ्करम् ॥
वेदास्त्वादौ प्रणववाच्यं तं मङ्गलमीश्वरम् ।
ततः स्तुवन्ति तन्मूर्तीन(र)ग्निसूर्यादिकान्सुरान् ॥
यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः ॥

यजुषि तैत्तरीयशाखायां सर्वमोङ्कार ईरितः—
ओमिति ब्रह्म । ओमितीदं सर्वम् । ओमित्येतदनुकृति- . . .
. . . . . . . . सत्यं ज्ञानमनन्तं ब्रह्म ।

मुण्डके—
ओमित्येतदक्षरमिदं सर्वं तस्योपाख्यानं ये तं भवद्भ- . . .
. . . . . . . यस्तं न वेद वेदैर्ब्रह्मणोऽस्य भविष्यति ।

तत्रैव ब्रह्मस्तुतिः—
त्वमक्षरं परं ज्योतिरोङ्कारं परमेश्वरम् ।
ब्रह्म तेजोमयं विश्वं तस्मै सूर्यात्मने नमः ॥ इति ।

श्वेताश्वतरे—यो देवानां देव . . ऋचा करिष्यति ।

अथर्वशिरसि—
य ओङ्कारस्स ओङ्कारः । . . स महेश्वरस्स महादेव इति ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**End :**

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात् । सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमिञ्ज(मी ज)नयन्देव एकस्तदुपासितव्यम् । यो ब्रह्मा ब्रह्मण उज्जभार प्राणीश्व(णैरिश)रः कृत्तिवासाः पिनाकी। ईशानो देवदेवस्तस्मै वै नमो नमः.

---

## No. 5116. शैवपरिभाषा.

## ŚAIVAPARIBHĀṢĀ.

Pages, 38. Lines, 8 on a page. Character, Grantha.

Begins on fol. 85*a* of the MS. described under No. 3944.

The first Pariccheda complete, the second incomplete.

Explains the meaning of certain technical words and expressions occurring in works on Śaiva-Vēdānta : by Śivāgrayōgin.

**Beginning :**

वन्दे तं परमेशानं सच्चिदानन्दलक्षणम् ।
सृष्ट्यादिपञ्चकृत्येशं पशूनां पतिमव्ययम् ॥
गणेशं षण्मुखं साम्बं चित्सभेशं गुरूनमन् ।
शिवभक्तानुमोदाय शैवभाषां वदाम्यहम् ॥

इह धर्मार्थकाममोक्षचतुर्विधपुरुषार्थानां मध्ये मोक्षस्य परमपुरुषार्थत्वात् तस्य च दीक्षादिना पाशापगमे पशौ शिवत्वाभिव्यक्तिरूपस्य पत्यनन्यतासाक्षात्कारेणैव प्राप्यत्वात् तादृशसाक्षात्कारस्यापि पतिपशुपाशाख्यपदार्थत्रयपरिज्ञानसाध्यत्वात् तत्परिज्ञानस्य च प्रमाणाधीनत्वात् प्रथममुद्देशलक्षणपरीक्षाभिः प्रमाणं निरूप्यते । तत्र पदार्थानां वस्तुमात्रकीर्तनमुद्देशः, लक्षणमसाधारणो धर्मः, लक्षितस्य लक्षणमुपपद्यते न वेति विचारः परीक्षा । अत्र प्रमाणानामुद्देशः—

प्रत्यक्षमनुमानञ्च सह शब्देन शाङ्करे । इति ।

* * * *



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इति श्रीमदतिवर्णाश्रमाचार्यवर्यशैवपरिपालकशिवाग्रयोगिविरचितायां शैवपरिभाषायां प्रमाणनिरूपणं नाम प्रथमः परिच्छेदः ॥

द्वितीयपरिच्छेदारम्भः—

अथ प्रमेयं निरूप्यते । तच्च त्रिविधम्—पतिः, पशुः, पाशश्चेति ।

**End :**

नन्वनुमानं मानम् । तथाहि—जालसूर्यमरीचिसंस्थं सूक्ष्मं रजः स्वन्यूनपरिमाणद्रव्यारब्धं कार्यद्रव्यत्वात् घटवदिति परिदृश्यमानस्य सूक्ष्मरजसः कारणे त्वनुमिते तस्य महदारम्भकत्वेन च कार्यत्वे अनुमिते तेनैव हेतुना तस्यापि तथाविधद्रव्यारब्धत्वमनुमीयते । तथाच दृश्यमानस्य यत्परम्परयारम्भकं स एव परमाणुः । तथा अणुपरिमाणतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वात् महत्परिमाणतारतम्यवत् इत्यनुमानेनापि परमाणुसिद्धिरिति । मैवम्—समानपरिमाणदुग्धारब्धैः दध्यादिभिः अधिकपरिमाणसर्पिराद्यारब्धैर्घृतादिभिश्चाद्यस्य हेतोरनैकान्तिकत्वात् । तत्रासदवयवारब्धत्वे प्रमाणाभावात् द्वितीयस्य च.

---

## No. 5117. शैवसञ्जीवनम्.

## ŚAIVASAÑJĪVANAM.

Substance, palm-leaf. Size, 13 × 1⅜ inches. Pages, 132. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

Paricchēdas 1 to 10 complete.

On the general doctrines and the various sectarian differences of Śaivism as viewed from the standpoint of the Vīra-Śaiva religion : by Tōṭada Siddhaliṅga Śivayōgīndra.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Contains the following Paricchēdas :—

१. स्रोतोभेदः.
२. जातशैवभेदः.
३. तन्त्रशैववर्णशैवभेदः.
४. सामान्यपूर्वमिश्रशुद्धशैवभेदः.
५. श्रौतशैवमार्गशैवभेदः.
६. वीरशैवनिर्णयः.
७. सामान्यवीरशैवभेदः.
८. विशेषवीरशैवमार्गे तारतम्यभेदः.
९. वीरशैवमार्गे पञ्चाचारनिरूपणम्.
१०. निराधारिवीरशैवनिर्णयः.

**Beginning :**

श्रीमत्षट्स्थलनिष्ठयोगिहृदये ध्येयं निजानन्ददं
व्योमातीतमखण्डनित्यरुचि सच्चिद्रूपमेकं परम् ।
निर्द्वन्द्वं निरवद्यमोमिति लसन्मन्त्रात्मकं निष्कळं
ज्योतिर्मात्रनिरञ्जनाह्वयमहालिङ्गं जगद्रक्षते(तु) ॥

बालभानुकोटिचारुनिष्कळं निरञ्जनं फाललोचनाम्बुजाक्षपद्मसम्भवाश्रितम् ।
कालकर्मपाशबद्धसर्वलोकरक्षकं बोळबस्वदेशिकाङ्घ्रिपद्मयुग्ममाश्रये ॥
विलोड्य शास्त्राणि मुहुर्मुहुर्मनोविक्षेपहेतुत्वमुपेत्य केवलम् ।
लोकान् समालोक्य निजैक्यचक्षुषा श्रीशि(सि)द्धवीरेशगुरुं नतोऽस्म्यहम् ॥

देश आदिश्यते येन स देशिक इति स्मृतः ।
सर्वेभ्यश्च गुरुत्वाच्च गुरुरित्यभिधीयते ॥

See under the next number for the end.

---

## No. 5118. शैवसञ्जीवनम्.

## ŚAIVASAÑJĪVANAM.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 91. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 24*a*. The other works herein are Vīraśaivāgama 1*a*, Vīrāgama (Uttarabhāga) 70*a*.

Complete.



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



Same work as the above.

See under the previous number for the beginning.

**End:**

इमं शैवं महाधर्मं सोऽपि मुक्तेषु नाप्नुयात् ।
शक्तो यस्स्थापितुं धर्ममुपेक्षां कुरुते नरः ॥
सोऽसिपत्रवनं नाम नरकं प्रतिपद्यते ।
तस्माच्छिवकथां भक्त्या रक्षेत्सर्वप्रयत्नतः ॥
तद्रक्षणे भविष्यन्ति मर्त्या धर्मपरायणाः ।
रुद्रो भूत्वा यजेद्रुद्रं नारुद्रो रुद्रमर्चयेत् ॥
प्राणलिङ्गाङ्गसम्बन्धि(न्धी)स रुद्रो नात्र संशयः ॥
ये रुद्रलोकादवतीर्य रुद्रा मानुष्यमाश्रित्य जगद्धिताय ।
चरन्ति नानाविधचारुचेष्टास्तेभ्यो नमस्त्र्यम्बकपूजकेभ्यः ॥
चिदम्बरप्रणवयोस्सङ्घटन् जगतीत्यटन् ।
दिशति ब्रह्मनिष्ठत्वं तोविदांह(टदाह्व)यदेशिकः ॥

**Colophon:**

इति श्रीपरशिवयोगिराट्परिव्राजकाचार्यश्रीमत्तोटदसिद्धलिङ्गशिवयोगीन्द्रविरचिते शैवसञ्जीवने क्रियाशैवविचारे वीरशैवनिर्णये निराधारवीरशैवं नाम दशमपरिच्छेदः ॥

---

## No. 5119. सिद्धान्तशिखामणिः.

## SIDDHĀNTAŚIKHĀMAṆIḤ.

Pages, 113. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 2313.

Complete.

An authoritative account of the doctrines of **Vīra-Śaiva** religion given in the form of a discussion between **Rēṇuka and Agastya**. The work is divided into 20 **Paricchēdas and** is **by Rēvaṇārya**, son of **Rēvaṇīsiddha**.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



This manuscript is said to have been transcribed by one Paṇḍitārādhya Basavaṇṇa from another manuscript belonging to one Śambhulingayya.

**Beginning :**

यस्सोमेश्वरलिङ्गभूस्त्रिजगतां यो देशिकेन्द्रो विभुः
येनाबोधि स कु(म्भ)सम्भवमुनिः यस्मै नमस्कुर्वहे(ते) ।
यस्माद्दीप्यति वीरशैवसमयो यस्यामृतं पूजया
यस्मिन् लिङ्गनिजैक्यतत्त्वमवसन्मां रेणुकः पातु न(स): ॥

त्रयीतन्त्रसत्पारदृश्वानमेनं शिवाद्वैतसाकारसिद्धान्तसिद्धम् ।
स्फुरद्वीरशैवाभिधानन्ददं षट्स्थलस्थं यमीन्द्रं भजे रेणुकेन्द्रम् ॥

रेणुकेशमखिलार्थसिद्धिदं लिङ्गजङ्गमगुरुस्वरूपिणम् ।
चित्त वाणितनो(नुं)भ(ज)स्व मे चिन्तनेन नुति(मत्)सुपूजया ॥

वन्दे सौख्यं परब्रह्म शिवलिङ्गाख्यमीश्वरम् ।
शान्तमल्लेश्वरं वेदागमषट्स्थलरूपिणम् ॥

नमाम्यहममायाश्च चिच्छक्त्याख्यां चिदीश्वरीम् ।
शान्त्यतीतोत्तरां वेदतन्त्रषट्स्थलशीर्षगाम् ॥

वीरभद्राय भद्राय वृषाय वृषभाय च ।
भृङ्गिणे तुङ्गमतये प्रभुप्रभृतते(ये) नमः ॥

पिपीलिकामर्कटपक्षिगत्या स्नेहेन गोमत्स्यककच्छपास्याः ।
ये वीरशैवा भुवि षट्स्थलाढ्यलिङ्गाङ्गसम्बन्धयुजो स(न)मस्तान् ॥

श्रीरेणुक[ा]कुले ख्यातान् पञ्चलिङ्गात्मकान् क्रमात् ।
श्रीविश्वनाथपौराणस्वेशसर्वेशदेशिकान् ॥

नमः(त्वा) श्रीवीरणाराध्यरेवणसिद्धयोगिनौ ।
रेवणार्योऽकरोल्लेशं श्रीसिद्धान्तशिखामणिम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सकलसमयमूर्धाम्नायतन्त्रोर्ध्वभागं परमच(नु)गतमेकं वीरशैवादिशास्त्रम् ।
यदिह समकरोच्छ्रीवीरणाराध्यपौत्रः शिवयमिषु सटीकं रेवणीसिद्धसूनुः ॥

भोगमल्लेशहस्ताब्जजन्मसिद्धवृषेश्वरम् ।
मया टीकां कारयते श्रीसिद्धान्तशिखामणेः ॥

त्रैलोक्यसंसदालेख्यसमुल्लेखनभित्तये ।
सच्चिदानन्दरूपाय शिवाय ब्रह्मणे नमः ॥

ब्रह्मेति व्यपदेशस्य विषयं यं प्रचक्षते ।
वेदान्तिनोऽजं तन्मूलं तं नमामि परं शिवम् ॥

* * * *

सर्वेषां शैवतन्त्राणामुत्तमत्वान्निरुत्तरः ।
नाम्ना प्रतीयते लोके यस्सिद्धान्तशिखामणिः ॥

अनुगतसकलार्थैश्शैवतन्त्रैस्समस्तैः प्रकटितशिवबोधाद्वैतभावप्रसादि ।
विदधतु मतिमास्मिन् वीरशैवा विशिष्टास्सकलनिगमतन्त्रान्तार्थविज्ञाननिष्ठाः ॥

**Colophon :**

इति श्रीवीरशैवधर्मनिर्णये रेणुकागस्त्यसंवादे सिद्धान्तशिखामणौ अनुक्रमणप्रसङ्गो नाम प्रथमः परिच्छेदः ॥

सच्चिदानन्दरूपाय सदसद्व्यक्तिहेतवे ।
नमः शिवाय साम्बाय सगणाय स्वयम्भुवे ॥

* * * *

अस्ति सच्चित्सदाकारमलक्षणपदास्पदम् ।
निर्विकल्पं निराकारं निरस्ताशेषकल्मषम् ।

* * * *

शिवरुद्रमहादेवभवादिपदसंज्ञिकम् ।
अद्वितीयमनिर्देश्यं परं ब्रह्म सनातनम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तत्र लीनमभूत्पूर्वं चेतनाचेतनं जगत् ।
स्वात्मलीनजगत्कार्यं स्वप्रकाशं तदद्भुतम् ॥

*   *   *   *

स शम्भुर्भगवान् देवस्सर्वज्ञस्सर्वशक्तिमान् ।
जगत्सिसृक्षुः प्रथमं ब्रह्माणं सर्वदेहिनाम् ।
कर्तारं सर्वलोकानां विदधे विश्वनायकः ॥

**Colophon:**

इति श्रीवीरशैवधर्मनिर्णये सिद्धान्तशिखामणौ रेणुकदारुककथनं नाम द्वितीयः परिच्छेदः ॥

इति श्रीवीर . . सिद्धान्तशिखामणौ कैलासवर्णनं नाम तृतीयः परिच्छेदः ॥

इति श्री . . मणौ रेणुकोत्पत्तिकलशोद्भवदर्शनतत्कृतप्रश्नप्रसङ्गो नाम चतुर्थः परिच्छेदः ॥

इति श्री . . मणौ भक्तस्थले पिण्डतापिण्ड(विज्ञान)सं(सा)रहेयताप्रसङ्गो नाम पञ्चमः परिच्छेदः ॥

इति श्री . . मणौ भक्तस्थले गुरुकारुण्यलिङ्गधारणप्रसङ्गो नाम षष्ठः परिच्छेदः ॥

इति श्री . . मणौ भक्तस्थले विभूतिरुद्राक्षधारणप्रसङ्गो नाम सप्तमः परिच्छेदः ॥

इति श्री . . मणौ भक्तस्थले पञ्चाक्षरीप्रसङ्गो नाम अष्टमः परिच्छेदः ॥

इति श्री . . मणौ भक्त्यादिसप्तस्थलप्रसङ्गो नाम नवमः परिच्छेदः ॥

इति श्री . . मणौ महेश्वरनवविधस्थलप्रसङ्गो नाम दशमः परिच्छेदः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति श्री . . मणौ प्रासादिनस्सप्तस्थलप्रसङ्गो नाम एकादश[तम]ः परिच्छेदः ॥

इति श्री . . मणौ प्राणलिङ्गिनः पञ्चस्थलप्रसङ्गो नाम द्वादशः परिच्छेदः ॥

इति श्री . . मणौ शरणचतुर्विधस्थलप्रसङ्गो नाम त्रयोदशः परिच्छेदः ॥

इति श्री . . मणौ ऐक्यचतुर्थस्थलप्रसङ्गो नाम चतुर्दशः परिच्छेदः ॥

इति श्री . . मणौ भक्तस्थलविषयनवलिङ्गप्रसङ्गो नाम पञ्चदशः परिच्छेदः ॥

इति श्री . . मणौ महेश्वरस्थलाश्रितनवलिङ्गस्थलप्रसङ्गो नाम षोडशपरिच्छेदः ॥

इति श्री . . मणौ प्रासादिस्थलाश्रयनवलिङ्गप्रसङ्गो नाम सप्तदश[तम]ः परिच्छेदः ॥

इति श्री . . मणौ प्राणलिङ्गस्थलविषयनवलिङ्गस्थलप्रसङ्गो नाम अष्टादश[तम]ः परिच्छेदः ॥

इति श्री . . मणौ शरणस्थलविषयद्वादशलिङ्गस्थलप्रसङ्गो नाम एकोनविंशतितमः परिच्छेदः ॥

**End :**

इत्युक्त्वा पश्यतस्तस्य पुरस्तादव(थ)रेणुकः ।
अन्तर्दधे महादेवं चिन्तयन्नन्तरात्मना ॥
अन्तर्हिते तथा तस्मिन् मुनिराश्चर्यसङ्कुलः ।
तच्छास्त्रप्रमदो भूत्वा समवर्तत संयमी ॥
य इदं शिवसिद्धान्तं वीरशैवमतं परम् ।
शृणोति शुद्धमनसा स याति परमां गतिम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**Colophon :**

इति श्रीवीरशैवधर्मनिर्णये सिद्धान्तशिखामणौ ऐक्यस्थलविषयनवलिङ्गप्रसङ्गो नाम विंशतितमः परिच्छेदः ॥

---

## No. 5120. सिद्धान्तशिखामणिः.
## SIDDHĀNTAŚIKHĀMAṆIḤ.

Pages, 160. Lines, 18 on a page.

Begins on fol. 1*b* of the MS. described under No. 581.

Complete.

Same work as the above.

---

## No. 5121. हरिहरतारतम्यम्.
## HARIHARATĀRATAMYAM.

Pages, 4. Lines, 26 on a page.

Begins on fol. 53*a* of the MS. described under No. 27.

Incomplete.

A work in verse by Haradattācārya on the superiority of Śiva to Viṣṇu.

**Beginning :**

वृद्धान् श्रुतिस्मृतिपुराणविशेषभाषानिश्शङ्कबुद्धिकुशलान् प्रणिपत्य नित्यम् ।
अद्वैतमेकमजडं श्रितभेदबुद्धिः पृच्छाम्यहं हरिहरस्थिरतारतम्यम् ॥

एकस्समुद्रसलिले वटपत्रशायी चान्यस्समुद्रशरधिस्त्रिपुरप्रभेदे ।
को वानयोरधिक इत्यनुचिन्त्य वृद्धाः सत्यं ब्रुवन्तु तमिमं वयमाश्रयामः ॥

अत्र द्वितीयार्धः सर्वत्र अनुषज्यते । तस्मादत ऊर्ध्वं पूर्वार्धमात्रमेव लिखितम्—इति ज्ञेयम् ।

एको भुजङ्गशयने स्वपितीह नित्यं चान्यो भुजङ्गकटको नटतीह नित्यम् ।
को वानयोरधिक इत्यनुचिन्त्य वृद्धाः सत्यं ब्रुवन्तु तमिमं वयमाश्रयामः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सूनुश्चकार चतुराननमेवमेकः सूतश्चकार चतुराननमेवमन्यः ।
को वानयोरधिक इत्य . . . . वयमाश्रयामः ॥

**End:**

एको मुमूर्छ गहने स किरातबाणादन्यो ह्यमूर्छयदुरुत्रिपुरस्य दैत्यान् ।
को वानयोरधिक इत्यनुचिन्त्य वृद्धाः सत्यं ब्रुवन्तु तमिमं वयमाश्रयामः ॥

---

No. **5122.** हरिहरतारतम्यम्.

HARIHARATĀRATAMYAM.

Substance, palm-leaf. Size, $9\frac{3}{4} \times 1\frac{1}{8}$ inches. Pages, 3. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 2*a*. The other works herein are Ṣaḍvarṇamantrāṣṭaka 1*a*, Śarabhaśāluvapakṣirājakavaca 3*b*, Śarabhakavacabhasmōddhūlanamantra 14*b*.

Incomplete.

Same work as the above.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# INDEX.

[NOTE.—The names printed in *italics* are those of the works described.]


PAGE

*Abhēdakhaṇḍana* ... 3651, 3652
Abhilaṣitārthacintāmaṇi. 3861
Ācāryadīkṣita ... ... 3786, 3788
Adhikaraṇasaṅgraha ... 3664
*Adhikaraṇasārārthadīpikā* ... ... ... 3642
*Adhikaraṇasārāvali* ... 3644 to 3647
*Adhikaraṇasārāvalivyākhyā : Adhikaraṇacintāmaṇi.* 3647, 3650
*Adhikaraṇayuktivilāsa* ... 3641
Adhvaraṇāyikā ... ... 3745, 3747
*Adhyātmacintā* ... ... 3650
Ādibharata ... ... 3907
Ādināthamahāyōgin ... 3896
Ādivarāhācārya ... ... 3796, 3797
Ādivarāhārya ... .. 3710, 3769
*Advaitakālānala* ... ... 3637
*Advaitakhaṇḍana* ... 3638
*Advaitavidyāvijaya* ... 3631, 3637, 3639, 3640
Āgamasāraśatakatraya ... 3886
Agastya .. ... ... 3920
Ahōbilācārya ... ... 3707
Aitarēyōpaniṣad ... ... 3665
Āḷavandārstōtra ... ... 3780
Amṛtānanda ... ... 3908
*Ānandatāratamyakhaṇḍana* ... ... ... 3657, 3658
Ānandatīrtha ... ... 3571 to 3573, 3575 to 3582, 3584, 3589 to 3592, 3595 to 3599, 3601 to 3603, 3605, 3607 to 3611, 3613 to 3617, 3619, 3620, 3622, 3624, 3625, 3629, 3633 to 3636, 3657

PAGE

Ānandatīrthavara ... 3630, 3692
Anantācārya ... ... 3728, 3731, 3771, 3826 to 3828, 3832, 3836,
Anantācārya of Śēṣārya family ... ... ... 3789, 3822
Anantaguru ... ... 3715, 378
Anantārya ... 3665, 3674, 3675, 3729, 3730 to 3732, 3772, 3822, 3823 3826 to 3828, 3832, 3834, 3836, 3844, 3845
Anantasūri ... ... 3688, 3839
Aṇṇayācārya ... ... 3673, 3784, 3786 to 3788, 3793 to 3795
Aṇṇayadīkṣita ... ... 3660, 3683
Aṇṇayārya ... ... 3887, 3850 to 3852, 3886, 3675, 3727
Antyēṣṭividhi ... ... 3887
*Anubhavasūtra* ... 3850 to 3852, 3886
Anusmṛti ... ... 3646
Anuvyākhyāna ... ... 3611
*Anuvyākhyānanyāyavivaraṇa* ... ... ... 3611 to 3613
*Anuvyākhyānaṭīkā : Nyāyasudhā* ... ... ... 3609
Appalācārya ... ... 3692
Appayadīkṣita ... ... 3701, 3857, 3858, 3876 to 3879, 3881, 3882, 3884, 3891
Araśāṇipāla ... ... 3705
*Aruṇādhikaraṇamañjarī.* 3656




For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| | PAGE |
|---|---|
| *Aruṇādhikaraṇasaraṇi* ... | 3653, 3655. |
| *Aruṇādhikaraṇasaraṇivivaraṇī* ... ... ... | 3653, 3655 |
| Aṣṭādaśarahasyārthavivaraṇa ... ... ... | 3671 |
| Aṣṭādhyāyī ... ... | 3571 |
| *Astibrahmētiśrutyarthavicāra* ... ... ... | 3656 |
| Aupāsanamantra ... | 3646 |
| Bādarāyaṇa ... ... | 3607, 3610, 3705, 3725, 3726, 3742, 3755, 3761, 3840, 3874, 3878 |
| Bālarāmāyaṇa ... ... | 3769 |
| Basavarāja ... ... | 3871 3872, 3886, 3903, 3908 |
| *Basavarājīya* ... ... | 3871, 3872, 3874 |
| Bhagavadgītā ... ... | 3665 |
| *Bhāgavatatātparyanirṇaya* | 3613, 3614 |
| Bhaktavaibhava ... | 3665 |
| Bhāmatī ... ... ... | 3623 |
| Bharata ... ... ... | 3907 |
| Bhāratasārasaṅgraha ... | 3880 |
| *Bhāratasārasaṅgraha : Savyākhya* ... ... | 3878, 3879 |
| Bhāratasārastōtravivaraṇa | 3879 |
| *Bhāratatātparyanirṇaya.* | 3600, 3615 to 3618, 3620 to 3622 |
| *Bhāratatātparyanirṇayaṭīkā* | 3619, 3621 |
| *Bhāratatātparyanirṇayaṭippaṇī* ... ... | 3617 to 3620 |
| Do. *Bhāvaprakāśikā* ... | 3619, 3620 |
| Do. *Padārthavivṛti* ... | 3618, 3619 |
| *Bhargaśabdārthavicāra* ... | 3766, |
| Bhāruci ... ... ... | 3773 |

| | PAGE |
|---|---|
| Bhāskara ... ... | 3779, 3815, 3880 |
| Bhaṭṭanāthasūri ... | 3696 |
| Bhaṭṭōji-Nāganāthōktidhikkāra ... ... | 3784 |
| Bhāvajña ... ... | 3864, 3865 |
| Bhāvaprakāśikā ... ... | 3620, 3754 |
| *Bhēdadarpaṇa* ... ... | 3767, 3768 |
| Bhṛṅgi ... ... ... | 3907 |
| Bhūgōlanirṇaya ... ... | 3760 |
| Bhūmi ... ... ... | 3698 |
| *Bhūtasṛṣṭi* ... ... | 3880 |
| *Bimbatattvaprakāśikā* ... | 3729, 3730 |
| Bōdhāyana ... ... | 3737, 3748, 3749, 3758, 3759, 3773, 3787, 3829 |
| *Brahmājñānanirāsa* ... | 3732, 3764, 3765 |
| *Brahmalakṣaṇavākyārtha.* | 3732, 3733 |
| *Brahmalakṣmanirūpaṇa.* | 3659, 3731, 3732 |
| Brahmamīmāṁsābhāṣya. | 3876 |
| *Brahmamīmāṁsābhāṣyavyākhyā : Śivādityamaṇidīpikā* ... ... | 3877 |
| Brahmamīmāṁsādhikaraṇārthasaṅgraha ... | 3583 |
| Brahmānandin ... ... | 3773 |
| Brahmaṇyatīrtha ... | 3585, 3587 |
| *Brahmapadaśaktivāda* ... | 3722, 3730, 3731 |
| *Brahmasaguṇyanirūpaṇa.* | 3735 |
| *Brahmasūtrabhāṣya* ... | 3584, 3598 to 3603, 3606, 3736, 3739 to 3741, 3761, 3874 |
| *Brahmasūtrabhāṣyadūṣaṇōddhāra* ... ... | 3741 |
| *Brahmasūtrabhāṣyārambhaprayōjanasamarthana...* | 3761 |
| *Brahmasūtrabhāṣyasaṅgrahavivaraṇa* ... ... | 3759, 3760 |

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



PAGE

*Brahmasūtrabhāṣyastha-pūrvapakṣasaṅgraha-kārikā* ... ... 3760
*Brahmasūtrabhāṣyavyākhyā* ... ... 3757
*Brahmasūtrabhāṣyavyākhyā: Dīpikā* ... ... 3574, 3603, 3604
*Brahmasūtrabhāṣyavyākhyā: Mūlabhāvaprakāśikā* ... ... 3747, 3749
*Brahmasūtrabhāṣyavyākhyā: Nayaprakāśikā.* 3745
*Brahmasūtrabhāṣyavyākhyā: Śivādityamaṇidīpikā* ... ... ... 3876
*Brahmasūtrabhāṣyavyākhyā: Śrutapradīpikā.* 3749 to 3751
*Brahmasūtrabhāṣyavyākhyā: Śrutaprakāśikā.* 3751 to 3754
*Brahmasūtrabhāṣyavyākhyā: Tattvaprakāśikā.* 3601
*Brahmasūtrabhāṣyavyākhyā: Tattvaṭīkā* ... 3742, 3744
*Brahmasūtrabhāṣyōpanyāsa* ... ... 3760, 3762
*Brahmasūtrādhikaraṇārthasaṅgraha* ... ... 3606
*Brahmasūtrādhikaraṇasūtrakārikā* ... ... 3763
*Brahmasūtrāṇubhāṣya* ... 3604, 3605
*Brahmasūtrānuvyākhyāna.* 3607, 3608
Brahmasūtravṛtti ... 3737, 3829
*Brahmavidyāvijaya* ... 3734, 3735
Bṛhaspati ... ... 3907
Bucci Vēṅkaṭācārya ... 3793, 3795

Cakrāṅkanādivaibhavapratipādakapadya ... 3789
Camapkēśācārya ... 3757, 3729

PAGE

*Caturvēdatātparyasaṅgraha* ... ... 3852 to 3855
*Caturvēdatātparyasaṅgraha: Savyākhyā* ... 3856
Caturvyūhapūja ... ... 3665
Cāṭuślōka ... ... 3826
Cennabommabhūpāla ... 3877, 3901, 3904, 3905, 3908
Cennāmbikā ... ... 3904, 3905, 3908
*Cidacidīśvaratattvanirūpaṇa* ... ... 3671, 3672

Dāśarathi ... ... 3698
Daśarūpaka ... ... 3908
Dattila ... ... ... 3907
Dēśika ... ... ... 3677, 3689 3755, 3793
Dēvarāja ... ... 3681, 3682 3692, 3708, 3710, 3729, 3730, 3738
Doḍḍayācārya ... ... 3719, 3720
Dramiḍa ... ... ... 3748, 3750, 3758, 3773
Dramiḍōpaniṣadbhāṣya ... 3697
Draviḍabhāṣādhyayanakartavyatāvicāra ... 3690
Drōṇācārya ... ... 3909
*Durvādatūlavātūla* ... 3699
Dvādaśanāmastōtra ... 3574

Ekārāma ... ... ... 3901

Gadyatrayavyākhyā ... 3801
Garbhōpaniṣad ... ... 3910
Ghaṇṭāravaviṣaya ... 36●5
Ghaṭāmbu ... ... 3705
Girīndra ... ... 3887
Gītābhāṣya ... ... 3669



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



# INDEX.


| | PAGE |
|---|---|
| *Gītābhāṣyavyākhyā :* | |
| *Tātparyacandrikā* ... | 3660, 3661, 3663 |
| Gītaratnākara ... ... | 3907 |
| *Gītārthasaṅgraha* ... | 3663, 3664, 3667 to 3669 |
| *Gītārthasaṅgraha :* | |
| *Bhagavadgītāvyākhyā* ... | 3665, 3667 |
| *Gītārthasaṅgraharakṣā* ... | 3668, 3670 |
| Gōṇikāputra ... ... | 3907 |
| Gōpālakṛṣṇācārya ... | 3583, 3584, 3606 |
| Gōvinda ... ... .. | 3772, 3773, 3812, 3862, 3863 |
| Gurubhāvaprakāśikā ... | 3757 |
| Haradattācārya ... ... | 3854, 3855, 3925 |
| Haramēkhalikātantra ... | 3908 |
| *Hariharatāratamya* ... | 3925, 3926 |
| Hastyadrinātha ... ... | 3745, 3747 |
| Haṭhayōgapradīpikā ... | 3908 |
| Jābāla ... ... ... | 3909 |
| Jagannāthayati ... ... | 3603, 3604 |
| Jaimini ... ... ... | 3644, 3686, 3706, 3724, 3725, 3742, 3764, 3828 |
| Jambukhaṇḍi Lakṣmīnarasiṁha ... ... | 3618, 3619, 3621 |
| Jayārya ... ... ... | 3582, 3594, 3602 to 3604, 3631 |
| Jayatīrtha ... ... | 3572, 3573, 3576 to 3579, 3581, 3582, 3590 to 3594, 3596, 3597, 3601, 3602, 3609, 3611, 3625, 3626, 3629 |
| Jayavara ... ... ... | 3684 |

| | PAGE |
|---|---|
| Jayayōgin ... ... | 3585, 3623 |
| *Jijñāsādarpaṇa* ... ... | 3672, 3673 |
| *Jñānaratnaprakāśikā* ... | 3675, 3676 |
| *Jñānayāthārthyavāda* ... | 3674, 3675 |
| Jyautiṣārṇava ... ... | 3906 |
| *Kālahastīśavilāsa* ... | 3852, 3853 |
| Kamalā ... ... ... | 3698 |
| Kāmandakīyanīti ... | 3906 |
| Kāmika ... ... ... | 3851 |
| Kāñcī ... ... ... | 3588, 3705 |
| Kapyāsaśrutyartha ... | 3826 |
| Kāśakṛtsna .. ... | 3644, 3725 |
| Kathālakṣaṇa ... | 3574, 3635 |
| *Kathālakṣaṇapañcikā* .. | 3573, 3574 |
| Kauṇḍinya-Śrīnivāsa ... | 3678, 3679 |
| Kauṇḍinya-Śrīnivāsadīkṣita | 3653, 3655, 3659, 3660, 3672, 3673 |
| Kautukacintāmaṇi ... | 3908 |
| Kēladī Basavarāja ... | 3900, 3904 to 3907, 3910 |
| Khilark ... ... ... | 3880 |
| Kōhala ... ... ... | 3907 |
| Kōnaṭyambā ... ... | 3797 |
| Kōṭiramaṇācārya ... | 3619, 3621, 3622 |
| Kṛṣṇadvaipāyana ... | 3599, 3605, 3608, 3758, 3796, 3878 |
| Kṛṣṇamahīmahēndra ... | 3764 |
| Kṛṣṇamārya ... ... | 3667 |
| Kṛṣṇasūri ... ... | 3777 |
| Kucapañcaka ... ... | 3826 |
| Kuhadēva ... ... | 3758, 3773 |
| Kumbhakōṇa Tātācārya | 3781 |
| Kuraṅgīpañcaka ... | 3826 |
| Kūrēśavijaya ... ... | 3700, 3766 |
| Kūrēśavijayavyākhyā ... | 3766 |
| Kūrēśavijñāpana ... | 3826 |
| Kūrmādidhyāna ... ... | 3665 |


For Private and Personal Use Only

# INDEX.


PAGE

**Lakṣmāmbā** ... ... 3655, 3659, 3660, 3672, 3673
Lakṣmaṇārya .. ... 3614, 3698, 3701, 3745, 3747, 3778, 3779, 3794, 3822
Lakṣmaṇayōgīndra . 3649, 3728, 3769, 3791, 3835
Lakṣmī ... ... ... 3726
Lakṣmīnātha ... ... 3603
Lakṣmyambā ... ... 3727, 3784, 3786
Lalitābhāṣya ... ... 3726
Līlāvatīvyākhyā ... ... 3858
Lōkanāthaśāstrin ... 3858

Māca-Śēṣa ... ... 3600
Māḍabūṣi-Veṅkaṭācārya. 3728
Mādhava ... ... ... 3709
Madhva ... ... ... 3608, 3612, 3618, 3623, 3631 to 3633
Madhvabhāṣya ... ... 3585
Madhvācārya ... ... 3571, 3630
*Madhvatantranavamañjarī* 3622
Mahābhārata ... ... 3615, 3878
Mahābhāratapar vādhyāyasūci. 3646
Mahābhāratatātparyanirṇaya. 3574
Mahābhāratatātparyanirṇayaṭippaṇī ... ... 3610
*Mahābhāratatātparyarakṣā* 3769, 3770
Mahācārya ... ... 3637, 3639, 3719, 3721, 3722, 3734, 3762, 3763, 3772, 3773, 3803 to 3806, 3819, 3820, 3833, 3834
Mahāpurāṇa ... ... 3738
Mallikārjuna ... ... 3880, 3901
Mānasōllāsa ... ... 3908
Mānava ... ... 3909
Maṅgācārya-Śrīnivāsasūri. 3642, 3643
Manōhara ... ... 3871
Marulasiddhēśa ... ... 3901
Maya ... ... ... 3907

PAGE

*Māyāvādakhaṇḍana* ... 3571, 3624 to 3626
Māyāvādakhaṇḍanaṭīkā. 3574
Māyāvādakhaṇḍanavivaraṇa. 3577
*Māyāvādakhaṇḍanavyākhyā.* 3572, 3625, 3626
Māyidēva ... ... 3886
Mayūraśataka ... ... 3864
Mēghanādāri ... ... 3701, 3745, 3747
Mēlkōṭa ... ... ... 3674
Mērutantra ... ... 3908
Mīmāṁsānakṣatramālikā. 3858
*Mōkṣakāraṇatāvāda* ... 3675, 3771, 3772
Mūlabhāvaprakāśikā ... 3747
Mysore ... ... ... 3844

Naiṣadhavyākhyā ... 3571
*Nakṣatravādāvali* ... 3857
Nakula ... ... ... 3908
Nala ... ... ... 3907, 3908
Nandikēśvara ... 3859, 3907
Nandikēśvarakārikā ... 3858, 3860
*Nandīśvarakārikāvyākhyā : Tattvavimarśanī* ... 3858
Naracakra ... ... 3760
Narahari ... ... 3693
Narasiṁhatātayārya ... 3787
Nārāyaṇa ... ... ... 3588, 3593, 3594, 3600, 3614, 3632
Nārāyaṇamuni ... ... 3665
*Nārāyaṇapadanirvacana.* 3702, 3862,
*Nārāyaṇapadasvaranirvacana* ... ... ... 3702
Nārāyaṇapaṇḍita .. 3634
*Nārāyaṇaśabdanirvacana.* 3702, 3863
Nāthamuni ... ... 3650, 3669, 3745, 3747, 3765, 3778, 3780, 3808
*Natvacandrikā* ... ... 3676
*Natvadarpaṇa* ... ... 3678, 3679

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| | PAGE |
|---|---|
| *Navakōṭi* ... ... ... | 3676, 3679, 3860, 3861 |
| *Nayadyumaṇi* ... ... | 3700, 3701 |
| *Nayamayūkhamālikā* ... | 3701 |
| Nidhipradīpikā ... ... | 3906 |
| Nikṣēparakṣā ... ... | 3670 |
| Nṛsiṁhadēva ... ... | 3692, 3693 |
| Nṛsiṁhaguru ... ... | 3695, 3699 |
| Nṛsiṁharāja ... ... | 3820 |
| Nṛsiṁhārya ... ... | 3594, 3632 3667 |
| Nṛsiṁhastotatraśatanāmāvali ... .. ... | 3665 |
| *Nyāyādhvadīpīkā* ... | 3585 |
| Nyāyakalpalatā ... ... | 3573 |
| *Nyāyakārikāvali* ... ... | 3583, 3584 |
| *Nyāyakuliśa* ... ... | 3703 to 3705 |
| *Nyāyāmṛta* ... ... | 3583, 3587, 3588 |
| *Nyāyamuktāvalī* ... ... | 3583, 3584 |
| *Nyāyapariśuddhi*... ... | 3705 to 3708, 3713, 3844 |
| *Nyāyapariśuddhivyākhyā : Nikaṣā* ... ... | 3707, 3708 |
| *Nyāyapariśuddhivyākhyā : Nyāyasāra* ... ... | 3707, 3708, 3710 |
| *Nyāyaratnāvali* ... ... | 3710, 3711 |
| *Nyāyasāra* ... ... | 3864, 3865 |
| *Nyāyasiddhāñjana* ... | 3712 to 3714, 3844 |
| *Nyāyasiddhāñjanavyākhyā* | 3714, 3716 |
| *Nyāyasiddhāñjanavyākhyāna* ... ... ... | 3715 |
| Nyāyasudhā ... ... | 3611 |
| *Nyāyasudhāvyākhyāna : Parimala* ... ... | 3610 |
| *Ōṅkāravādārtha* ... | 3659, 3660 |
| Padārthasaṅgraha ... | 3665 |
| Padmākṣatulasīmālikāpratiṣṭhā ... ... | 3665 |
| Padmanābhārya ... ... | 3705 |
| Pālakāpya ... ... | 3908 |
| *Pañcakōśavicāra* ... | 3716, 3717 |
| *Pañcaratnavyākhyā : Tantrasāraprakāśikā* ... | 3865 |
| *Pañcaratnavyākhyā : Tārakadīpikā* ... ... | 3867 |
| *Pañcaratnavyākhyā : Śivatattvaprakāśikā* ... | 3868 |
| *Pañcaratnavyākhyā : Śrutyarthapradīpikā* ... | 3869 |
| Pāñcarātrarakṣā ... ... | 3670 |
| Paṇḍitārādhyabasavaṇṇa. | 3921 |
| Pāṇini ... ... ... | 3858 |
| Pāpaya ... ... ... | 3862, 3863 |
| Parakāla . ... ... | 3684, 3783 |
| Pāramēśvara ... .. | 3909 |
| *Paramukhacapēṭikā* ... | 3676, 3718, 3719 |
| Parāṅkuśa ... ... | 3707, 3773, 3839 |
| Pāraśara ... ... | 3908, 3909 |
| Pārāśarya ... ... | 3645, 3648, 3649, 3721, 3736, 3758, 3779 |
| *Pārāśaryavijaya* ... ... | 3721, 3722 |
| Paraśurāma ... ... | 3909 |
| *Paratattvanirṇaya* ... | 3679, 3717 |
| Paravādibhayaṅkarārya. | 3651 |
| Paravastu Vēdāntācārya | 3796 |
| *Parikaravijaya* ... ... | 3719, 3720 |
| Patañjali ... ... ... | 3859 |
| Pēlāpūr Dīkṣita ... ... | 3681 to 3683 |
| Prabōdhacandrōdaya ... | 3810 |
| *Pramāṇalakṣaṇa* ... ... | 3571, 3592, 3595 to 3597 |
| *Pramāṇalakṣaṇaṭīkā : Nyāyakalpalatā* ... | 3596, 3597 |
| *Pramāṇapaddhati* ... | 3572, 3592 to 3594, |
| *Pramāṇapaddhativyākhyā* | 3593, 3594 |
| Prāṇapratiṣṭhāmantra ... | 3665 |
| *Praṇavadarpaṇa* ... | 3726 to 3728 |


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| | PAGE |
|---|---|
| *Praṇavadarpaṇakhaṇḍana.* | 3583, 3588 |
| *Prapañcamithyātvānumāna-khaṇḍana* ... ... | 3571, 3589 to 3591 |
| Prapañcamithyātvānumāna-khaṇḍanapañcikā ... | 3574, 3590 |
| Prapañcamithyātvānumāna-khaṇḍanavyākhyā ... | 3572 |
| *Prapañcamithyātvānumāna-khaṇḍanavyākhyā : Pañcikā* ... ... ... | 3590, 3591 |
| *Pratijñāvādārtha* ... | 3728, 3729 |
| Pratiṣṭhākrama ... | 3665 |
| Prativādibhayaṅkara Vēṅkaṭārya ... ... | 3788 |
| Prayōgasāra ... ... | 3908 |
| *Pucchabrahmavādanirāsa* | 3722, 3723 |
| Pūjāvaikalyaprāyaścitta... | 3665 |
| Pūjitācāryaka ... ... | 3901 |
| Puṇḍarīkadṛk ... ... | 3650 |
| Puṇḍarīkākṣa ... ... | 3688 |
| Pūrṇaprajña ... .. | 3605 |
| *Pūrvōttaramīmāṁsaikakaṇṭhya* | 3723, 3725 |
| Rāghavārya ... ... | 3665, 3735 |
| Rāghavēndrayati ... | 3584, 3611 |
| Raghunāthatīrtha ... | 3603 |
| Raghuvaṁśa ... | 3786 |
| Rahasyarakṣā ... | 3670 |
| Rahasyatrayasārāvali | 3690 |
| Rāmacandra ... ... | 3603 |
| Rāmamiśra ... ... | 3650, 3669, 3745, 3747 |
| Rāmānuja ... ... | 3644, 3653, 3663, 3665, 3668, 3680, 3682, 3683, 3715, 3716, 3718, 3720, 3741, 3742, 3745, 3751, 3772, 3775, 3780, 3784, 3787, 3788, 3790 to 3793 |

| | PAGE |
|---|---|
| Rāmānujācārya ... | 3701, 3703, 3704, 3705, 3713, 3733, 3736, 3738, 3756, 3757, 3808, 3812, 3814 to 3816 |
| Rāmānujadāsa ... | 3639, 3719, 3722, 3728, 3734, 3803, 3805, 3819, 3820, 3833, 3834 |
| Rāmānujamuni ... ... | 3799, 3801 |
| Rāmānujārya ... ... | 3655, 3684, 3688, 3691, 3748, 3763, 3809, 3826, 3836 to 3838 |
| *Rāmānujasiddhāntasaṅgraha* ... .. | 3697, 3775 to 3777 |
| *Rāmānujasiddhāntavijaya.* | 3771 |
| *Rāmāyaṇatātparyanirṇaya* | 3879, 3882, 3884 |
| Raṅganātha ... ... | 3628, 3681 |
| Raṅgarājādhvarin ... | 3858, 3877, 3884 |
| Raṅgarāmānuja ... | 3744 |
| Raṅgarāmānujamuni ... | 3714, 3787, 3823 |
| Raṅgarāmānujasvāmin | 3790 |
| Rasaratnākara ... ... | 3907 |
| *Ratnatrayaparīkṣā : Savyākhyā* | 3881 |
| Rauravāgama ... ... | 3897, 3898 |
| Rēṇukā ... ... ... | 3896, 3920 |
| Rēvaṇārādhya ... ... | 3866 to 3871 |
| Rēvaṇārya ... ... | 3920 |
| Rēvaṇasiddhēśvara ... | 3869, 3871 |
| Rēvaṇisiddha ... ... | 3901, 3920 |
| Ṛgbhāṣya ... ... ... | 3635 |
| Ṣaḍvarṇamantrāṣṭaka ... | 3920 |
| *Sadvidyāvijaya* ... ... | 3833, 3834 |
| Sahasranāmāvali .. | 3664 |
| *Śaivaparibhāṣā* ... ... | 3917, 3918 |
| *Śaivasañjīvana* ... ... | 3918 to 3920 |

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| | PAGE |
|---|---|
| **Sakṛnnamaskārasamarthana** ... ... ... | 3638 |
| **Sālihōtra** ... ... | 3908 |
| *Sāmānādhikaraṇyavāda* ... | 3835, 3836 |
| *Sāmānādhikaraṇyavādaṭippaṇī* ... ... ... | 3835, 3836 |
| Samarapuṅgavācārya ... | 3642, 3643 |
| *Samāsavāda* ... .. | 3789, 3834, 3835 |
| Samāsavādārtha ... . | 3638 |
| Śambhuliṅgayya ... | 3921 |
| Samprōkṣaṇavidhi ... | 3665 |
| Sāmudratilaka ... ... | 3908 |
| Sāmudrikaśāstra ... | 3861 |
| *Saṁvidēkatvānumānanirāsavādārtha* ... ... | 3760, 3832 |
| Saṅgraharāmāyaṇa ... | 3634 |
| Saṅgraharāmāyaṇaṭippaṇī. | 3619 |
| *Saṅgraharāmāyaṇaṭippaṇī : Bhāvaratnapradīpti.* | 3634 |
| Śaṅkara ... ... | 3689, 3743, 3750, 3779, 3815, 3888, 3889 |
| Śaṅkarācārya ... ... | 3888 |
| Śarabhakavacabhasmōddhūlanamantra ... | 3926 |
| Śarabhasāluvapakṣirājakavaca ... ... ... | 3926 |
| Śaraṇāgativiṣaya ... | 3665 |
| *Sārārthacatuṣṭaya* ... | 3690, 3837 |
| *Śārīrakaśāstradīpikā* ... | 3823, 3824 |
| *Śārīrakaśāstrārthasaṅgraha*. | 3824, 3825 |
| *Śarīravāda* ... ... | 3789, 3822, 3823 |
| Śārīrōpaniṣad ... .. | 3910 |
| Śārṅgadhara ... ... | ?907 |
| Sarvajñagaṅgādhara ... | 3890, 3891 |
| *Sarvamūlādyantaślōkasaṅgraha* ... ... ... | 3635 |
| Sarvārthasiddhi ... ... | 3688, 3692, 3844 |
| *Sarvārthasiddhivyākhyā : Ānandavallarī* ... | 3692 |
| Sarvēśvarācārya ... | 3869 |
| Śaṣṭaīdarpaṇa ... ... | 3657, 3831 |
| *Ṣaṣṭhyarthanirṇaya* ... | 3722, 3830, 3831 |
| Śāstradīpikā ... ... | 3586 |
| *Śāstraikyavāda* ... ... | 3828 |
| *Śāstrārambhasamarthana*. | 3826, 3827 |
| *Śāstrasanmaṅgalāditvavicāra* ... ... ... | 3880, 3890 |
| *Śatadūṣaṇī* ... ... | 3743, 3765, 3816 to 3821 |
| *Śatadūṣaṇīvyākhyāna :* | |
| *Caṇḍamāruta* ... | 3819, 3820 |
| *Do. Nṛsiṁharājīyā* ... | 3820 |
| *Do. Sahasrakiraṇī* ... | 3821 |
| Śaṭhakōpamuni ... .. | 3650, 3732, 3733, 3769 |
| Śaṭhārisūri ... ... | 3732, 3733 |
| Sattarkasiddhāñjana ... | 3713 |
| *Sattattvaratnamālā* ... | 3630, 3632 |
| Sattattvaratnamālāṭīkā... | 3630, 3632 |
| Saumyajāmātṛmuni ... | 3650, 3651, 3756, 3812, 3847 |
| Śēṣārya ... ... ... | 3675, 3729, 3731, 3772, 3790, 3823, 3826, to 3828, 3832, 3834, 3835, 3844, 3845 |
| *Siddhāntaratnāvali* ... | 3781, 3838, 3840, 3841 |
| *Siddhāntasaṅgraha* .. | 3778, 3848 |
| *Siddhāntasiddhāñjana* ... | 3793, 3844, 3846 |
| *Siddhāntaśikhāmaṇi* ... | 3920 to 3925 |
| *Siddhāntavaijayantī* ... | 3842 |
| *Siddhitraya* ... ... | 3846 |
| *Śikhariṇīmālā* ... ... | 3891, 3894 |
| *Śikhariṇīmālā : Śivatattvavivēkasahitā* ... ... | 3891 |
| Śīlasampādanakrama ... | 3886 |
| Śiśupālavadha ... ... | 3679 |
| *Śivādvaita* ... ... | 3913 |

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



PAGE

*Śivādvaitaprakāśaka* ... 3913
Śivāgrayōgin ... ... 3917, 3918
*Śivajñānabōdha* ... .. 3897 to 3900
*Śivajñānabōdhalaghuṭīkā*... 3897, 3899, 3900
*Śivajñanadīpikā* ... ... 3896, 3897
*Śivajñānatārāvali* ... 3866, 3895, 3896
Śivakarṇāmṛta ... ... 3878
Śivāśramayōgin ... 3899, 3900
Śivatattvaprakāśikā 3865, 3869
*Śivatattvaratnākara* ... 3900, 3903 to 3910, 3912
Śivayōga ... ... 3908
Śivayōgīndra ... 3887, 3888,
*Śivōtkarṣapratipādanagrantha* 3880, 3916
Smaratattvaprakāśikā 3865
Sōmanātha ... 3871 to 3874
Sōsalivīraṇārādhya ... 3866 to 3871, 3880, 3895, 3896
Śrībhāgavata ... 3613
Śrībhāṣya ... ... 3644, 3653, 3683, 3698, 3727, 3741, 3742, 3745, 3749, 3751, 3754, 3757 to 3762, 3784 to 3786, 3829 3831, 3832
Śrībhāṣyadūṣaṇōddhāra ... 3687
*Śrībhāṣyādyantabhāga* ... 3829
Śrīguṇaratnakōśa ... ... 3810
Śrīkaṇṭha ... ... ... 3876
Śrīkaṇṭhācārya ... ... 3857
Śrīkaṇṭhaśivācārya ... ... 3874
Śrīnidhidīkṣita ... ... 3653
Śrīnidhitātārya ... ... 3787
Śrīnivāsa ... ... 3641, 3653, 3655, 3658 to 3660, 3672, 3673, 3676, 3679, 3683 to 3687, 3692, 3894
Śrīnivāsa of Śrīśaila family 3727, 3784, 3785,
Śrīnivāsa of Vādhūlagōtra 3721, 3722, 3805

PAGE

Śrīnivāsācārya ... 3657, 3659, 3660, 3675, 3678, 3726, 3727, 3734, 3767, 3768, 3821
Śrīnivāsācārya of Vādhūlagōtra 3803, 3804, 3806, 3819, 3820, 3833, 3834
Śrīnivāsadāsa ... ... 3708 to 3710, 3772, 3773, 3778, 3779, 3788, 3789
Śrīnivāsādhvarin of Kauṇḍinyagōtra .. ... 3655, 3726, 3727, 3785
Śrīnivāsadīkṣita ... 3786
Śrīnivāsarāghava ... 3776, 3777
Śrīnivāsaśaṭhakōpayati 3707
Śrīnivāsasudhī ... 3764, 3765
Śrīnivāsatātācārya ... 3784, 3786
Śrīnivāsatātārya .. 3653, 3655, 3660, 3672, 3683, 3687, 3786, 3788
Śrīprapatti ... ... 3739
Śrī-Rāmānujācārya ... 3660
Śrīraṅgarājamahādēśika 3843, 3844
Śrīraṅgarājastavavyākhyā 3818
Śrīśailadāsa ... ... 3777, 3843, 3844
Śrīśaila-Kṛṣṇa ... 3718, 3719
Śrīśailapūrṇa ... 3782,
Śrīśaila-Rāghavācārya 3798
Śrīśaila-Śēṣavaradārya ... 3824
Śrīśaila-Tātayācārya 3726
Śrīvicāra ... ... 3679
Śrutapradīpikā ... 3751
Śrutaprakāśikā ... 3641, 3751, 3753 to 3755 3758,
*Śrutaprakāśikāvyākhyā :*
*Bhāvaprakāśikā* ... 3754, 3755
*Do. Gurubhāvaprkāśikā* ... 3755
Śrutisārapañcaratna ... 3866, 3869 to 3871

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| | PAGE |
|---|---|
| **Śrutyantalakṣmaṇa** ... | 3645 |
| ***Śrutyarthanirṇaya*** | 3781, 3829, 3830, |
| **Śrutyarthapradīpikā** ... | 3866 |
| **Śrutyarthaprakāśikā** ... | 3869, 3871 |
| **Stōtrabhāṣya** .. ... | 3772, 3780 |
| **Subbābhaṭṭa** ... ... | 3588 |
| **Sudarśanaguru** ... | 3806, 3807 |
| **Sudarśanasūri** ... | 3685, 3749, 3751 to 3755, 3757, 3815 |
| **Sudarśanasūri** *alias* **Vēdavyāsa** ... ... | 3751, 3753, 3814, 3815 |
| **Śuddhasattvalakṣmaṇārya** | 3755 to 3757 |
| **Sudhīndra** ... | 3584, 3611 |
| **Sukhatīrtha** ... ... | 3634 |
| **Śukra** .. ... | 3907 |
| **Sundararājadēśika** ... | 3757, 3758 |
| **Surēndra** ... ... | 3586, 3623 |
| ***Sūtramuktākalāpa*** ... | 3847, 3848 |
| **Śvētācārya** ... ... | 3876 |
| **Ṭaṅka** ... ... | 3748, 3758 |
| **Tantrasārapañcaratna** | 3866 |
| **Tārakadīpikā** ... ... | 3866 |
| **Tārakapañcaratna** ... | 3867, 3868 |
| **Tarkacandrikā** ... | 3726 |
| **Tātācārya** ... ... | 3660, 3665, 3673, 3714, 3839 to 3842 |
| **Tātayadēśika** ... ... | 3655, 3675, 3715, 3727, 3755 |
| **Tātparyacandrikā** ... | 3588 |
| ***Tattvabhāskāra*** ... | 3681 to 3683 |
| **Tattvadīpa** ... ... | 3772 |
| ***Tattvamārtāṇḍa*** ... | 3684, 3687 |
| ***Tattvamārtāṇḍa— Brahmasūtravyākhyā*** ... ... | 3683 |
| ***Tattvamuktākalāpa*** ... | 3688 to 3691, 3693 |
| ***Tattvamuktākalāpavyākhyā : sarvarthasiddhi*** ... | 3690, 3691 |
| ***Tattvanirṇaya*** ... | 3679, 3681 |
| **Tattvaprakāśikā** ... | 3572 |
| **Tattvaprakāśikāvivaraṇa** | 3573 |
| **Tattvaprakāśikāvyākhyā** | 3572 |
| **Tattvaratnākara** ... | 3644 |
| ***Tattvasaṅkhyāna*** ... | 3571, 3577, 3578 |
| ***Tattvasaṅkhyānavivaraṇa*** | 3577 to 3579 |
| **Tattvasaṅkhyānavyākhyā** | 3572, 3578 |
| ***Tattvasāra*** ... ... | 3690, 3693 to 3695, 3698, 3699 |
| *Do. Ratnasāriṇīsahita* | 3695, 3697 |
| **Tattvaṭīkā** ... ... | 3656, 3743, 3758 |
| ***Tattvavivēka*** ... ... | 3571, 3575, 3576 |
| **Tattvavivēkavivaraṇa.** | 3577 |
| ***Tattvavivēkavyākhyā*** ... | 3572, 3576, 3577 |
| **Tattvōdyōta** ... | 3571, 3579, 3581 |
| **Tattvōdyōtaṭīkā** ... | 3582 |
| ***Tattvōdyōtavivaraṇa*** ... | 3574, 3581 |
| **Tirumaladēśika** ... | 3798 |
| **Tiruppāvaivyākhyāna** | 3801 |
| **Tiruppuṭkuli Kṛṣṇatātācārya** | 3677 |
| **Tiruvaraṅgamāṇḍān** ... | 3843, 3844 |
| **Toṭada Siddhaliṅgaśivayōgīndra** ... ... | 3918, 3920 |
| **Tōtāramba** ... ... | 3692 |
| **Trivikramapaṇḍita** ... | 3631 |
| **Tryambaka** ... ... | 3764, 3765 |
| **Tryambakādisūktavivaraṇa** | 3880 |
| **Tūlikā** ... ... ... | 3767 |


For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| | PAGE |
|---|---|
| **Udbhaṭārādhya** ... | 3880 |
| **Uḍḍāmarēśvara** ... | 3906 |
| **Ujjayinī** ... ... | 3901 |
| *Upādhikhaṇḍana* ... ... | 3571, 3572 |
| *Upādhikhaṇḍanaṭīkā* ... | 3572, 3573 |
| **Upamanyu** ... ... | 3858, 3860, 3893 |
| Utpalaparimala ... ... | 3907 |
| *Vādādrikuliśa* ... ... | 3778, 3779 |
| **Vādanakṣatramāla** ... | 3682 |
| **Vādanakṣatramālikā** ... | 3857, 3858 |
| *Vadāvali* ... ... ... | 3583, 3626 |
| **Vādihaṁsāmbuvāhācārya** | 3646, 3649, 3703 to 3705, 3743 |
| **Vādihaṁsāmbuvāhācārya-stōtra** ... ... | 3703 |
| **Vādirājatīrtha** ... ... | 3620 |
| *Vāditrayakhaṇḍana* ... | 3760, 3779, 3780 |
| **Vāgbhaṭa** ... ... | 3908 |
| **Vāgvijayin** ... ... | 3752, 3757, 3814, 3815 |
| *Vaidikavijayadhvaja* ... | 3888 |
| **Vaidyaviṣaya** ... ... | 3880 |
| **Vaikuṇṭha** ... | 3583 |
| **Vaiśvadēvavidhāna** ... | 3646 |
| **Vakulābharaṇa** ... | 3780 |
| **Vālmīki** ... ... ... | 3883 |
| **Varadācārya** ... ... | 3743, 3749, 3751, 3812, 3837 |
| **Varadācārya** *alias* **Naḍā-dūrammāḷ** ... ... | 3693 |
| **Varadaguru** ... ... | 3648, 3649, 3672, 3688, 3693, 3695, 3698, 3699, 3792, 3812 |
| **Varadanātha or Kumāra-Vēdāntācārya** ... ... | 3647, 3749 |
| **Varadanāyakasūri** ... | 3671, 3672 |
| **Varadarāja** ... ... | 3753, 3815 |
| **Varadarājaguru** ... ... | 3814 |
| **Varadarāṭ** ... ... | 3745, 3747 |
| **Varadārya** ... ... | 3649, 3671, 3680, 3681, 3694, 3699, 3713, 3837, 3838 |
| **Varadaviṣṇusūri** ... | 3754, 3755 |
| **Varāhasaṁhitā** ... ... | 3908, 3909 |
| **Varāhāṣṭaka** ... ... | 3703 |
| **Varavaramuni** ... ... | 3774 |
| **Varuṇārgala** ... ... | 3907 |
| **Vasantadēva** ... ... | 3901 |
| **Vātsyāyana** ... ... | 3907 |
| **Vātūlatantra** ... ... | 3850, 3851, 3886, 3909 |
| **Vēdāntācārya** ... ... | 3645, 3647 to 3649, 3663, 3668, 3670, 3684, 3688, 3689, 3691, 3692, 3703, 3706, 3708 to 3710, 3715, 3743, 3769, 3779, 3797, 3798, 3816, 3818, 3819 |
| **Vēdāntācārya of Śrīvatsa family** ... ... ... | 3796 |
| **Vēdāntadēśika** ... ... | 3651, 3660, 3668, 3684, 3690, 3692, 3705, 3711 3712, 3714, 3742, 3779, 3788, 3797, 3816 |
| *Vēdāntadīpa* ... ... | 3792, 3799, 3801, 3802, |
| *Vēdāntakaṇṭakōddhāra* ... | 3792, 3793 |
| *Vēdāntakārikāvali* ... | 3664, 3793, 3795 |
| *Vēdāntakaustubha* ... | 3796 to 3798 |
| *Vēdāntasāra* ... ... | 3801, 3802, 3808 to 3810 |
| **Vēdāntavicāra** ... ... | 3772 |

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| | PAGE |
|---|---|
| Vēdāntavijaya ... ... | 3735, 3797, 3806 |
| *Vēdāntavijaya : Gurūpasadanavijaya* ... ... | 3803 |
| *Vēdāntavijaya : Vijayōllāsa* ... ... ... | 3804, 3806 |
| *Vēdāntavijayavyākhyā : Maṅgaladīpikā* ... | 3806 |
| *Vēdārthasaṅgraha* ... | 3792, 3802, 3812 to 3814 |
| *Vēdārthasaṅgrahavyākhyā : Tātparyadīpikā* ... | 3813 to 3816 |
| *Vēdārthavicāra* ... ... | 3810 |
| Veṅgaka Rāma ... ... | 3594 |
| Vēṅkaṭācārya ... ... | 3705, 3756, 3778, 3779, 3794, 3838, 3840 to 3842 |
| Vēṅkaṭadēśika ... ... | 3693, 3798, 3838, 3840 to 3842 |
| Vēṅkaṭadhvarin ... | 3685 |
| Vēṅkaṭakrṣṇācārya ... | 3583, 3584, 3606 |
| Vēṅkaṭāmbā ... ... | 3842 |
| Vēṅkaṭanātha ... ... | 3644, 3645, 3661, 3663, 3668, 3670, 3689, 3691, 3705, 3706, 3709, 3713, 3715, 3779, 3816, 3818 |
| Vēṅkaṭārya ... ... | 3699, 3735, 3760, 3761, 3777, 3787, 3795, 3798, 3840 to 3842 |
| Vēṅkaṭavaradācārya ... | 3666 |
| Vēṅkaṭavirārya ... | 3657 |
| Vēṅkaṭēśa ... ... | 3711, 3853 |
| Vēṅkaṭēśāṣṭōttaraśatanāmāvali ... ... ... | 3665 |
| Vēṅkaṭēśvarakavi ... | 3669 |
| Vidyānātha ... ... | 3908 |
| Vigraham Dēśika ... | 3656, 3657 |
| Vihagēndrasaṁhitā ... | 3908 |

| | PAGE |
|---|---|
| Vijayamaṅgaladīpikā ... | 3808 |
| Vijayīndra ... ... | 3585, 3586, 3781 |
| *Vijayīndraparājaya* ... | 3781, 3783, 3784 |
| Vijayīndratīrtha ... | 3588, 3623, 3783 |
| Vīrāgama ... ... | 3919 |
| Vīrarāghavācārya of Pillaipākkam ... ... | 3815 |
| Vīrarāghavadāsa ... | 3695, 3699 |
| Vīrarāghavadēśika ... | 3684 |
| Vīraśaivāgama ... ... | 3919 |
| *Vīraśaivasiddhānta* ... | 3886, 3887 |
| Vīraśaivasiddhāntōttarakaumudī ... ... | 3887 |
| *Virōdhanirōdhaḥ : Bhāṣyapādukā* ... ... ... | 3784, 3786 |
| *Virōdhavarūthinīpramāthinī* ... ... ... | 3784, 3786, 3788 |
| Virūpākṣa ... ... | 3897 |
| *Viṣayatāvāda* ... ... | 3789, 3790 |
| *Viṣayavākyadīpikā* ... | 3790 to 3792 |
| *Viśēṣārthaprakāśa* ... | 3852, 3884 to 3887 |
| *Viśiṣṭādvaitasiddānta* ... | 3671, 3788, 3789 |
| Viṣṇucitta ... ... | 3696, 3812, 3837 |
| Viṣṇupāramyastōtra ... | 3780 |
| Viṣṇusahasranāmabhāṣya | 3801 |
| *Viṣṇutattvanirṇaya* ... | 3571, 3573, 3627 to 3629 |
| *Viṣṇutattvanirṇayavyākhyā.* | 3629 |
| Viṣṇutīrtha ... ... | 3631 |
| Viśvajayin ... ... | 3749, 3751 |
| Viśvakarma ... ... | 3907 |
| Vītānanda ... ... | 3881 |
| Viṭṭhalācārya ... ... | 3593, 3594, 3630, 3632, 3634 |
| Vivāhakāla ... ... | 3665 |
| Vyāghrapāda ... | 3859 |

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



PAGE

**Vyāsa** ... ... ... 3598, 3602, 3607, 3610, 3623, 3630, 3633, 3685, 3686, 3721, 3724, 3752, 3773, 3784, 3787, 3791, 3803, 3812, 3874, 3875, 3878, 3879, 3888, 3883, 3893

**Vyāsadēśika** ... ... 3585, 3603

**Vyāsatīrtha** ... ... 3588, 3683, 3686

**Vyāsayati** ... ... ... 3587, 3623

**Yādavādri** ... ... 3674, 3675, 3731, 3772, 3790, 3822, 3823, 3826 to 3828, 3832, 3835, 3844

**Yādavādrimāhātmya** ... 3756

PAGE

**Yādavaprakāśa** ... ... 3779

**Yājñavalkya** ... ... 3909

**Yāmunācārya** ... 3663, 3664, 3668 to 3671, 3680, 3718, 3773, 3780, 3812, 3846

**Yatīndra** ... ... 3653, 3691, 3704, 3711, 3712, 3727, 3747, 3789, 3803, 3837, 3839, 3847

*Yatīndrmatadīpikā* ... 3772 to 3774

**Yatipati** ... ... ... 3644, 3645, 3648, 3670, 3671, 3689, 3704, 3709, 3731, 3732, 3743, 3758, 3771, 3773, 3787, 3796, 3798

**Yatirāja** ... ... ... 3649, 3697, 3698, 3743, 3772, 3816

**Yōgaratnāvali** ... ... 3908

**Yōgasāra** ... ... 3801

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# AGENTS FOR THE SALE OF MADRAS GOVERNMENT PUBLICATIONS.

## IN THE EAST.

CALCUTTA SCHOOL BOOK AND USEFUL LITERATURE SOCIETY, 1, Wellington Square, Calcutta.
R. CAMBRAY & CO., Calcutta.
COMBRIDGE & CO., Madras.
T. COOPOOSWAMY NAICKER & CO., Madras.
HIGGINBOTHAMS & CO., Mount Road, Madras.
V. KALYANARAMA IYER & CO., Esplanade, Madras.
S. MURTHY & CO., Kapalee Press, Madras.
G. A. NATESAN & CO., Madras.
P. R. RAMA IYAR & CO., Madras.
RADHABAI ATMARAM SAGUN, Bombay.
SARASVATI PUBLISHING HOUSE, Popham's Broadway, Madras.
* T. K. SITARAMA AIYAR, Kumbakónam.
D. B. TARAPOREVALA SONS & CO., Bombay.
TEMPLE & CO., Georgetown, Madras.
THACKER & CO. (Limited), Bombay.
THACKER, SPINK & CO., Calcutta.
THOMPSON & CO., Madras.

## IN ENGLAND.

E. A. ARNOLD, 41 and 43, Maddox Street, Bond Street, W., London.
B. H. BLACKWELL, 50 and 51, Broad Street, Oxford.
CONSTABLE & CO., 10, Orange Street, Leicester Square, W.C., London.
DEIGHTON, BELL & CO., Cambridge.
T. FISHER UNWIN, 1, Adelphi Terrace, W.C., London.
GRINDLAY & CO., 54, Parliament Street, S.W., London.
KEGAN PAUL, TRENCH, TRÜBNER & CO., 43, Gerrard Street, Soho, W., London.
HENRY S. KING & CO., 65, Cornhill, E.C., London.
P. S. KING & SON, 2 and 4, Great Smith Street, Westminster, S.W., London.
LUZAC & CO., 46, Great Russell Street, W.C., London.
B. QUARITCH, 11, Grafton Street, New Bond Street, W., London.
W. THACKER & CO., 2, Creed Lane, E.C., London.

## ON THE CONTINENT.

FRIEDLÄNDER & SOHN, 11, Carlstrasse, Berlin.
OTTO HARRASSOWITZ, Leipzig.
KARL W. HIERSEMANN, Leipzig.
ERNEST LEROUX, 28, Rue Bonaparte, Paris.
MARTINUS NIJHOFF, The Hague, Holland.

* Agent for sale of the Legislative Department publications.

For Private and Personal Use Only